**बहुस**-बहुशः-अनेकधा । आव० ३३० ।

**बहुसइ**-बहुधण्णकारी । नि० चू० प्र० ६४ आ ।

**बहुसच्च**-बहुसत्यः-एकादशममुहूर्त्तनाम । सूर्य० १४६ । जं० प्र० ४६१ ।

**बहुसड्ढा**-अव्यक्तभासिणो । नि० चू० द्वि० ७२ आ ।

**बहुसम**-बहुसमः-प्रभूतसमः । सूर्य० २९३ । बहुसमः-बहु-अत्यन्तं समः । जं० प्र० ३१ । बहुसमः-अत्यन्तसमः । जीवा० २२७ । अतिसमः-सुविभक्तः । ज्ञाता० ४२ । सर्वमत्र समं प्रभूतसमम् । आचा० ३३९ ।

**बहुसमतुल्लाओ**-समतुल्यशब्दः सदृशार्थः अत्यन्तं समतुल्ये बहुसमतुल्ये प्रमाणतः । ठाणा० ६८ ।

**बहुसमरमणिज्ज**-अत्यन्तसमो बहुसमोऽत एव रमणियो-रम्यः । सम० १६ ।

**बहुसयण**-बहुस्वजनः-बहुपाक्षिकः । आव० ७३९ ।

**बहुसालए**-माहणकुण्डग्रामनगरे चैत्यविशेषः । भग० ४५६ ।

**बहुसालग**-बहुशालकः ग्रामः । आव० २१० ।

**बहुसुभ**-बहुशुभः-प्रभूतसुखम् । आव० ५४७ । बहुशुभः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आव० ७९३ ।

**बहुसुयपुज्जं**-बहुश्रुतपूज्यं-उत्तराध्ययनेऽवेकादशममध्ययनम् । उत्त० ९ ।

**बहुसुयपूजा**-उत्तराध्ययनेषु एकादशममध्ययनम् । सम० ६४ ।

**बहुसुयपूया**-बहुसूत्रपूजा बहोः सूत्रस्य पूजा श्रुतस्य वा पूजा बहुश्रुतपूजा । उत्त० ३४२ ।

**बहुसुया**-बहुश्रुताः-ये गीतार्थाः श्रुतधराः, गणिवाचकादिशब्दाभिधेयाः । बृ० द्वि० प्र० २०७ आ ।

**बहुसुषमा**- । ठाणा० ७६ ।

**बहुस्सुअ**-बहुश्रुतः-आकर्णिताधीतबहुशास्त्रः । बहुसुतो वा बहुपुत्रो बहुशिष्यो वा । प्रश्न० ११६ । बहुश्रुतः-बह्वागमः, महाकल्पादिश्रुतधरः । आव० ५३१ ।

**बहुस्सुआ**-बहुश्रुता-विविधागमश्रवणावदातीकृतमतयः । उत्त० २५३ ।

**बहुस्सुए**-बहुश्रुताः । ज्ञाता० १२३ ।

**बहुस्सुया**-युगप्रधानागमाः । बृ० द्वि० ८० आ ।

**बाउस**-बाकुशिकः-विभूषणशीलः । ओघ० १३१ ।

**बाउसिअ**-बाकुशिकः-विभूषणशीलः । ओघ० १७९ ।

**बाडगरहिअ**-वाटकरहितः । आव० ७३९ ।

**बाढं**-अत्यर्थं करोमि आदेशं शिरसि स्वाम्यादेशमिति । आव० १७६ ।

**बाढक्कार**-बाढक्कारं एवमेतद् नाऽन्यथेति ब्रूयादित्यर्थः । विशे० ३०४ ।

**बाणगुम्मा**-बाणगुल्माः-गुल्मविशेषः । जं० प्र० ९८ ।

**बाणारसी**-अलक्ष्यभूपतेर्नगरी । अन्त० २५ ।

**बादर**-प्रभूतप्रदेशोपचितम् । प्रज्ञा० ५०२ ।

**बादरक्षेत्रपल्योपम**-क्षेत्रपल्योपमे प्रथमो भेदः । ठाणा० ९१ ।

**बादरबोन्दिधराणि**-पर्याप्तकत्वेन स्थूराकारधारीणि । ठाणा० २९५ ।

**बाधित**-जरसोसादिणा । नि० चू० प्र० ९९ आ ।

**बायर**-बादरनाम यदुदयाज्जीवा बादरा भवन्ति । ठाणा० २९५ । बादरत्वं परिणामविशेषः । प्रज्ञा० ४७४ । बादरमेवातिचारजातमालोचयति न सूक्ष्मम् । ठाणा० ४८४ । भग० ९१९ । बादरं-प्रभूतप्रदेशोचितम् । प्रज्ञा० २६३, ५०२ । बादरः-गुरुतरः अतिबहलतरो वा । जीवा० ३४४ । बादरः-असारः पुद्गलः । जीवा० ३४४ ।

**बायालीसं**-द्वाचत्वारिंशत्-द्वाचत्वारिंशत्तमः । सूर्य० ३३ ।

**बारं**-द्वारम् । आव० ३२३ ।

**बारजक्खणी**-द्वारपक्षावासः । आव० ६८० ।

**बारत्तत**-नामविशेषः । अन्त० २३ ।

**बारब्भासो**-द्वाराभ्यासः । आव० ३५५ ।

**बारवइ**-द्वारिका । आव० ३५८ । द्वारिका-वैनयिक्यां बुद्धौ पुरी । आव० ४२४ । द्वारावती-वासुदेवपुरी । आव० १६२ । द्वारावती-द्वारिका-कृष्णराजधानी । दश० ३६ । नि० चू० द्वि० १०४ आ ।

**बारवइणयरी**-द्वारावतीनगरी-द्वारिकानगरी । दश० ३६।

**बारवई**-द्वारावती-द्वारिका । दश० ९६ । द्वारावती-कृतिकर्मदृष्टान्ते पुरी । आव० ५१३ । द्वारावती-कृष्णवासुदेवस्य नगरी । अन्त० १८ । ज्ञाता० ९९, २०७ । द्वारावती-सुराष्ट्रजनपदे आर्यक्षेत्रम् । प्रज्ञा० ५५ । नि० चू० प्र० ४४ अ । द्वारवती-नेमिजिनस्य प्रथमपारणकस्थानम् । आव० १४६ । द्वारावती-पुरीविशेषः-नेमिनाथजिनस्य स्थानम् । आव० १३७ । कृष्णस्य राजधानी । निरय० ३९ । द्वारावती पुरीविशेषः । आव० ९४ ।

**बारवती**-द्वारावती-अरिष्टनेमिजिनस्य समवसरणस्थानम् । अन्त० ५ । द्वारावती-वसुदेवराजस्य नगरी । अन्त० ४ । द्वारिका-वासुदेवराजधानी । आव० २७२ । कण्हस्स णयरी । बृ० प्र० ५६ अ । द्वारावती-कृष्णवासुदेवराजधानी । अन्त० १ ।

**बारवाला**- । नि० चू० प्र० २७२ अ ।

**बारसावत्त**-द्वादशावर्त्तः । आव० ५१५ । द्वादशावर्ताश्च इमे वराहोक्ताः-"ये प्रपाणगलकर्णसंस्थिताः, पृष्ठमध्यनयनोपरिस्थिताः । ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः ॥१॥ जं० प्र० २३६ ।

**बारसावय**-द्वादशावर्त्तः-सूत्राभिधानगर्भः कायव्यापारविशेषो यस्मिन् सः । आव० ५४२ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बारसाहृदिवसे**-द्वादशाहदिवसः-द्वादशानां पूरणो द्वादशः स एवाख्या यस्य स द्वादशाख्यः स चासौ दिवसश्चेति विग्रहः, अथवा द्वादशं च तदहश्च द्वादशाहस्तन्नामको दिवसो द्वादशाहदिवस इति । ठाणा० ४६२ ।

**बार्हस्पत्य**-मतविशेषः । आचा० ८२ ।

**बाल**-बालः-भगवत्यां एतन्नामकः प्रथमशतकाष्टमोद्देशः । भग० ६ । बालः-अज्ञः । दश० १९६ । बालः-अष्टवर्षादारभ्य यावत्पञ्चविंशतिका । ओघ० २५ । अविवेकः । उत्त० ३१६ । अशस्तद्वद् यो वर्त्तते विरतिसाधकविवेकविकलत्वात् स बलः-असंयतः । ठाणा० १७५ । सम्यगर्थानवबोधात् सद्बोधकार्यविरत्यभावाच्च मिथ्यादृष्टिः । भग० ६४ । रागादिमोहितः । आचा० १२५ । अष्टवर्षादारभ्य यावत्पञ्चविंशतिकः । ओघ० २५ । अविरतः । अनु० १२० । अचिरकालजातम् । जीवा० १९२ । बालमरणं-मरणस्याष्टमो भेदः । उत्त० २३० । बालः-अभिनवः, प्रत्यग्रः । सूत्र० १३३ । बालः-तत्सर्वमहमकार्षमित्येवं द्वाभ्यामाकलितोऽज्ञो वा । सूत्र० २८९ । बुभुक्षया तृषा वाऽऽगलितो बालः । बृ० प्र० ३४ अ । बालः-द्वाभ्यां रागद्वेषाभ्यामाकुलितः । उत्त० २८० ।

**बालगवि**-अवृद्धा गो, व्यालगवः-दुष्टबलिवर्दो वा । उत्त० ५५१ ।

**बालग्गाहृ**-बालग्राहः । आव० ६६, ३७० ।

**बालघायए**-प्रहारदानेन बालघातकः । ज्ञाता० ८७ ।

**बालचंद**-बालचन्द्रः-शुक्लपक्षद्वितीयाचन्द्रः । ज्ञाता० २२२। बालचन्द्रः । प्रज्ञा० ४४१ । साकेतनगरे-चन्द्रावतंसकराज्ञः प्रियदर्शनायाः कनिष्ठपुत्रः । आव० ३६६ ।

**बालण्ण**-बलं जानाति इति बलज्ञः, छान्दसत्वाद्दीर्घत्वं, आत्मबलं-सामर्थ्यं जानातीति यथाशक्त्यनुष्ठानविधायी अनिगूहितबलवीर्यं इत्यर्थः । आव० १३२ ।

**बालतपः**-अग्निप्रवेशमरुप्रपातजलप्रवेशादि । तत्त्वा० ६-२० ।

**बालतव**-बालतपः-अज्ञानितपश्चरणम् । आचा० १७५ ।

**बालतवस्सी**-बालतपस्वी वैश्यायनः । आव० २१२ ।

**बालदिवायर**-बालदिवाकरः-प्रथममुद्गच्छन् सूर्यः । प्रज्ञा० ३६१ ।

**बालधोवणं**-चमरिबाला धोवंति तक्कादीहिं । नि० चू० तृ० ६१ अ ।

**बालपंडिअ**-बालपण्डितः-देशविरतः । सम० ३४ । अनु० १२० ।

**बालपंडितमरण**-बालपण्डिताः देशविरतास्तेषां मरणं बालपण्डितमरणम् । सम० ३३ ।

**बालपंडिय**-देशविरतः । आउ० । बालपण्डितः-देशविरतः । भग० ६४ । बालपण्डितः-श्रावकः । भग० ९१ । बालो-देशे विरत्यभावात् पण्डितो-देश एव विरतिसद्भावादिति बालपण्डितः-देशविरतः । भग० ६४ ।

**बालभावलोभावए**-बालभावलोभावहः । आव० २९० ।

**बालमरण**-विरमणं विरतं-हिंसाऽनृतादेरुपरमणं न विद्यते तद् येषां तेऽमी अविरताः तेषां-मृतिसमयेऽपि देशविरतिमप्रतिपद्यमानानां मिथ्यादृशां सम्यग्दृशां वा मरणमविरतमरणं बालमरणमिति । उत्त० २३४ । अविरतमरणम् । भग० ६२४ । बाला इव बालाः-अविरतास्तेषां मरणं बालमरणम् । सम० ३३ ।

**बालमारए**-बालमारकः प्राणवियोजनेन । ज्ञाता० ८७ ।

**बालरज्जु**- । आव० २२२ ।

**बालव**-द्वितीयं करणम् । जं० प्र० ४९३ ।

**बालवच्छा**-बालवत्सा-स्तन्योपजीविशिशुका । पिण्ड० १५७ । शिशुपालिका । ओघ० १६३ ।

**बालवयणिज्जा**-बालानां-प्राकृतपुरुषाणामपि वचनीयाः-गर्ह्याः बालवचनीयाः । आचा० २५१ ।

**बाला**-जन्तोः प्रथमा दशा । दश० ८ । रागद्वेषाकलिताः। आचा० ३०५ । अभिनवयौवना । उत्त० ४७६ । जातमात्रस्य जन्तोर्या सा प्रथमा दशा, तत्र सुखदुःखानि न बहु जानन्ति इति बाला । ठाणा० ५१९ । बाल इव बालाः-अविरताः । सम० ३४ । रागद्वेषाकुलिताः उत्त० २६७ । प्राकृतपुरुषाः । आचा० २५१ । प्रथम दशा । नि० चू० द्वि० २८ आ ।

**बालाभिरामः**-बालानां-विवेकरहितानामभिरामः-चित्ताभिरतिहेतुः । उत्त० ३८६ ।

**बालिदगोवेइ**-बालेन्द्रगोपकः-सद्यो जात इन्द्रगोपकः जं० प्र० ३४ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बालिय**-बाल्यं-बालतः, मिथ्यात्वः । अविरतिश्च । भग० १०० ।

**बालियत्तं**-बालत्वम् । भग० १०२ ।

**बाली**-तूलविशेषः । राज० ५० ।

**बालेंदगोवे**-बालेन्द्रगोपकः-सद्यो जात इन्द्रगोपकः, स हि प्रवृद्धः सन् ईषत्पाण्डुरक्तः । प्रज्ञा० ३६१ ।

**बावत्तरं**-द्वासप्ततं-द्विसप्तत्यधिकम् । सूर्य ११४ ।

**बासट्ठी**-द्वाषष्टिः-द्वाषष्टिभागीकृतस्य चन्द्रविमानस्य द्वौ भागावुपरितनावपाकृत्य शेषस्य पञ्चदशभिर्भागे हृते ये चत्वारो भागा लभ्यन्ते ते । सूर्य० २७९ ।

**बासीति**-द्व्यशीतं-द्व्यशीत्यधिकम् । सूर्य० ११ ।

**बाहणापदाणं**-बाधना बाधहेतुत्वात् पदानां संयमस्थानानां प्रजानां वा-लोकानां बाधनापदानाम् । अब्रह्मणः सप्तमं नाम । प्रश्न० ६६ ।

**बाहत्तरिकलापंडिओ**-द्वासप्ततिकलापण्डितः । उत्त० २१० ।

**बाहप्पमोक्खण**-बाष्पप्रमोक्षणं-आनन्दाश्रुजलप्रमोचनम् । ज्ञाता० ८९ ।

**बाहलविसओ**-बाल्हीकविषयः-देशविशेषः । आव० २६१ ।

**बाहल्ल**-बाहल्यं, स्थूलता । प्रज्ञा० ४८ । बाहल्यं-उच्चैस्त्वम् । आव० ४४३ । बाहुल्यं-पिण्डः । सम० ३६ । आचा० १५ । सूर्य० १९ । जं० प्र० ५३ । बाहुल्यं-उरःपृष्ठस्थूलता । प्रज्ञा० ४२७ । बाहुल्यं-उच्चत्वम् । जं० प्र० ४३५ । बाहुल्यं-स्थूलता । जीवा० ४० । बाहुल्यम् । प्रज्ञा० १०७ । बाहुल्यं-बहलता, पिण्डत्वम् । प्रज्ञा० २६१ । बाहुल्यं-पिण्डभावः । जीवा० ६७, १०१ ।

**बाहल्लओ**-बाहल्यतः-पिण्डतः । प्रज्ञा० ५९१ ।

**बाहव**-भुजाः । आचा० २४६ । द्वारशाखाः । ठाणा० ४५० ।

**बाहा**-दक्षिणोत्तरायता वक्रा आकाशप्रदेशपङ्क्तिः । जं० प्र० ७२ । बाधनं बाधा-आक्रमणम् । जीवा० २२२ । जं० प्र० ६४ । बाधा-परस्परं संश्लेषतः पीडनम् । जं० प्र० ६५ । बाधते इति बाधा-कर्मण उदयः । भग० २५५ । जं० प्र० ७३ । बाधा । सूर्य० ६७ । बाहुः । आव० १२३, ५०६ । शिरोभागाधोवर्ती जानुनोरुपरिवर्ती प्राक्चरणभागः । जं० प्र० २३४ । बाधा-मलबाधा । आव० ६१८ ।

**बाहाए**-बाहे-उभयपार्श्वौ । जं० प्र० २३० । बाहौ-पार्श्वे । सम० १६ ।

**बाहागयपप्पुअच्छियं**-बाष्पागतोपप्लुताक्षिकम्, बाष्पास्यागतं-आगमनं तेनोपप्लुते-व्याप्ते अक्षिणी यत्र तत्तथा । अनु० १३९ ।

**बाहाया**-वृक्षविशेषः । अनुत्त० ५ ।

**बाहिति**-बाधेते । आव० ३६७ ।

**बाहिपरिसरो**-बहिः परिसरः । आव० ८६३ ।

**बाहिर**-द्रष्टुर्बहिर्योऽवस्थितस्तस्यैव एकस्यां दिशि अनेकासु वा विच्छिन्नः स बाह्यः । आव० ४४ । धर्मसाधनव्यतिरेकेण धनधान्यादिरनेकधा परिग्रहः । ठाणा० २६ । बाह्यं-अनशनादिः । प्रश्न० १५७ । बाह्यम् । ठाणा० ३६४ । ओघ० २०९ । लोकाचारस्य बाह्यः । ओघ० ६३ ।

**बाहिरए**-बाह्यस्यैव शरीरस्य तापनान्मिथ्यादृष्टिभिरपि तपस्तया प्रतीयमानत्वाच्च बाह्यः । औप० ३७ ।

**बाहिरओ**-बहिस्तात्-स्वरभागे । जं० प्र० २०१ । बाह्यावधिः । विशे० ३६७ ।

**बाहिरकरणालस**-बाह्यकरणालसः-प्रत्युपेक्षणादिबाह्यचेष्टारहितः । आव० ५३४ ।

**बाहिरगा**- । भग० ६३४ ।

**बाहिरगिरिपरिरओ**-बहिर्गिरिपरिरयः-गिरेर्बहिः परिच्छेदः । जीवा० ३४३ ।

**बाहिरणियंसणी**-उवरि कडिउ आरद्धा जाव अहो खुलुगो । नि० चू० प्र० १८० अ ।

**बाहिरपाडओ**-बाह्यपाटकम् । आव० ५२० ।

**बाहिरपाणं**-सचित्तजलम् । ग० ।

**बाहिरलावणिय**-बाह्यलावणिकः-लवणसमुद्रे शिखाया बहिश्चारी चन्द्रः । जीवा० ३१८ ।

**बाहिरसंबुक्का**- । उत्त० ६०५ ।

**बाहिराबाहिर**-बाह्याबाह्यं, द्रव्यानुयोगे सप्तमभेदः । ठाणा० ४८१ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बाहिरावही**-बाह्यावधिः । प्रज्ञा० ५३६ ।

**बाहिराहिया**-बाहिरा-बाह्याः स्वाचारपरिभ्रंशाद्विशिष्टजनबहिर्वतिनः, अहिया-अहिता ग्रामादिदाहकत्वात् । विपा० ५६ ।

**बाहिरिआ**-बाहिरिका-नगरबहिर्भागः । जं० प्र० १८८ । बाहिरिका-आभ्यन्तरिकापेक्षया बाह्या । जं० प्र० १८७ ।

**बाहिरिका**-बहिर्भवा बाहिरिका-प्राकारबहिर्वत्तिनी गृहपद्धतिः । बृ० प्र० १८१ अ ।

**बाहिरिय**- । नि० चू० प्र० १४३ आ ।

**बाहिरिया**-बाहिरिका-नगरबहिर्भागः । औप० ६१ । ठाणा० ४५७ । बहिर्भागः । भग० ४७६ । आव० २९३, ५१२ । भग० ६६१ ।

**बाहिरे तवो**-बाह्यतपः-बाह्यशरीरस्य परिशोषणेन कर्मक्षपणहेतुत्वादिति । सम० १२ ।

**बाहिसंबुक्कावट्टा**-गोचरचर्यामभिग्रहविशेषः । नि० चू० तृ० १२ अ ।

**बाहिंहितो**-गृहादेर्बहिस्तात् । ठाणा० ३५३ ।

**बाहुः**-उदग्धनुः काष्ठाद्दक्षिणं शोध्यं शेषार्धम् । तत्त्वा० ३-१२ । आचा० ३८ । बाहुः-वज्रसेनधारिण्योः पुत्रः । आव० ११७ ।

**बाहुअं**-रोसवसेणं वलोवलि जुज्झं लग्गा । नि० चू० प्र० २१६ अ ।

**बाहुए**-बाहुकः-यः शीतोदकादिपरिभोगात् सिद्धः । सूत्र० ९५ ।

**बाहुजोही**-बाहुभ्यां युध्यत इति बाहुयोधी । ज्ञाता० ४२ ।

**बाहुपमाण**-बाहुप्रमाणः-स्कन्धप्रमाणः । ओघ० २१८ ।

**बाहुपम्मद्दी**-बाहुभ्यां प्रमृन्दातीति बाहुप्रमर्द्दी । ज्ञाता० ४२ ।

**बाहुबलि**-बाहुबलिः-सोमप्रभपिता, श्रेयांसपितामहः । आव० १४५ । येन संवत्सरं यावत् कायोत्सर्गः कृतः सः । आव० ७७२ । ऋषभजिनस्य पुत्रः । आचा० १३३ ।

**बाहुबली**-बाहुबलिः तक्षशिलायां राजा । आव० १४७ । नि० चू० प्र० ३०४ अ । वैयावृत्ये दृष्टान्तः । ओघ० १७९ ।

**बाहुया**-त्रीन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ । जीवा० ३२ ।

**बाहुयुद्धं**-योधप्रतियोधयोः अन्योऽन्यं प्रसारितबाह्वोरेव निर्नमया वल्गनम् । जं० प्र० १३९ । ज्ञाता० ३८ ।

**बाहुरक्षिकाः**-त्रुटितानि । प्रज्ञा० ९१ ।

**बाहुल**-इन्द्रदत्तराज्ञो दासचेडः । उत्त० १४८ ।

**बाहुलेर**-बाहुलेयः । आव० ८८ ।

**बाहुल्य**-अनुपरतं-उत्सन्नम् । आव० ५९० ।

**बाह्यग**-बाह्यं-नगरबहिर्वर्तिप्रदेशं गच्छतीति बहिर्निष्क्रामन्तम् । उत्त० ४८३ ।

**बाह्यपरिधि** पर्यन्तचक्रवालम् । प्रश्न० ६१ ।

**बाह्यम्**- । ठाणा० ३६४ ।

**बिंट**-वृन्तं-प्रसवबन्धनम् । प्रज्ञा० ३७ ।

**बिंटबद्ध**-वृन्तबन्धं-वृन्ताकप्रभृतिः । जीवा० १३६ ।

**बिंति**-ब्रुवते-अवधारयन्ति । सूत्र० ११२ ।

**बिंदुसार**-चंदगुत्तस्स पुत्तो । बृ० प्र० ४७ अ । चन्द्रगुप्तपुत्रो बिन्दुसारः । विशे० ४०६ । चंदगुत्तस्स पुत्तो । नि० चू० प्र० २४३ । चन्द्रगुप्तस्य पुत्रः । बृ० द्वि० १५४ अ ।

**बिंब**-बिम्बं-बिम्बीफलम् । प्रज्ञा० ९१ । जीवा० १६३ । बिम्बं-रूपम् । आव० ५२२ । प्रतिमा । आव० ५२४ । हस्तपादकर्णनासाक्षिविवर्जितं बिम्बम् । नि० चू० द्वि० ४५ आ । बिम्बं-गर्भप्रतिबिम्बं, गर्भाकृतिरार्त्तवपरिणामः । ठाणा० २८७ । बिम्बः-चर्मकाष्ठादि । ओघ० २२३ । बिम्बः-अत्याम्लम् । आव० ४३७ ।

**बिंबफलं**-गोल्हाफलम् । जीवा० २७२ । प्रश्न० ८१ । बिम्बफलं-पक्वगोल्हाफलम् । जं० प्र० ११२ ।

**बिंबभूय**-बिम्बभूतः-जलचन्द्रवत्तदर्थशून्यं कूटकार्षापणवद्वा लिङ्गमात्रधारी पुरुषाकृतिमात्रो वा । सूत्र० २३५ ।

**बिंहणिज्ज**-बृंहणीयं धातूपचारित्वात् । जं० प्र० ११९ ।

**बिइज्जयं**-द्वितीयम् । आव० २११, ३४९ ।

**बिइज्जिय**-द्वितीयम् । आव० ३४९ ।

**बिइयकसाया**-द्वितीयकषायाः-अप्रत्याख्याननामधेयाः क्रोधादयः । आव० ७७ ।

**बिइयदुय**-द्वितीयद्वयं-हेतुस्तच्छुद्धिश्च । दश० ७६ ।

**बिखुरा**-द्वौ द्वौ खुरौ प्रतिपदं येषां ते द्विखुराः-उष्ट्रादयः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञा० ४५ ।

**बिगुणं**-द्विगुणं-द्विसंख्याङ्क बिगुणं-प्रधानं गुणरहितम् । जं० प्र० ९१ ।

**बिचक्खु**-देवो द्विचक्षुः चक्षुरिन्द्रियावधिभ्याम् । ठाणा० १७१ ।

**बिजडो**-द्विजटी । जं० प्र० ५३५ ।

**बिडाल**-मार्जारः । जं० प्र० १२४ । उत्त० ६२६ । जीवा० २८२ ।

**बिण्णि**-द्वौ । भग० १७६ ।

**बितिउग्गह**-द्वितीयप्रतिग्रहकः । ओघ० २१५ ।

**बितिज्ज**-साहाय्यकः । आव० ७१८ ।

**बितिज्जिया**-द्वितीयिका । दश० ९७ ।

**बितिसत्त**-द्वितीया सप्तरात्रिकी । आव० ६४७ ।

**बिदलकट्ठमओ**-द्विदलकाष्ठमयः । आव० ७१७ ।

**बिदलियचट्टुलयछिन्न**-द्विदलवत्तिर्यक्छिन्नः । आव० ६५१ ।

**बिन्दुः**-पुलकः । सूर्य० ४ । बिन्दवः-छटाः । जं० प्र० २३६ ।

**बिन्दुसार**-चतुर्दशं पूर्वनाम । ठाणा० १९९ । आव० ६६ । बिन्दुसारः-राजविशेषः । दश० ६१ । श्रुतज्ञानम् । विशे० ५०१ ।

**बिन्दुसारपुव्व**-चतुर्दशं पूर्वम् । सम० २६ ।

**बिन्नागयड**-बेन्नाकतटं-नगरविशेषः । उत्त० २१८ ।

**बिब्बोअ**-उच्छीर्षकं । ग० ।

**बिब्बोयण**-उपधानकम् । सूर्य० २९३ । जीवा० २३१ । उपधानम् । ज्ञाता० १५ । उपधानकम् । राज० ९३ ।

**बिभीतक**-नोकर्म्मद्रव्यकषायास्तु बिभीतकादयः । आचा० ९१ । वनस्पतिविशेषः, नोकर्मद्रव्यकषाये दृष्टान्तः । विशे० ११६९ ।

**बिभेल**-सन्निवेषवेषशः । भग० ५०१ ।

**बिब्बोट्ठी**-बिम्बोष्ठी-पक्वगोल्हाभिधानफलविशेषाकारोष्ठी ।

**बिरालिय**-कन्द एव स्थलजः । आचा० ३४८ ।

**बिल**-विवरम् । भग० २३७ । नंदी० १५२ । कूपः । जं० प्र० ४१ । जीवा० १९७ । खनिविशेषोत्पन्नं लवणम् । आचा० ३४३ । बिलानीव बिलानि स्वभावनिष्पन्ना जगत्यादिषु कूपिका । प्रज्ञा० ७२ । बिलानि-कूपाः । राज० ७८ । बिलं-विवरम् । भग० २३७ । कूपः । जं० प्र० ४१ । रन्ध्रः । ज्ञाता० १९९ ।

**बिलकोलीकारग**-बिलकोलीकारकः परव्यामोहनाय विस्वरवचनवादी विस्वरवचनकारी वा । प्रश्न० ४७ ।

**बिलधम्म**-गृहस्थैः संवर्यैकत्र स्थानम् । बृ० द्वि० १३६ आ ।

**बिलपंतिआ**-बिलपङ्क्तिः । अनु० १५९ ।

**बिलपंतिया**-बिलानीव बिलानि-स्वभावनिष्पन्ना जगत्यादिषु कूपिकास्तेषां पङ्क्तयो बिलपङ्क्तयः । प्रज्ञा० ७२ । बिलपङ्क्तिका-धातुखनिपद्धतिः । प्रश्न० १६० ।

**बिलपंती**-बिलपङ्क्तिः-विवरश्रेणिः । भग० २३८ ।

**बिलवासिण**-बिलवासिनः । निरय० २५ ।

**बिल्ल**-बिल्वं-फलविशेषः । प्रज्ञा० ३२८, ३६५ । भग० ८०३ । बिल्वं-फलविशेषः । अनु० १९२ ।

**बिल्लगिर**-बीजपूरगर्भम् । आव० ६९८ ।

**बिल्ली**-हरितविशेषः । प्रज्ञा० ३३ । गुच्छाविशेषः । प्रज्ञा० ३२ ।

**बिल्व**-वेणुकं फलविशेषः । आचा० ३४६ । बिल्वीफलम्-श्रीफलम् । दश० १०० ।

**बिश**-मृणालिका । जीवा० २७२ ।

**बिशकणिका**- । प्रज्ञा० ४७३ ।

**बिस**-कन्दः । जीवा० १२३, १९८ । मृणालम् । भग० ६२८ । पद्मिनीकन्दः । जीवा० १९१ । नालं मृणालं च । प्रज्ञा० ३७ । पद्मिनीकन्दः । राज० ३३ । कन्दाः । राज० ७८ ।

**बिसकंद**-बिसकन्दः । जीवा० २७८ ।

**बिहप्पई**-बृहस्पतिः-अष्टाशीतौ महाग्रहे त्रिचत्वारिंशत्तमः । जं० प्र० ५३५ ।

**बिहेलए**-बिभीतकः-अक्षः वृक्षविशेषः । प्रज्ञा० ३१ ।

**बिहेलग**-बिभीतकं बिभीतकफलम् । दश० १८६ ।

**बीअ**-बीजं-हरितफलरूपम् व्रीह्यादि । दश० २६५ । बीजं-पृथग्भूतम् । दश० २०० ।

**बीअग**-बीअको-वृक्षविशेषः । जं० प्र० ३४ ।

**बीअगुम्मा**-बीअकगुम्माः गुल्मविशेषाः । जं० प्र० ९८ ।

**बीअणि**-व्यजनं-पदैकदेशे पदसमुदायोपचाराद् व्यालव्यजनं चामरं आर्षत्वात् स्त्रीत्वं तेन व्यजनीति निर्देशः । जं०



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्र० १८३ ।
**बीअपूरक**-मातुलिङ्गम् । अनुत्त० ६ ।
**बीअबुद्धी**-बीजमिव विविधार्थाधिगमरूपमहातरुजननाद् बुद्धिर्येषां ते । औप० २८ ।
**बीअमंथू**-बीजमन्थुः-यवादिचूर्णम् । दश० १८६ ।
**बीअसंसत्त**-बीजसंसक्तं-बीजमिश्रं ओदनादि । दश० २०० ।
**बीअसुहुम**-बीजसूक्ष्मम् शाल्यादिबीजस्य मुखमूले कणिका, या लोके तुषमुखमित्युच्यते । दश० २३० ।
**बीआओ**-बीजायः-अपरदक्षिणो वातविशेषः । आव० ३८६ ।
**बीए**-बीजं प्रसारितशाल्यादि । दश० २२६ । बीजं-शाल्यादि । दश० १५५ ।
**बीज**-बीजमिव, यदेकमप्यनेकार्थप्रतिबोधोत्पादकं वचः । ठाणा० ५०४ । मिजा । ठाणा० ५२१ । व्रीह्यादि उत्पत्तिः । ठाणा० ४४९ । अनकुरितं यावत् । बृ० तृ० १६६ आ ।
**बीजबुद्धयः**-ये त्वेकं बीजभूतमर्थपदमनुसृत्यशेषमवितथमेव प्रभूततरमर्थपदनिवहमवगाहन्ते ते बीजबुद्धयः । बृ० प्र० १६३ आ ।
**बीजबुद्धिता**- । ठाणा० १३२ ।
**बीजबुद्धित्वम्**- । जीवा० ३
**बीजबुद्धी**-बीजकल्पा बुद्धिर्येषां ते बीजबुद्धिः-अर्थमात्रमवाप्य नानार्थसमूहाम्यूहिका बुद्धिर्यस्य स । प्रज्ञा० १०५ ।
**बीजरुह**- । ठाणा० १८७ ।
**बीतरुति**-यस्य ह्येकेनापि जीवादिना पदेनावगतेनानेकेषु पदार्थेषु रुचिरुपेति स बीजरुचिः । ठाणा० ५०३ ।
**बीभच्छ**-बीभत्सः-शुक्रशोणितोच्चारप्रश्रवणाद्यनिष्टमुद्वेजनीयं वस्तु बीभत्समुच्यते, तद्दर्शनश्रवणादिप्रभवो जुगुप्साप्रकर्षस्वरूपो रसः । अनु० १३५ ।
**बीभत्था**-बीभत्सा-निन्दा । जीवा० १०७ ।
**बीभत्थादरिसणिज्जा**-बीभत्सादर्शनीयः-निन्दादर्शनीयः । जीवा० १०७ ।
**बीयं समोसरणं**-ऋतुबद्धकालः । बृ० द्वि० २७८ आ ।
**बीयं**-बीजं-यदेकमप्यनेकार्थप्रबोधोत्पादकं वचः । प्रज्ञा० ५८ । शाल्यादि । ज्ञाता० ५२ । अणंकुरियं बीयं । नि० चू० द्वि० ८३ अ । बीजं नाम शौक्राः पुद्गलाः । व्य० द्वि० ३५० आ ।
**बीयक**-आसासकाभिधानो वृक्षः । राज० ६ ।
**बीयकाए**-बीजमेव कायो यस्य स बीजकायः । सूत्र० ३५० ।
**बीयग**-बीयकः-वृक्षः प्रतीतः । जीवा० १९१ ।
**बीयगसउणं**- । भग० ६२७ ।
**बीयपयं**-अपवादपदम् । ग० ।
**बीयबुद्धि**-बीजबुद्धिः । या पुनरेकमर्थपदं तथाविधमनुसृत्य शेषमश्रुतमपि यथावस्थितं प्रभूतमर्थमवगाहते सा बीजबुद्धिः । प्रज्ञा० ४२४ ।
**बीयबेंटिया**-त्रीन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ ।
**बीयभोयण**-बीजं-दाडिमादीनां भोजनम् । ठाणा० ४६० ।
**बीयभोयणा**-बीजभोजना-बीजानि भोजने यस्यां प्राभृतिकायां सा । आव० ५७६ ।
**बीयभोयणेइ**- । भग० ४६७ ।
**बीयरुई**-बीजं-यदेकमप्यनेकार्थप्रतिबोधोत्पादकं वचस्तेन रुचिर्यस्य स बीजरुचिः । उत्त० ५९३ । ठाणा० ५०४ । बीजमिव बीजं-यदेकमप्यनेकार्थप्रबोधो वचः तेन रुचिर्यस्य बीजरुचिः । प्रज्ञा० ५६ ।
**बीयरुह**-बीजरुहाः-शालीव्रीह्यादयः । आचा० ५७ । बीजरुहाः-शाल्यादयः । दश० १३९ । साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।
**बीयवावए**- । नि० चू० प्र० ३३५ आ ।
**बीयवासा**-बीजवर्षः-बीजवर्षणम् । भग० १९९ ।
**बीयवुट्ठी**-बीजवृष्टिः । भग० १९९ ।
**बीयसुहुम**-बीजसूक्ष्मं-शाल्यादिबीजस्य मुखमूले कणिकाः लोके या तुषमुखमित्युच्यते । ठाणा० ४३० ।
**बीया**-बीजानि-अभिनवाङ्कुरितानि । आचा० ३७६ । औषधिविशेषः । प्रज्ञा० ३३ ।
**बीयावक**- । आचा० ३७६ ।
**बीयाहारा**-बीजाहाराः । निरय० २५ ।
**बीहणओ**-भापयति-भयवन्तं करोतीति भापनकः । प्रश्न० ५ ।
**बीहावणयं**-भापनम् । ओघ० २०३ ।
**बीहावेति**-भापयति । आव० १९१ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बोहियव्वं**-भेतव्यम् । आव० १२२ ।
**बुंदि-बुन्दिः**-शरीरम् । उत्त० ६६८ । बुंदि-शरीरम् । तं० ।
**बुंदुच्छियं**-बिन्दूद्धारः । मर० ।
**बुइआरकं**-कपाटयोः पश्चाद्भागे यन्त्रम् । बृ०द्वि०१६४आ ।
**बुइए-उक्तं**-कथितम् । भग० १५५ । उक्तः । भग० २४८ ।
**बुइय**-उक्तम् । उत्त० ४४५ । उक्तं-प्रतिपादितम् । सूत्र० २७२ ।
**बुइयाइं**-व्यक्तवाचोक्तानि स्वरूपतः । ठाणा० २९७ ।
**बुक्कः**- । विशे० ६०९ ।
**बुक्कण्ण**- । नि० चू० प्र० १३ अ ।
**बुक्कसं**-मुद्गमाषादिनखिकानिष्पन्नमन्नमतिनिपीडितरसम् । उत्त० २६५ । चिरन्तनधान्यौदनं-पुरातनसक्तुपिण्डं, बहुदिवससम्भृतगोरसं गोधूममण्डकं च । आचा० ३१५ ।
**बुक्कह**-भक्षयत । मर० ।
**बुक्कासकुलाणि**-बाक्कशालियाः-तन्तुवायाः । आचा० ३२७ ।
**बुज्झंति**-बुध्यन्ते घातिकर्मक्षयेण । उत्त० ५७२ । बुध्यन्ते-केवलिनो भवन्ति । आव० ७६१ । निरावरणत्वात्केवलावबोधेन समस्तं वस्तुजातम् बुध्यन्ते । जीवा० ४८ ।
**बुज्झइ**-बुध्यते-अवगच्छति । प्रज्ञा० ६०६ । बुध्यते-अनुभवति । भग० २८९ । बुध्यते-सम्यक् श्रद्धत्ते इति बोधेः सम्यक्श्रद्धानपर्यायत्वात् । भग० ३३९ । रूयते । आव० ४२७ । रूयते-निद्रां जहाति । उत्त० १३७ । स एव यदा समुत्पन्नकेवलज्ञानतया स्वपरपर्यायोपेतान्निखिलान् जीवादिपदार्थान् जानाति तदा बुध्यत इति व्यपदिश्यते । भग० ३४ ।
**बुज्झति**-बुद्धयते-श्रद्धत्ते । ठाणा० ३०६ । केवलज्ञानभावात् समस्तवस्तूनि घातिचतुष्टयघातेन बुद्धयते । ठाणा० १८१ ।
**बुज्झिय**-बुद्धा-अनुभूय, प्राप्य च । उत्त० १८८ ।
**बुज्झेज्जा**-बुद्ध्येतानुभवेत् । भग० ४३२ । बुद्ध्येत-लोकालोकस्वरूपमशेषमवगच्छेत् । प्रज्ञा० ४०० । बुद्धयेत-जानीयात् । प्रज्ञा० ३९९ । बुद्ध्येत-अनुभवेत्, श्रद्धीत । ठाणा० ४६ ।

**बुट्टोसि**-त्रुटितः । नि० चू० प्र० ३४७ आ ।
**बुद्धंतो**-बुध्नान्तः-अधोभागः । सूर्य० २८७ ।
**बुद्ध**-बुद्धाः-आचार्याः । प्रज्ञा० २० । बुद्धः-अवगततत्त्वः गीतार्थः । दश० १९० । बुद्धः-अवगतवस्तुतत्त्वो गुरुः । उत्त० ५४ । बुद्धः-अवगततत्त्वः सर्वज्ञः । सूत्र० ४०५ । बुद्धः-अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवादिरूपं तत्त्वं बुद्धवानिति । बुद्धः-सर्वज्ञसर्वदर्शिस्वभावबोधरूपः । प्रज्ञा० ११२ । बुद्धः-कालत्रयवेदी । सूत्र० २४८ । बुद्धः-अवगतत्त्वः । जीवा० २५६ । आगामिचतुर्विंशतिकायां चतुर्विंशतितमजिनस्य पूर्वभवनाम । सम० १५४ । बुद्धः-जीवादितत्त्वज्ञाता महावीरः । जीवादितत्त्वं बुद्धवान् । भग० ९ । बुद्धः-ज्ञानवान् । भग० १११ । बुद्धाः-तत्त्वं ज्ञानवन्तः बुद्धवन्तः परमार्थमिति । ठाणा० ३३ ।
**बुद्धउत्त**-बुद्धानां-आचार्यादीनां पुत्र इव पुत्रः बुद्धपुत्रः । उत्त० ४६ । बुद्धोक्तं-बुद्धैः-अवगततत्त्वैस्तीर्थंकरादिभिरुक्तं-अभिहितम् । उत्त० ४६ ।
**बुद्धउत्तेनियागट्ठी**-बुद्धैः-अवगततत्त्वैरुक्तमभिहितं निजकं-ज्ञानादि, तदर्थयते-अभिलषतीत्येवंशीलः बुद्धोक्तनिजकार्थी । उत्त० ४६ ।
**बुद्धजागरिय**-बुद्धानां-व्यपोढाज्ञाननिद्राणां जागरिका-प्रबोधो बुद्धजागरिका । भग० ५५४ ।
**बुद्धबोधितः**-साधुभेदविशेषः । भग० ४ ।
**बुद्धबोधिताः**-आचार्यादिबोधिताः । ठाणा० ३४ ।
**बुद्धबोहिय**-बुद्धबोधितः-आचार्यबोधितः । नंदी० १३१ ।
**बुद्धबोहियसिद्धा**-बुद्धाः-आचार्यास्तैर्बोधिताः सन्तो ये सिद्धाः ते बुद्धबोधितसिद्धाः । नंदी० १३१ ।
**बुद्धवुत्त**-बुद्धव्युक्तः-बुद्धै अवगततत्त्वैर्व्युक्तो-विशेषेणाभिहितः स च द्वादशाङ्गरूप आगमः । उत्त० ४६ ।
**बुद्धि**-औत्पत्तिक्यादिचतुर्विधेति । सम० ११५ । ईहा-वग्रहः । अनु० ३६ । स्पष्टतरमवबुध्यमानस्य बोधपरिणतिः सा बुद्धिः । नंदी० १७६ । अवगतिः । उत्त० ३९२ । अवग्रहे हेतु बुद्धिः । नंदी० १९४ । भग० ३४५ । महापुण्डरीकः । ठाणा० ७३ । बुद्धिः-औत्पत्तिक्यादिरूपः । दश० २४६ । बुद्धिः-पण्डा । बृ० प्र०



Jain Education International For Private & Personal Use Only www.jainelibrary.org

३४ अ। रुक्मिवर्षधरे पञ्चमं कूटम्। ठाणा० ७२, २५।
बुद्धिकूटं-महापुण्डरीकद्रहसूरीकूटम्। जं० प्र० ३८०।
**बुद्धिगुणा-** । आव० ९६।
**बुद्धिमतीपरिसा-**स्वसमयपरसमयविशारदाः कुशलाः सा बुद्धिमतीपर्षद्। बृ० प्र० ६० आ।
**बुद्धिल-**बुद्धिं लातीति। ओघ० १९।
**बुद्धिल्ल-**बुद्धिं लातीति बुद्धिलः। ओघ० १६।
**बुद्धिविन्नाण-**मतिविशेषभूतोत्पत्तिक्यादिबुद्धिरूपपरिच्छेदः। भग० ५४१।
**बुद्धिसागर-**जिनेश्वरसूरेर्गुरुभ्राता। सम० १६०। ज्ञाता० २५४।
**बुद्धिसागराचार्य-**जिनेश्वरसूरेर्गुरुभ्राता। ठाणा० ५२७।
**बुद्धो-**चतुर्थवर्गे पञ्चममध्ययनम्। निरय० ३७। बृ० प्र० ५६ आ। अप्पणा बुद्धिसामत्थेण अ अत्थे उव्वेक्खइ सा। दश० चू० ५४। बुद्धिः बुद्धिसाफल्यकारणत्वात् अहिंसायाः सप्तदशं नाम। प्रश्न० ६६। बुद्धिः-परलोकप्रवणा मतिः। आव० ३४१। उत्त० १४५। बुद्धिः-उत्पत्तिक्यादिका। प्रश्न० १०७।
**बुद्धीय-**बुद्धया। ओघ० १६५।
**बुद्धेन** जीवादितत्त्वम्। सम० ५।
**बुध्नं-**पुष्पकम्। ओघ० ११७। अधः। ओघ० १६८। मूलम्। ठाणा० ४८०।
**बुध्यते-**ज्ञानदर्शनोपयोगाभ्यां च वस्तुतत्त्वमवगच्छति। उत्त० ५८६।
**बुब्बुय-**बुद्बुदः। ओघ० १३१।
**बुब्बुयवरिस-**यत्र वर्षे पतत्युदके बुद्बुदा भवन्ति स बुद्बुदवर्षः। आव० ७१३। जत्थ वासे पडमाणे उदगबुब्बुया भवंति तं बुब्बुयवरिसं। नि० चू० तृ० ६९ आ।
**बुयावइत्ता-**संभाष्य या प्रव्रज्या दीयते सा, गौतमेन कर्षकवत्। ठाणा० ११६।
**बुरधरयं-** । नि० चू० प्र० ६ आ।
**बुस-**यवादीनां कडङ्गरः। ठाणा० ४१६।
**बुसाग्नि-**बुससत्कोऽग्निः। जीवा० १२३।
**बुसिम-**संयमवान्। सूत्र० ३९३। चारित्रम्। सूत्र० २४३।
**बुसीमओ-**तीर्थकृतः सत्संयमवतो वा। सूत्र० १५५।
**बुह-**बुधः-अष्टाशीतौ महाग्रहे एकचत्वारिंशत्तमः। जं० प्र० ५३५। ठाणा० ७९।
**बूर-**बूरः-वनस्पतिविशेषः। जं० प्र० ३६। जीवा० १६२। प्रज्ञा० २१०। सूर्य० २९३। औप० ११। उत्त० ६५४। प्रज्ञा० ३६७। भग० ५४०। वनस्पतिविशेषावयवविशेषः। भग० १३४। वनस्पतिविशेषः। निरय० १। राज० ६। ज्ञाता० ६।
**बृंहणीय-**धातूपचयकारि। ठाणा० ३७५। धातूपचयकारित्वात्। जीवा० २७८।
**बृंहणीया-**बृंहतीति बृंहणीया धातूपचयकारित्वात्। जीवा० ३५१।
**बृंहयित्वा-**इदमेव प्रधानमिति ख्यापनेनोपबृंह्य। उत्त० ४७८।
**बृंहये-**भव्यजनप्ररूपणा वृद्धिं नयेः। उत्त० ३४१।
**बृहत्कुमारिका-** ठाणा० ५१२।
**बृहत्तपः-**तपोविशेषः। उत्त० ५९८।
**बेंति-**उक्तवन्तः। आव० १२७।
**बेआहिय-**द्व्याह्निकः ज्वरविशेषः भग० १६८।
**बेटी-**पुत्रः। नि० चू० (?)। पुत्रः। नि० चू० द्वि० ६१ आ।
**बेट्ठा-**उपविष्टः। ओघ० ११७। आव० १०२। उपविष्टः। बृ० द्वि० १३ आ।
**बेडिया-**नौः। बृ० तृ० १६० अ।
**बेण्णातड-**बेन्नातटं-नगरम्। आव० ३६०।
**बेण्णायडं-**बेन्नातटं-नगरविशेषः। आव० ६७१।
**बेन्ना-**आभीरविषये नदीविशेषः। आव० ४१२। योगद्वारविवरणे नदीविशेषः। पिण्ड० १४४।
**बेन्नातटं-**नगरविशेषः। नंदी० १५०, १५२।
**बेन्नायडं-**बेन्नायाः समीपे नगरम्। अनु० १४६। बेन्नातटम्। आव० ४१८।
**बेभेल-**विन्ध्यगिरिपादमूले सन्निवेशविशेषः। भग० १७१, ६६४।
**बोंड-**बोण्डं-फलम्। औप० १७। जीवा० २७३।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बोण्डं-फलम् । जं० प्र० ११३ ।
**बोंडज**-बोण्डजं-कर्पासीफलप्रभवं वस्त्रम् । ओप० ३७ ।
**बोंडसमुग्गय**-बोडं-कर्पासीफलं तस्य समुद्गकं-सम्पुटमभिन्नावस्थं कर्पासीफलमित्यर्थः । ज्ञाता० २३० ।
**बोंदि**-बोन्दिः-शरीरम् । जीवा० १६२ । प्रज्ञा० ८८ । प्रश्न० १२ ।
**बोंदिया**-बोन्दिका-शाखा । सूत्र० ३२४ ।
**बोंदी**-बोन्दिः-तनुः । शरीरम् । प्रज्ञा० १०८ । ओप० ५० । अनु० ११८ । अव्यक्तावयवं शरीरम् । भग० ७०२ । बोन्दी-तनुः । प्रज्ञा० १०८ । आव० १८५ ।
**बोक्कस**-बुक्कसः-वर्णान्तरभेदः, यो निषादेनाम्बष्ठ्यां जातः । उत्त० १८२ । अवान्तरजातीयः निषादेनाम्बष्ठ्यां जातः स । बोक्कसः । सूत्र० १७७ ।
**बोट**-नष्टः । बृ० प्र० ५४ आ ।
**बोटकुटो**-बृ० प्र० ५४ आ ।
**बोटी**-लाउनालो । नि० चू० प्र० १०६ अ ।
**बोटिकः**-प्रभूतविसंवादिनो दिगम्बरः । आव० ३२३ ।
**बोटिकपक्षपाती**-यद्युपकरणसहिता अपि निर्ग्रन्था उच्यन्ते एवं तर्हि गृहस्था अपि निर्ग्रन्थाः, यतस्तेऽप्युपकरणसहिता वर्तन्ते । ओघ० २१९ ।
**बोट्टिओ**-भ्रंशितः । नि० चू० द्वि० १०९ आ ।
**बोड**-बोडः-मुण्डः । पिण्ड० ७६ ।
**बोडकुड**-अनोष्ठकुटः । आव० १०१ ।
**बोडाविया**-मुण्डिता । आव० २२४ ।
**बोडिए**- । नि० चू० प्र० २६० आ ।
**बोडिगिणी**-बोटिका-ब्राह्मणी दैगम्बरः । आव० ६४० ।
**बोडिय**-मुण्डकः । आव० २०३ । बोटिकः-मुण्डमात्रः । चारित्रविकलतया मुण्डमात्रत्वम् । उत्त० १८१ । बोटिकः-दिगम्बरः । विशे० ४८३ । दिगम्बरमतः । नि० चू० तृ० ३५ अ ।
**बोण्ड**-वमनीफलम् । अनु० ३५ ।
**बोण्डजम्**- । उत्त० ५७१ ।
**बोद्द**-ग्रीमेयकः । उ० मा० गा० ४२८ ।
**बोद्ध**-मतविशेषः । आचा० ८२ ।
**बोद्धव्वं**-बोद्धव्यम् । उत्त० ९ ।
**बोद्धा**-अर्थधरः । ठाणा० १९७ ।
**बोधक**-जीवादितत्त्वमेवापरेषां बोधकः । सम० ५ ।
**बोधग**-बोधयत्यन्यानिति बोधकः । जीवा० २५६ ।
**बोधन**-मार्गभ्रष्टस्य मार्गस्थापनम् । सम० ११८ ।
**बोधनानुशासन**-बोधनं-प्रामन्त्रणं तत्पूर्वकमनुशासनं बोधनानुशासनम् । सम० ११८ ।
**बोधयति**-सम्यक्त्वं ग्राहयति-शिष्यीकरोति । ठाणा० ५०३ ।
**बोधि**-जिनधर्म्मः । ठाणा० ३२१ । सम्यग्बोधः-चारित्रम् । ठाणा० १२९ । सम्यग्दर्शनपर्यायत्वम् । भग० ७२५ । जिनधर्म्मः । ठाणा० ६० । प्रेत्य जिनधर्मावाप्तिः । उत्त० २९६, ७०८ । दर्शनं-सम्यक्त्वम् । ठाणा० ४६ ।
**बोधिणमंडव**-दुजोयणभंतरे गामघोसादि नत्थि । नि० चू० प्र० ९० अ ।
**बोधिता**- । नि० चू० प्र० १३४ अ ।
**बोधिद्रोणीम्**- । आचा० २४० ।
**बोन्दि**-शरीरम् । ठाणा० ४२१, २६५ ।
**बोन्दी**-महती । भग० १७५ ।
**बोप्प**-चोक्षो मूर्खः । बृ० प्र० ५९ अ ।
**बोर**-बदरं-बोरवृक्षफलम् । प्रज्ञा० ३६४ ।
**बोरी**-बदरी-कर्कन्धूः । अनुत्त० ४ ।
**बोल**-अव्यक्तवर्णो ध्वनिः । भग० ११५, ४६३ । ओप० ५७ । विपा० ३६ । कोलाहलः । जीवा० २४८ । बोलः-बहूनामार्त्तानामव्यक्ताक्षरध्वनिकः । जं० प्र० १२५ । बोलः-अव्यक्ताक्षरध्वनिसमूहः । भग० १६८ । वृन्दशब्दः । बृ० द्वि० १६ आ । वर्णव्यक्तिवर्जितो महाध्वनिः । भग० ११५ । वर्णव्यक्तिरहितो ध्वनिः । जं० प्र० २०० । आर्त्तानां बहूनां कलकलपूर्वको मेलापकः । जीवा० २८३ । रावः । आव० ६४० । मुखे हस्तं दत्वा महता शब्देन पूत्करणम् । सूर्य० २८१ । जं० प्र० ४६३ । जीवा० ३४६ । कोलाहलः । राज० २६ । अव्यक्तवर्णो ध्वनिः । राज० १२१ ।
**बोलकरणं**-रोलं कुर्वन्ति । ओघ० १०३ ।
**बोलण**-मज्जपानं । नि० चू० द्वि० ७० अ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बोलन**-निमज्जनम् । प्रश्न० २२ ।
**बोलावेउं**- । नि० चू० प्र० १६४ आ ।
**बोल्लं**-वृत्तान्तोल्लापम् । आव० ६५ ।
**बोल्लाविया**-आलापिता । आव० ३९५ ।
**बोल्लितं**-उक्तम् । आव० ८२१ ।
**बोल्लेति**-नि० चू० प्र० २१० आ ।
**बोह**-बोधः-हिताहितप्राप्तिपरिहारलक्षणः । सूत्र० ५४ ।
**बोहए**-बोधकः-परेषां जीवादितत्त्वस्य बोधयिता महावीरः। भग० ७ ।
**बोहि**-बोधिः-सम्यग्दर्शनम् । भग० २८९ । बोधिः-सम्यक्त्वकार्यम् । आव० ७६१ । बोधिः-भवान्तरे जिनधर्मप्राप्तिः । राज० ४७ ।
**बोहिगा**-मालवादिम्लेच्छा । नि० चू० तृ० ४३ अ ।
**बोहित्थ**-पोतः श्रावको वा । प्रश्न० ३६ । पोतः । आव० १२९ । ओघ० १८८ । आचा० १२४ ।
**बोहित्थस्थ**-पोतस्थः । आचा० १२४ ।
**बोहिद**-बोधिः-जिनप्रणीतधर्मप्राप्ति, तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनरूपां ददातीति बोधिदः । जीवा० २५६ ।
**बोहिय**-बोधितः उन्निद्रीकृतः । जीवा० २७१ । बोधिकः-स्तेनकः । आव० ७८४ । म्लेच्छः । व्य० प्र० १८५ । आ ।
**बोहिया**-बोधिकाः-मालवस्तेनाः । बृ० द्वि० १३४ अ ।
**बोहिलाभ**-बोधिलाभः-जिनप्रणीतधर्मप्राप्तिः । आव० ७८७ । प्रेत्य जिनधर्मप्राप्तिः । आव० ५०७ ।
**बोहिलाभवत्तिया**-बोधिलाभप्रत्ययं-बोधिलाभनिमित्तं प्रेत्य जिनप्रणीतधर्मप्राप्तिनिमित्तम् । आव० ७८६ ।
**बोही**-बोधिः-जिनधर्मप्राप्तिः । दश० १९० । बोधिः-प्रव्रज्या । पिण्ड० १०० । बोधिः-सर्वज्ञधर्मप्राप्तिः अहिंसारूपत्वाच्च तस्याः अहिंसा बोधिरुक्ता । अहिंसा-अनुकम्पा सा च बोधिकारणत्वाद्बोधिरेव वा । अहिंसायाः षोडशं नाम । प्रश्न० ९९ । बोधिः-जिनधर्मावाप्तिः औत्पत्तिक्यादिबुद्धिर्वा । भग० १०० । बोधिः-जिनप्रणीतधर्मप्राप्तिलक्षणा । उत्त० १८८ । जीनप्रणीतधर्मप्राप्तिः । जीवा० २५६ । बोधिः-धर्मावाप्तिः । प्रज्ञा० ३९९ । बोधिः-सामायिकम् । आव० ३४७ ।
बोधिः-सम्यग्दृष्टेः पर्यायः । विशे० ६४१ ।
**ब्रह्म**-योगद्वारविवरणे कृष्णाबेन्नानद्योरन्तराले द्वीपः । पिण्ड० १४४ ।
**ब्रह्मचर्य**-व्रतपरिपालनाय ज्ञानाभिवृद्धये कषायपरिपाकाय च गुरुकुलवासः । तत्त्वा० ९-६ । अस्वातंत्र्यं गुर्वधीनत्वं गुरुनिर्देशस्थायित्वम् । तत्वा० ९-६ ।
**ब्रह्मदत्त**-कम्पिलपुरे राया । नि० चू० प्र० ११३ आ । व्य० प्र० १९८ आ । आचा० ६५ । विशिष्टतपश्चरणफलवान् सूत्र० २९९ । जन्मान्तरभोगनिमित्तं तपः कारकः । दश० २५७ । सति सामर्थ्ये प्रासादादिकारयिता । उत्त० ३१२ । निदानशल्ये यस्य दृष्टान्तः । आव० ५७९ । द्वादशमचक्रवर्ती । ठाणा० ९९ । उत्त० ३१७ । बृ० प्र० ११० आ ।
**ब्रह्मदत्तकुमार**-द्वादशमचक्रवर्ती । नंदी० १६७ ।
**ब्रह्मदत्तचक्रवर्ती**- । सूत्र० ८७ ।
**ब्रह्मराक्षसाः**-राक्षसभेदविशेषः । प्रज्ञा० ७० ।
**ब्रह्मलोक**-देवलोकविशेषः । ठाणा० २१७, ४३२ ।
**ब्रह्मशाखा**-योगद्वारविवरणे साधुशाखाविशेषः । पिण्ड० १४४ ।
**ब्राह्मणी**-गोधिकाकारो जीवविशेषः । दश० २३० ।
**ब्राह्मयादिलिपी**-लिपिविशेषः । आव० २४ ।

## भ

**भंग**-भङ्गः-ब्रह्मव्रतस्य सर्वभङ्गः । प्रश्न० १३८ । प्रतिसेवना, विराधना, खलना, उपघातः, अशोधिः । ओघ० २२५ । भङ्गः-अन्तः, विनाशः । विशे० १३०७ । भङ्गः-वस्तुविकल्पः । अवधिभेदः । भग० ३४४ । क्रमस्थानभेदभिन्नाः । आव० ५९६ ।
**भंगसुहुम**-भङ्गा-भङ्गका वस्तुविकल्पाः तानि एव सूक्ष्मम् । ठाणा० ४७७, ४७८ ।
**भंगा**-अतसी । ठाणा० ३३८ ।
**भंगिए**-अतसीमयं वस्त्रं भाङ्गिकम् । बृ० द्वि० २०१ अ ।
**भंगिणहि**- । भग० ८०४ ।
**भंगित**-अतसी तन्मयं भाङ्गिकम् । ठाणा० ३३८ । अतसीमयम् । ठाणा० ११८ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भंगिय**–नानाभङ्गिकविकलेन्द्रियलालनिष्पन्नः । आचा० ३६३ । भङ्गी–भङ्गबहुलं श्रुतम् । नंदी० ५० ।

**भंगियसुय**–भङ्गिकश्रुतं–दृष्टिवादान्तर्गतमन्यद्वा । आव० ७७६ ।

**भंगी**–भङ्गी–वनस्पतिविशेषः । प्रज्ञा० ३६४ । भङ्गाः–जनपदविशेषः । प्रज्ञा० ५५ । साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।

**भंगीरए**–भङ्गीरजः–वनस्पतिविशेष रजः । प्रज्ञा० ३६४ ।

**भंगुर**–भङ्गुरा–भुग्ना । जं० प्र० १११ ।

**भंजगा**–भञ्जगा–वृक्षाः । आचा० २३४ ।

**भंजणं**–विद्धंसणं । नि० चू० प्र० २३० आ । भञ्जनं–आमर्दनम् । (?) ।

**भंजणा**–भञ्जना–विनाशः । आव० ५४५ ।

**भंजित्तए**–भङ्क्तुं सर्वतः । ज्ञाता० १३६ ।

**भंड**–भाण्डं–मृन्मयभाजनम् । भग० २३८, ३९९ । अनु० १५९ । आव० ४१४ । भाजनं मृन्मयम् । वस्त्राभरणादि । ठाणा० १२० । वस्त्रादिकं वस्तुपण्यं हिरण्यादि । ज्ञाता० ६१ । भग० ३६८ । भाण्डं–मृन्मयं पात्रम् । प्रश्न० १२४ । भाण्डं–भाजनं मृन्मयादि । भग० ९४ । आव० ६१ । अलङ्कारादिः । पिण्ड० १२० । भाण्डं आभरणम् । भग० ४६८ । मृन्मयम् । प्रश्न० १५६ । भाण्डं–भाजनम् । प्रश्न० ३६ । भाजनरूपम् । भग० ६२१ । भाण्डं–उपकरणम् । उत्त० ७११ । यानपात्रम् । आव० ८२४ । ओघ० १८८ ।

**भंडइ**–कलहयति । आव० ६५५ ।

**भंडओ**–भण्डकः । उत्त० १३६ ।

**भंडक**–कुप्यभेदः । आव० ८२६ । ओघ० १६९ ।

**भंडकरंडग**–भाण्डकरण्डकं–आभरणभाजनम् । भग० १२२ ।

**भंडग**–धर्मोपकरणम् । आचा० ३३३ । भण्डकं–भाण्डम् । आचा० ४७ । उपधिः । ओघ० २०७ ।

**भंडचालणं**–भाण्डचालनं–भाण्डादीनां–पीठरकादीनां पण्यादीनां वा तत्र गृहस्थस्थापितानां साध्वर्थं चालनं स्थानान्तरस्थापनम् । प्रश्न० १२७ ।

**भंडण**–कलहः । ओघ० १४८ । आव० ५१५ । आचा० १०६ । भण्डनं–कायिकम् । प्रश्न० ९७ । भण्डणं–कलहः परस्परं हस्तस्पर्शजनितः । ओघ० ९१ । भाण्डनं–क्लेशः भण्डयितुम् । आव० ७११ । कलहो । नि० चू० द्वि० १३ आ । कलहो, विवादो । नि० चू० तृ० ३५ अ ।

**भंडणसीलो**–भण्डनशीलः । उत्त० ३५५ ।

**भंडणाभिलासी**–भण्डनं पिष्टातकादिभिः । ज्ञाता० २२० ।

**भंडत**–कलहायमानः । आव० ३०५ । कलहयन् । आव० ३९७ । उत्त० १३६ ।

**भंडभारिए**–उपकरणेन गुरुः । आचा० ३७९ ।

**भंडमत्त**–भाण्डमात्रा–उपकरणपरिच्छदः । भग० १२२ । भाण्डमात्रः–उपकरणमात्रः । जं० प्र० १४८ । भाण्डमात्रः–उपकरणपरिच्छदः । सम० ११ । भाण्डमात्रा–प्रहरणकोशादिरूपा । भग० ३२२ । भाजनरूपःपरिच्छिदः । भग० ७५० । पणितपरिच्छदः । भग० ६७३ । गणिमादिद्रव्यरूपः परिच्छदः । भग० ९४ ।

**भंडमत्तोवगरण**–भाण्डमात्रोपकरणं–हारार्द्धहारकुण्डलादि । जीवा० ४०६ ।

**भंडमोल्ल**–भाण्डमूल्यम् । आव० ३५४ ।

**भंडय**–भाण्डकं–मुखवस्त्रिकाकल्पादि । उत्त० ५३६ । भाण्डकं–प्रावर्षाकल्पादि उपधिम् । उत्त० ५४० । भाण्डकं–उपकरणं रजोहरणदण्डकादि । उत्त० ५१७ । पतद्ग्रहाद्युपकरणम् । उत्त० ५३६ ।

**भंडवाल**–भाण्डपालः–परकीयानि भाण्डानि भाटकादिना पालयति । उत्त० ४९५ ।

**भंडवेआलिए**–भाण्डविचारः कर्मास्येति भाण्डवैचारिकः । अनु० १४९ ।

**भंडवेयालिया**–कर्मार्यभेदविशेषः । प्रज्ञा० ५६ ।

**भंडसाला**–पुव्वभायणातो अण्णम्मि भायणे संकामिजति भडसाला । नि० चू० द्वि० १४१ अ । घटकरकादिसंगोपनस्थानम् । बृ० द्वि० १७५ अ । जहिं भायणाणि संगोवियाणि अच्छंति । नि० चू० तृ० २१ आ ।

**भंडा**–गुच्छाविशेषः । प्रज्ञा० ३२ । लासगा । नि० चू० प्र० २७१ अ ।

**भंडागार**–जत्थ सोलसविहाइं रयणाइं । नि० चू० प्र० २७२ आ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भंडागारवती**-भाण्डागारपतिः । आव० ८२६ ।
**भंडागारा**-हिरण्णसुवण्णभायणं । नि० चू० प्र० २७२ आ ।
**भंडारा**-तुम्बाकविशेषः । प्रज्ञा० ५६ ।
**भंडालंकार**-भाण्डालङ्कारं, अलङ्कारभाण्डं, आभरणकरण्डकम् । जं० प्र० २१७ ।
**भंडिओ**-भण्डकः । उत्त० १३६ ।
**भंडिति**-भण्डकः । उत्त० १३६ ।
**भंडिय**-भण्डिकाः-स्थाल्यः । ठाणा० ४१६ । भग० ८०२ ।
**भंडिया**-पडिचरगा । नि० चू० द्वि० ११ अ । भण्डिकाः-रन्धनादिभाजनानि । भग० ६६४ ।
**भंडिवडेंसिए**-मथुरानगर्यामुद्यानम् । ज्ञाता० २५३ ।
**भंडी**-असती, कुलटा, गन्त्री । ओघ० १४२ । भण्डी-गन्त्री । प्रश्न० ३९ । आव० १९८, ३५८ । गण्डी । नि० चू० तृ० ३७ अ । गड्डी । नि० चू० प्र० १८७ अ । गन्त्री प्रथमः सार्थः । बहिलकाः करभीवेसरबलीवर्द-प्रभृतयः । बृ० द्वि० १२५ अ ।
**भंडीर**-भण्डीरं-मथुरायामुद्यानम् । विपा० ७० ।
**भंडीरजत्ताए**-नि० चू० द्वि० ७८ अ ।
**भंडीरमणजत्ता**-भंडीरमणयात्रा । आव० १९८ ।
**भंडीरवण**-चक्षुरिन्द्रियोदाहरणे मथुरायां चैत्यविशेषः । आव० ३९८ ।
**भंडीसुणए**-गन्त्रीश्वा । आव० २०० ।
**भंडु**-मुण्डनम् । आव० ६२६ । खुरो । नि० चू० द्वि० ३५ अ ।
**भंडुग्गा**-घणा जत्थ भिज्जंति तं । नि० चू० द्वि० ७० आ ।
**भंडोवक्खरं**-भाण्डोपस्करम् । आव० ८२९ ।
**भंडोवगरणं**-भाण्डोपकरणं-पात्रवस्त्रादिकम् । आव० ५७६ ।
**भंत**-भ्रमणं भ्रान्तं । इतश्चेतश्च गमनम् । दश० १४१ । भ्रान्तः-भग्नः । आचा० २५४ ।
**भंतसंभंत**-भ्रान्तो-भ्रमप्राप्तः स इव यत्राद्भुतचरित्रदर्शनेन पर्षज्जनः सम्भ्रान्तः-साश्चर्यो भवति तत् भ्रान्तसंभ्रान्तम् । जं० प्र० ४१८ । भ्रान्तसंभ्रान्तं-दिव्यनाट्यविधिः । जं० प्र० ४१२ ।
**भंते**-भदन्त ! वर्द्धमानस्वामिन् ! । प्रज्ञा० ५६२ । भयान्त ! वर्द्धमानस्वामिन् ! प्रज्ञा० ५६२ । भदन्त-भदन्तः-कल्याणस्य सुखस्य च हेतुत्वात् कल्याणः सुखश्चेति भजते-सेवते सिद्धान् सिद्धिमार्गं वा अथवा भज्यते-सेव्यते शिवार्थिभिरिति भजन्तः, भाति-दीप्यते भ्राजते वा-दीप्यते वा दीप्यत एव ज्ञानतपोगुणदीप्त्येति भान्तो भ्राजन्तो वेति । भ्रान्तः-अपेतो मिथ्यात्वादेः, तत्रानवस्थित इत्यर्थः, इति भ्रान्तः, भगवान्-ऐश्वर्ययुक्तः, भवस्य वा संसारस्य भयस्य वा-त्रासस्यान्तहेतुत्वाद् नाशकारणत्वाद् भवान्तो भयान्तो वा । ठाणा० १२३ । भदन्त ! गुरोरामन्त्रणं, ततश्च हे भदन्त ! कल्याणरूप ! सुखरूप इति वा 'भदि कल्याणे सुखे च' इति वचनात्, प्राकृतशैल्या वा भवस्य-संसारस्य भयस्य वा-भीतेरन्तहेतुत्वाद् भवान्तो भयान्तो वा तस्यामन्त्रणं हे भवान्त ! भयान्त ! वा, भानु वा ज्ञानादिभिर्दीप्यमानु ! 'भा दीप्ताविति' वचनात्, भ्राजमान् ! वा दीप्यमानु ! भ्रातृ दीप्ताविति वचनात् । भग० १४ । भन्ते-भदन्तः-आमन्त्रणं भजन्तः सेवत इति भान्तो भ्राजन्तः, भ्रान्तोः-भगवान्, भवान्तो, भयान्तो । विशे० १३०५, १३०६ । भवान्त ! । प्रज्ञा० ५६२ ।
**भंभसार**- । ज्ञाता० १८२ ।
**भभसारपुत्त**-भम्भसारपुत्रः-श्रेणिकराजसूनुः । ओप० १४ ।
**भंभासारसुत**-कूणिकः । जं० प्र० १४३ ।
**भंभा**-गुञ्जा । आचा० ७४ । भेरी । भग० ३०६ । जं० प्र० १६७ । भम्भा-ढक्का । भग० २१७ । ज्ञाता० २३२ । भंभा-ढक्का निःस्वानानीति सम्प्रदायः । जं० प्र० १०१ ।
**भंभाभूए**-भां भां इत्यस्य शब्दस्य दुःखार्तगवादिभिः करणं भंभोच्यते तद्भूतो यः स भंभाभूतः । भंभा वा-भेरी सा चान्तः शून्या ततो भंभेव यः कालो जनक्षयाच्छून्यः स भम्भाभूत उच्यते । भग० ३०६ । भाम्भां इत्यस्य दुःखार्त्तगवादिभिः करणं भम्भ उच्यते तद्भूतो यः स भम्भाभूत इत्युच्यते । भम्भा वा-भेरी सा चान्तःशून्या ततो भम्भेव यः कालो जनक्षयात्तच्छून्यः स



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भम्भाभूतः । जं० प्र० १६७ ।
**भंस**-भ्रंशः-अन्तर्द्धानम् । आव० ८२७ ।
**भंसणं**-भ्रंशनं-चलनम् । प्रश्न० १४१ ।
**भंसला**-उद्धतचेष्टा । कलहविशेषः । आव० ७३८ ।
**भंसुरुला**-जत्थ महे बहु राया । जत्थ महे बहुराया मिलंति। नि० चू० द्वि० ७१ आ । विसयपसिद्धा । नि० चू० तृ० ७१ आ ।
**भइए**-भृतकः-कियत्कालं मुल्येन धृतः । व्य० द्वि० ३३७ अ ।
**भइत्ता**-भुक्त्वा-सेवित्वा । उत्त० ४१५ ।
**भइय**-भृतिं करोति भृतिकः-कर्म्मकरः राज० २२ ।
**भइयव्वं**-भजनीयं-सेवनीयम् । ओघ० २१० । भक्तव्यं भर्त्तव्यं धारणीयम् । भग० ८५६ ।
**भइरथी**-भगीरथी-कूटलेखकरणे उदाहरणम् । आव० ८२२ ।
**भई**-भृतिः- कर्म्मकरादिदेयद्रव्यम् । बृ० प्र० १६४ आ ।
**भउडा**-अग्रभागः । उ० मा० गा० ४५० ।
**भए**-भयं-प्रत्यनीकेभ्यो यज्जातम् । आव० ६२६ ।
**भक्ख**-खरविशदमभ्यवहार्यं भक्षम् । पक्वान्नमात्रम् । उपा० ५ । भक्ष्यं-खण्डखाद्यम् । सूर्य० २९३ । भक्ष्यम् । ओघ० १५९ । भक्ष्यं-खरविशदमभ्यवहार्यम् । सूत्र० ३४३ । भक्ष्यं-खण्डखाद्यादि । ठाणा० ११८ । प्रश्न० १६३ । भग० ३२६ । भक्ष्यं-मोदकादि । प्रश्न० ८ ।
**भक्खराभा**-गोत्रविशेषः । ठाणा० ३९० ।
**भक्खेया**- । ज्ञाता० १०७ ।
**भत्तपरिन्न**-अभ्युद्युतमरणविशेषः । विशे० १० ।
**भत्तपरिन्ना**-भक्तस्य-भोजनस्य यावज्जीवं प्रत्याख्यानं यस्मिंस्तत्तथा, इदं च त्रिविधाहारस्य चतुर्विधाहारस्य वा नियमरूपं सप्रतिकर्म च । सम० ३४ । ठाणा० ३६४ । आहारपरित्यागरूपः । उत्त० ५८९ ।
**भक्तप्रत्याख्यानम्**- । उत्त० ६०२ ।
**भत्तयः**-विच्छित्तिविशेषाः । सम० १३९ ।
**भत्तव्य**-भर्त्तव्यं धारणीयम् । भग० ८५६ ।
**भगंदर**-भगन्दरः रोगविशेषः । जीवा० २८४ । भग० १६७ । जं० प्र० १२५ । ज्ञाता० १८१ । अधिट्ठाणे खतं किमियजालसम्पण्णं भवति । नि० चू० प्र० १८९ अ ।
**भगंदल**-भगन्दरः-पुतसंधौ व्रणविशेषः । बृ० द्वि० २५४ अ ।
**भग**-ऐश्वर्यं समग्रं रूपं-यशः श्रीः धर्म्मः प्रयत्नं च । प्रज्ञा० ४ । नंदी० १५ । समग्रैश्वर्यादिलक्षणः । नंदी० १५ । समग्रैश्वर्यादिः । प्रज्ञा० ४ । जीवा० २५५ ।
**भगन्दल**-भगन्दरः-रोगविशेषः । विपा० ४० ।
**भगवंत**-श्रुतैश्वर्यादियोगाद् भगवन्तः कषायादीनिति भगवन्तः । जीवा० ४ ।
**भगवं**-भगवत्-भट्टारकम् । प्रश्न० ११५ । भगवान्-आचार्यः । व्य० प्र० २२० अ ।
**भगवती**-व्याख्याप्रज्ञप्तिः-विवाहप्रज्ञप्तिः । भग० २ ।
**भगवतीवेत्ता**-प्रज्ञप्तिधरः । आव० ५३२ ।
**भगवा**-चरणा । नि० चू० तृ० ३१ अ ।
**भगवान्**-महात्मनः संज्ञा । व्य० प्र० १७३ अ ।
**भगसंठिए**-भगसंस्थितं-भरणीनक्षत्रस्य संस्थानः । सूर्य० १३० ।
**भग्ग**-भग्नः-सर्वथा नाशितः । आव० ७७९ । वात्यादिना कुब्जखञ्जत्वकरणेनासमर्थीभूतः । ज्ञाता० ११८ । भग्नः गोरूपादिभिर्विद्धंसनात् । व्य० द्वि० ११५ अ ।
**भग्गई**-क्षत्रियपरिव्राजकविशेषः । औप० ९१ ।
**भग्गकूवए**- । ज्ञाता० ७८ ।
**भग्गरुग्ग**-वाहनात् स्खलनाद्वा पतने भग्नः रुग्णश्च-जीर्णतां गतः । ज्ञाता० १९५ ।
**भग्गवणिया**-व्रणिताः संतो भग्ना भग्नव्रणिता । व्य० प्र० १८४ अ ।
**भग्गवेस**-भार्गवेशं-भरणीगोत्रम् । जं० प्र० ५०० ।
**भग्गवेससगोत्ते**-भरणीनक्षत्रस्य गोत्रनाम । सूर्य० १५० ।
**भग्गसंधिय**-भग्नाः-लोपिताः सन्धयः विप्रतिपत्तौ संस्था येन स भग्नसन्धिकः । प्रश्न० ४६ ।
**भग्गुज्जोय**-भग्नोद्योगः-अपगतोत्साहः । उत्त० ४६४ ।
**भग्गघरं**-जत्थ खंभतुला कुड्डादि किंचिपडितं तं भग्गघरं । नि० चू० तृ० ६६ अ ।
**भग्नगृह**-स्तंभतुलाकुड्यादिनामन्यतमत् किमपि पतितं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् । व्य० प्र० ६१ आ ।
भग्घय-भागिनेयः । बृ० द्वि० २३६ आ ।
भजना-विकल्पः । विशे० ८८६ । सेवना-परिभोगं । नि० चू० प्र० १२३ आ।
भज्जइ-भज्यते-विदलयति व्यपैति । भग० १०२ ।
भज्जण-भर्जनं-पाकविशेषकरणम् । प्रश्न० १४ । भ्राष्ट्रम् । आव० ६५१ । भर्जनम् । ओघ० १६४ ।
भज्जणयं-भर्जनकं कर्प्परं, धान्यपाकभाजनम् । विपा० ५८ ।
भज्जा-भ्रियते-पोष्यते भर्त्रेति भार्या । उत्त० ३८ ।
भज्जाणुराग-भार्यानुरागः पुरुषपुण्डरीकवासुदेवनिदान-कारणम् । आव० १६३ टी० ।
भज्जिं-प्रहेणकम् । बृ० द्वि० १६५ आ ।
भज्जिज्जमाण-भज्यमानं-पच्यमानम् । आचा० ३५२ ।
भज्जिम-भर्जनवती-भर्जनयोग्या । दश० २१६ ।
भज्जिमाओ-पचनयोग्या, भञ्जनयोग्या वा । आचा० ३६१ ।
भज्जिहिइ-विनङ्क्ष्यथ । उत्त० ८५ ।
भट्टगा-भद्रकाः कल्याणभागिनः । भद्रगाः-भद्रहस्तिगतयः । जं० प्र० ११८ ।
भट्टपुत्र-औदारिकः । ओघ० ६५ ।
भट्टरकथा-परस्परं भक्तादिविकथा करणम् । व्य० प्र० । ३०४ अ ।
भट्टा-धनस्स धूया । नि० चू० प्र० ३५९ आ ।
भट्टारग-भट्टारकः पूज्यः । आव० ६७७ (?) । भट्टारकः । आव० १९२ ।
भट्टि-भर्त्ता-पोषकः स्वामीत्यर्थः । ठाणा० ११८ ।
भट्टिणी-स्वामिनी सार्थवाहभार्या । आव० ३६८ ।
भट्टित्तं-भर्तृत्व-पोषकत्वम् । सम० ८६ । भग० १५४ । प्रज्ञा० ८६ । जं० प्र० ६३ ।
भट्टिदारए-भर्ता-स्वामी तस्य दारकः-पुत्रो भर्तृदारकः । प्रज्ञा० २५३ ।
भट्ट-भ्रष्टः च्युतः । बृ० प्र० १०२ आ । भ्रष्टं-वातोद्भूततया राजधान्या, दूरतः पलायितम् । जीवा० २४६ । भ्राष्ट्र-अम्बरीषम् । प्रश्न० १४ । भ्रष्टं-वातोद्भूततया योजनमात्राद्दूरतः क्षिप्तम् । जं० प्र० ३८१ । भ्रष्टः-अपेतः । आव० ५१६ ।
भट्ठि भ्राष्टया रजोरहिततया । ओघ० २९ ।
भट्ठी-भ्राष्टाः पांस्वादिवर्जिता भूमयः । जं० प्र० १६८ । भ्राष्टाः-पांस्वादिवर्जिता भूमयः । भग० ३०७ ।
भ्राष्टी-रजोरहिता वीथिः । ओघ० २९ ।
भड-भटः-शूरपुरुषः । अनु० १४३ । भटः । ओघ० ४९ । भटः-चारभटः, बलात्कारप्रवृत्तिः । औप० २ । भटः-सामान्यग्रामाधिपः । आव० ८१६ । भटः-शौर्यवान् । भग० ११५ । शूरः । भग० ४६३ । राजाज्ञादायी पुरुषः । भग० ५४४ । भटः-चारभटः । औप० २७ । भटः-राजपुरुषः । बृ० तृ० ४६ आ । भटः-शौर्य-वान् । राज० १२१ ।
भडखइया-भटः तथाविधबलोपदर्शनलब्धभोजनादेः खादिता आरभटवृत्तिलक्षणहेवाको वा । ठाणा० २७६ ।
भडगो-भडकः-चिलातदेशनिवासी म्लेच्छविशेषः । प्रश्न० १४ । प्रज्ञा० ५५ ।
भड्डु-क्षुरः । बृ० तृ० १०१ आ ।
भणिएल्लित-भणितपूर्वः । आव० ३४३ ।
भणित-भणितः । आव० २२३ ।
भणिती-भणितिः भाषा । ठाणा० ३९७ । अनु० १२३ ।
भणिय-भणितं-मन्मथोद्दीपिका विचित्रा भणितिः । सूर्य० २६४ । भाषितः । ज्ञाता० २१६ । भणितः-कृताव्यक्त-वचनः । प्रश्न० २० ।
भणियाइओ-भणितवान् । आव० १६२, ३१२ ।
भण्ड-भाण्डं-पण्यं भाजनं वा । उपा० ४१ ।
भण्डनं-दण्डादिभिर्युद्धम् । भग० ५७१ ।
भति-भृतिः-कार्षापणादिका । औप० १४ ।
भती-भयगाणं कम्मकरणं । नि० चू० द्वि० १४३ अ ।
भक्तिः-विच्छित्तिः । जीवा० १६६ ।
भतीय-गोपालकः तुर्यांशादिरूपा परिभाषिता वृत्तिर्वा । बृ० द्वि० १११ अ ।
भतीया-भृतिका कर्म्मकरी । व्य० प्र० १९५ अ ।
भत्त-भक्तः-भज सेवायां' इत्यस्य निष्ठान्तस्य भवति । दश० ७२ । भक्तं-ओदनम् । विशे० ५७४ । भक्तं-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोजनम् । अनु० १५४ । अशनं-ओदनादि । आव० ८१६ । अशनं-अन्नम् । ओघ० ११ ।

**भत्तकरण**-भक्तकरणं-ओदनादिरन्धनम् । आचा० ५० ।

**भत्तकहा**-भक्तकथा-ओदनादीनां प्रशंसनं द्वेषणं वा । आव० ५८१ । भक्तस्य-भोजनस्य कथा भक्तकथा । ठाणा० २०६ । भक्तकथा-सुन्दाः शाल्योदन इत्यादिका । दश० ११४ ।

**भत्तघरे**- । भग० ६८७ ।

**भत्तट्ठ**-भक्तार्थः-उदरपूरणमात्रम् । ओघ० ८६ ।

**भत्तट्ठणं**-भोजनम् । बृ० तृ० १८ अ ।

**भत्तट्ठिअ**-भुक्त्वा । ओघ० ८७ । बहिरेव भुक्ताः । ओघ० ७६ ।

**भत्तट्ठिया**-भक्तार्थिका-भुक्ता । ओघ० १६६ ।

**भत्तपच्चक्खाइया**-प्रत्याख्यातभक्ता । आव० ३६३ ।

**भत्तपच्चक्खाण**-भक्तप्रत्याख्यानम् । आव० ११६ । भक्तं-भोजनं तस्यैव न चेष्टाया अपि पादपोपगमन इव प्रत्याख्यानं वर्जनं यस्मिंस्तदभक्तप्रत्याख्यानम् । ठाणा० ६४ ।

**भत्तपच्चक्खाणमरण**-भक्तस्य-भोजनस्य यावज्जीवं प्रत्याख्यानं यस्मिंस्तत्तथा, इदं च त्रिविधाहारस्य चतुर्विधाहारस्य वा-नियमरूपं सप्रतिकर्मं च भक्तपरिज्ञया मरणम् । सम० ३३ ।

**भत्तपच्चक्खाय**-प्रत्याख्यातभक्तः । आव० ६३८ ।

**भत्तपरिणा**-भक्तप्रत्याख्यानम् । ओघ० २२७ । भक्तपरिज्ञा प्रत्याख्यानवाची । व्य० प्र० १४३ आ ।

**भत्तपरिण्णा**-भक्तपरिज्ञा । आव० ५६३ । भक्तपरिज्ञामरणं-मरणस्य पञ्चदशो भेदः । उत्त० २३० । भक्तपरिज्ञा-अनशनविधिः । भग० १६६ ।

**भत्तपरिन्ना**-भक्तपरिज्ञा-त्रिविधचतुर्विधाहारविनिवृत्तिरूपा । दश० २७ । भक्तस्य परिज्ञा-भक्तपरिज्ञा-अनशनम् । आचा० २६१ ।

**भत्तपरिव्वय**-भक्तपरिव्ययः । दश० १०७ ।

**भत्तपाणपडियाइक्खिय**-प्रत्याख्यातभक्तपानः । भग० १२७ ।

**भत्तपाणवुच्छेए**-भक्तपानव्युच्छेदः अशनपाननिरोधः । भक्तं-प्रशनमोदनादि पानं-पेयमुदकादि तस्य च व्यवच्छेदः-निरोधोऽदानमित्यर्थः । आव० ८१८ ।

**भत्तपाणसंकिलेस**-भक्तपानाश्रितः सङ्क्लेशो भक्तपानसङ्क्लेशः । ठाणा० ४८६ ।

**भत्तपाणोयरया**-भक्तपानोदरता-आत्मीयाहारादिपरित्यागवतो वेदितव्या । दश० २७ ।

**भत्तवेला**-भक्तवेला-भोजनसमयः । दश० १०८ ।

**भत्तामासे**- । नि० चू० प्र० १३५ आ ।

**भत्ति**-भावप्रतिबन्धः । ओघ० ६८ । बाह्या परिशुष्टिः । भग० ६२५ । भृति-मूल्यम् । व्य० प्र० २२७ अ । भक्तिः-अञ्जलिप्रग्रहादिका । उत्त० ५७९ । भक्तिः-विच्छित्तिः । राज० २८ । भक्तिः-विच्छित्तिः । भग० १४५ ।

**भत्तिगिहं**-भक्तिगृहम् । जीवा० २६६ ।

**भत्तिचेइयं**-भक्तिचैत्यं-भक्त्या मनुष्यैः पूजा वन्दनाद्यर्थं कृतं कारितं तद्भक्तिचैत्यम् । व्य० प्र० २७६ आ ।

**भत्तिज्जओ**-भ्रातृव्यः । आव० ८२४ ।

**भत्तिमं**-भक्तिमन्तं-अन्तःप्रतिबन्धोपेतम् । बृ० प्र० २४९ आ ।

**भत्तिराग**-भक्तिरागः-भक्तिपूर्वकोऽनुरागः । राज० २७ ।

**भत्ती**-भक्तिः-विच्छित्तिविशेषः । जीवा० १७१ । सूर्य० २६३ । प्रज्ञा० ६६ । भक्तिः-अन्तःकरणप्रणिधानलक्षणा । आव० ५०६ । भक्तिः-विच्छित्तिः । जीवा० १६६, २०६, ३७९ । जं० प्र० २९२ । भग० ४७७ । ज्ञाता० ४२ । भक्तिः-अभ्युत्थानादिरूपा । उत्त० १७ । भक्तिः-उचितोपचाररूपा । दश० २४२ । भक्तिः नाम गुरुणामितिकर्तव्यतायां निषद्यारचनादिकायां बाह्या प्रवृत्तिः । बृ० प्र० १३३ आ ।

**भत्तीए**-भाडएणं । नि० चू० तृ० ६३ अ ।

**भत्तीण**-भक्तयो-विच्छित्तयः । विशे० ६९७ ।

**भत्तुव्वायपडिओ**- । आचा० ४२४ ।

**भत्था**-निपातः कुत्सार्थे । बृ० तृ० २६ आ । ध्मानखल्ला । भग० ६९७ ।

**भदंत**-भदन्त ! गुरोरामन्त्रणम्, भदन्त ! भवान्त ! भयान्त ! । दश० १४४ ।

**भद्द**-भाति भदन्ते वा भद्रः-कल्याणावहः । उत्त० ६२ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भद्रः-जितशत्रुराजकुमारः । उत्त० १२२ । सम० १५४ । ठाणा० ४५३ । भद्रकः-साधूनां मध्ये भद्रप्रकृतिकः । ओघ० ४७ । भद्रः-तृतीयबलदेवः । आव० १५९ । महाशुक्रकल्पे देवविमानम् । सम० ३२ । भद्रं-अतिप्रशस्यम् । जीवा० १६४ । द्वितीयचक्रवर्त्तिनः स्त्रीरत्ननाम । सम० १५२ । साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ । भद्रं-शरासनं मूढक इति । भग० ५४७ । द्वितीयवर्गे तृतीयमध्ययनम् । निरय० १९ । वाणारसीनगर्यां सार्थवाहः । निरय० २९ । भद्रं-अनुत्कटरागद्वेषः । व्य० प्र० १३४ अ । भद्रा-अचलबलदेवमाता । आव० १६२ ।

**भद्दए**-भद्रकः परोपकरणशीलः अनुपतापको वा । औप० ८८ । भद्रकः-अनुपतापको गुरुशिक्षागुणात् । भग० ८१ । भाति शोभते स्वगुणैर्ददाति च प्रेरयितुश्चित्तनिर्वृत्तिमिति भद्रः, स एव भद्रकः । उत्त० ४९ । मधुरत्वान्मनोहरः । भग० ३२६ । अनुकूलवृत्तिः । ज्ञाता० ७७ ।

**भद्दओ**-ऋजुः । बृ० तृ० ८ अ ।

**भद्दकन्नया**-भद्रकन्यका-भद्रस्वभावा कन्यका । उत्त० १२९।

**भद्दगडिया**-ओपोम्हणट्ठा घट्टं । नि० चू० प्र० ३५९ अ ।

**भद्दग**-भद्रकं घृतपूर्णादि । दश० १८७ । भद्रकः-संविग्नभावितः । ओघ० ५६ ।

**भद्दगुत्त**-भद्रगुप्तः । उत्त० ९६ । भद्रगुप्तः आचार्यः । आव० २९२ । भद्रगुप्तः स्थविरः । आव० ३०२ ।

**भद्ददारु**-भद्रदारुः-देवदारुः । उत्त० १४२ ।

**भद्दनंदी**-विपाकदशानां द्वितीयश्रुतस्कन्धे द्वितीयाऽष्टमेऽध्ययने भद्रनन्दिः । विपा० ८९ । भद्रनन्दिः-अर्जुनराजकुमारः । विपा० ९५ । भद्रनन्दिः धनावहराजकुमारः । विपा० ९४ ।

**भद्दपडिमा**-भद्रप्रतिमा-यस्यां पूर्वदक्षिणापरोत्तराभिमुखः कायोत्सर्गं करोति । औप० ३० ।

**भद्दबाहु**-णिज्जुत्तिकारगा । नि० चू० द्वि० ९५ आ । भद्रबाहुः-चतुर्दशपूर्वी आचार्यः । आव० ६९७ । भद्रबाहुः-आचार्यविशेषः । उत्त० ८९ । भद्रबाहुः-निर्युक्तिकृदाचार्यः । आव० ७५० । भद्रबाहुः-त्रिवर्षप्रमाणास्थापनामर्यादाकारकः । व्य० द्वि० २८ अ । नि० चू० द्वि० १३४ आ । १४८ आ ६६ आ । णिज्जुत्ती कारगा । नि० चू० तृ० १२२ आ । नि० चू० द्वि० ४२ अ । कया णिज्जुत्ती गाहा । नि० चू० तृ० ११४ अ । नि० चू० प्र० ४८ आ ।

**भद्दबाहुसामी**-नि० चू० द्वि० ११८ अ ।

**भद्दमुच्छणं**- । भग० ८०४ ।

**भद्दमुत्था**-भद्रमुस्ताः-अनन्तकायभेदः । भग० ३०० ।

**भद्दय**-भद्रकः-सकलतत्क्षेत्रोचितकल्याणभागी । जीवा० २७८ । मनोज्ञः । ज्ञाता० २३४ । मनोज्ञः-अपरानुपतापहेतुकायवाङ्मनश्चेष्टा । जीवा० २७७ ।

**भद्दवति**-भद्रवती-प्रद्योतराज्ञो हस्तिनी । आव० ६७४ ।

**भद्दवया**-नक्षत्रविशेषः । ठाणा० ७७ ।

**भद्दसाल**-भद्राः-सद्भूमिजातत्वेन सरलाः शालाः साला वा तरुशाखा यस्मिन् तत् भद्रशालं, भद्रसालं, भद्राः शाला-वृक्षा यत्र तद्वा । जं० प्र० ३६३ । वनविशेषः । ज्ञाता० ११८ ।

**भद्दसालवण**-भद्राः सद्भूमिजातत्वेन सरलाः शालाः साला वा तरु शाखा यस्मिन् तत् भद्रशालं भद्रसालं वा, अथवा भद्राः शाला-वृक्षा यत्र तद् भद्रशालं तच्च वनं च । जं० प्र० ३५९ । भद्रशालवनं-मेरुप्रथमवनम् । जं० प्र० ३०८ ।

**भद्दसालवणा**- । ठाणा० ८० ।

**भद्दसेण**-भद्रसेनः-संवरोदाहरणे वाराणस्यां जीर्णश्रेष्ठी । आव० ७१३ । भद्रसेनः-धरणेन्द्रस्य पादत्राणीकाधिपतिः देवः । जं० प्र० ४०७ । ठाणा० ३०२ ।

**भद्दा**-भद्रा-धिग्जातीयस्त्रीविशेषः । आव० ३६९ । भद्रा-पश्चिमरुचकवास्तव्या दिक्कुमारी । आव० १२२ । भद्रा-कौशलिकराजदुहिता । उत्त० ३५६ । भद्रा-मगधाविषये गुर्बरग्रामे पुष्पशालगाथापतेर्भार्या । आव० ३५५ । भद्रा-पाश्चात्यरुचकवास्तव्या सप्तमी दिक्कुमारी महत्तरिका । जं० प्र० ३९१ । भद्रा-पश्चिमदिग्भाव्यञ्जनस्य पूर्वस्यां पुष्करिणी । जीवा० ३६४ । भद्रा-धर्माऽभिमुखी । पिण्ड० १२२ । अनुत्त० ८ । भद्रा-अन्तकृद्दशानां सप्तमवर्गस्य नवममध्ययनम् । अन्त० २५ । राजगृहे धन्यसार्थवाहस्य भार्या । ज्ञाता० ७९, २३५ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भद्रा-काकन्दीनगर्यां सार्थवाही । अनुत्त० ३८। भद्रा-प्रतिमाविशेषः । ठाणा० २९२ । चम्पानगर्यां माकन्दीसार्थवाहस्य भार्या । ज्ञाता० १५६ । भद्रा-तगरानगर्यां दत्तभार्या । उत्त० ६० । भद्रा-मङ्खलीभार्या । आव० १९९ । भद्रा-दक्षिणदिग्भाव्यञ्जनस्य पूर्वस्यां पुष्करिणी । ठाणा० २३० । भद्रा-चित्रसेनकसुता । ब्रह्मदत्तराज्ञी । उत्त० ३७९ । भद्रा-मघवमाता । आव० १६१ । भद्रा-रिपुप्रतिशत्रुराज्ञी । आव० १७४। भद्रा-प्रतिमाविशेषः । आव० २१५ । भद्रा-भदन्ते कल्याणीकरोति देहिनमिति भद्रा । अहिंसायाः पञ्चविंशतितमं नाम । प्रश्न० ९९ । भद्रा-राजगृहनगरे धनावहप्रधानस्य पत्नी । आव० ३५३ । वग्गुरश्रेष्ठिभार्या । जानुकूर्परमाता । आव० २१० । ठाणा० ४५८ । भग० ६८८ । मंखलीभार्या । भग० ६६० । भद्रा-तेतलिपुरे कलादो नाम्ना मूषिकारदारकस्तस्य भार्या । ज्ञाता० १८४ । चम्पानगर्यां सागरदत्तसार्थवाहस्य भार्या । ज्ञाता० २०० । चंपानगर्यां जिनदत्तसार्थवाहस्य भार्या । ज्ञाता०२०० । भद्रा-श्रोत्रेन्द्रियोदाहरणे सार्थवाहभार्या,या श्रोत्रेन्द्रियवशान्मृता। आव० ३९८ । प्रथमबलदेवमाता । तृतीयचक्रवर्त्तिमाता । सम० १५२ । भद्रा-कामदेवगाथापतेर्भार्या । उपा० १९। धनस्स भारिया । नि० चू० प्र० ३५१ आ । अन्तकृद्दशानां षष्ठवर्गस्य नवममध्ययनम् । अन्त० २५ । सुभद्रसार्थवाहपत्नी । विपा० ६५ ।

**भद्दासणं**-भद्रासनं यस्याधो भागे पीठिकाबन्धः, सिंहासनम् । जीवा० २०० । ज्ञाता० १९ । भद्रासनं-सिंहासनम् । प्रश्न० ७० । भद्रासनं-अष्टमङ्गलगतः एकमङ्गलः । जं० प्र० ४१९ । भद्रासनं-येषामधोभागे पीठिकाबन्धः । जं० प्र० ४५ ।

**भद्दिया**-भद्रिका-नगरीविशेषः । आव० २०९ । भद्रिका-आव० ३५० ।

**भद्दियायरिय**-भद्रिकाचार्यः । दश० ७ ।

**भद्दिलनयरी**-भद्रिकानगरी-भगवतः षष्ठवर्षारात्रस्थानं । आव० २०७ ।

**भद्दिलपुर**-भद्रिकानगरी-मलयजनपदे आर्यक्षेत्रम् । प्रज्ञा० ५५ । जितशत्रुराजधानी श्रीवनोद्याने नगरम् । अन्त० ४ । भद्रिकानगरी-शीतलनाथजन्मभूमिः । आव० १६० ।

**भद्दिला**-भद्रिला-सुधर्ममाता । आव० २५५ ।

**भद्दुत्तरपडिमा**-प्रतिमाविशेषः । ठाणा० २९२ ।

**भद्दुत्तरवडिंसग**-महाशुक्रकल्पे देवविमानविशेषः । सम० ३२ ।

**भद्दे**-भद्रकः । ओघ० ४७ ।

**भद्दोत्तरपडिमा**-भद्रोत्तरप्रतिमा-भिक्षुप्रतिमाविशेषः । अन्त ३० ।

**भद्र**-वनप्रचारः-धीरत्वादिगुणयुक्तत्वात् । ठाणा० २०९ । निर्वाणलक्षणम् । ठाणा० ४४३ ।

**भद्रक**- । आचा० २८१ ।

**भद्रकमहिषः**- । (?) ।

**भद्रजातीय** प्रधानः । जं० प्र० ११० । जीवा० २७० ।

**भद्रबाहु**-आचार्यविशेषः । व्य० द्वि० १७७ अ । निर्युक्तिकारकाः । नि० चू० प्र० २२२ अ । निर्युक्तिकारकः-चतुर्दशपूर्वधरः । विशे० ११ । प्राचीनगोत्रः । (?) ।

**भद्रबाहुस्वामी**-युगप्रधानः ।,विशे० ६१४ ।

**भद्रमुस्ता**-वनस्पतिकायिकभेदः । जीवा० २७ ।

**भद्रवती**-वापीनाम । जं० प्र० ३७० ।

**भद्रशाल**-मेरुसंबंधीवनविशेषः । प्रश्न० १३५ ।

**भद्रशालवन**- । ठाणा० ७४ ।

**भद्रा**-पूर्वादिदिक्चतुष्टये प्रत्येकं प्रहरचतुष्टयकायोत्सर्गकरणरूपा अहोरात्रद्वयमाना प्रतिमा । ठाणा० ६५ । पूर्वादिक्चतुष्टयाभिमुखस्य प्रत्येकं प्रहरचतुष्टयमानः कायोत्सर्गं, अहोरात्रद्वयेन चास्याः समाप्तिः । ठाणा० १९५ । वापीनाम । जं० प्र० ३७० । जितशत्रुराजपत्नी । आव० १७७ ।

**भद्रावती**-वापीनाम । जं० प्र० ३७० ।

**भद्रिल**-सङ्कुलग्रामनिकटे ग्रामविशेषः । पिण्ड० ६३ ।

**भद्रोत्तरा**-वापीनाम । जं० प्र० ३७० ।

**भमइ**-भ्रमति संचरति । (?) ।

**भमर**-भ्राम्यति निरन्तरमिति भ्रमरः । बृ० प्र० ४९ आ । भ्रमरः-चतुरिन्द्रियजीवभेदः । उत्त० ६९६ । भ्रमरः-चञ्चरिकः । प्रज्ञा० ३६० । भ्रमरः-चतुरिन्द्रियजन्तुविशेषः । जीवा० ३२ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भमरकुल**-भ्रमरकुलं-मधुकरनिकरः । ज्ञाता० २२२ ।
**भमरा**-चतुरिन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ । रोमावर्त्ताः । ज्ञाता० १६ ।
**भमरावली**-भ्रमरावलिः-भ्रमरपङ्क्तिः । प्रज्ञा० ३६० ।
**भमली**-भ्रमली-आकस्मिकी शरीरभ्रमिलक्षणा । आव० ७७९ ।
**भमाड**-भ्रमणम् । परिरयः । ओघ० २० ।
**भमाडय**-परिरयः । ओघ० ५९ ।
**भमाडिज्जइ**-भ्राम्यते । आव० २१७ ।
**भमाडिज्जासि**-भ्रामयेः । आव० ३१९ ।
**भमाडेइ**-प्रदक्षिणयति । आर्द्रयति । आव० ६२४ ।
**भमास**-तृणविशेषः । भग० ८०२ ।
**भमुहा**-भ्रूः । आव० ३०९ ।
**भयंकर**-भयङ्करः प्राणवधस्य त्रयोविंशतितमः पर्यायः । प्रश्न० ६ ।
**भयंत**-यद् भजमानं वन्दते तत् भजमानम्, कृतिकर्मणि द्वादशम दोषः । आव० ५४४ । भदन्तः-कल्याणी । ओप० ८१ । भदन्तः-कल्याणः सुखश्च । आव० ४७२ । भवस्य-संसारस्यान्तः क्रियते येनाचार्येण स भवान्तः । आव० ४७२ । भयं-त्रासः तमाचार्यं प्राप्य भयस्यान्तो भवतीति भयान्तो-गुरुः । आव० ४७२ ।
**भयंतमित्त**-भदन्तमित्रः, तच्चनिकविशेषः । आव० ७१२ ।
**भयंता**-भक्ता-अनुष्ठानविशेषस्य सेवयिता भयत्राता वा । ओप० १०७ । भक्ता-निर्ग्रन्थप्रवचनस्य सेवयिता । ओप० ८१ ।
**भयंतार**-भवन्तः-पूज्याः । आचा० ३३५ । भयस्य त्रातारः । सूत्र० २७१ । भगवन्तः-साधवः । आचा० ३५८, ३६६ ।
**भय**-मोहनीयप्रकृतिसमुत्थ आत्मपरिणामः । ठाणा० ३८९ । दुःखम् । उत्त० ३१८ । प्रज्ञा० ८१ । परेषां भयोत्पादनम् । प्रश्न० ३० । भेदो । नि० चू० प्र० ७५ अ । अपायोद्वेगित्वं संकत्ति । नि० चू० प्र० ९९ अ । नि० चू० प्र० २६३ अ । भयं-आकस्मिकम् । जं० प्र० १४३ । भीतिः नृपचौरादिभ्यः । ठाणा० ४८४ । भीतिमात्रम् । ज्ञाता० ३६ । सिंहादिभयः । भग० ६११ । भयं-इहलोकादिभेदात्सप्तप्रकारम् । प्रज्ञा० ३ । भयात् यद्दानं तत् भयदानं, भयनिमित्तत्वाद्वा दानमपि भयमुपचारादिति । ठाणा० ४९६ ।
**भयए**-भृतकः-कर्मकरः । पिण्ड० ११०, १६२ । भृतकः-वेतनेनोदकाद्यानयनविधायी । सूत्र० ३३१ ।
**भयक**-भृतकः-भक्तदानादिना पोषितः । प्रश्न० ३८ ।
**भयकम्म**-यदुदयेन भयवर्जितस्यापि जीवस्येहलोकादिसप्तप्रकारं भयमुत्पद्यते तत् । ठाणा० ४६९ ।
**भयग**-भृतकः-कर्म्मकरः । प्रश्न० ९१ । उत्त० २२५ । भ्रियते-पोष्यते स्मेति भृतः स एवानुकम्पितो भृतकः-कर्म्मकरः । ठाणा० २०३ । भृतको-नियतकालमवधिं कृत्वा वेतनेन कर्मकरणाय धृतः दुष्कालादौ निश्रितो वा । जं० प्र० १२२ ।
**भयगत्ता**-भृतकता-दुष्कालादौ पोषितता । भग० ५८१ ।
**भयण**-भज्यते सर्वत्रात्मा प्रह्वीक्रियते येन स भजनः-लोभः । सूत्र० १८० ।
**भयणा**-भजना-विकल्पना । ओघ० २३, ८५ । भजना-प्ररूपणाविशेषः । आव० ३८१ । भजना-विकल्पना । ओघ० २३ । आव० ३३५ । पिण्ड० १४९ । भजना-सेवना समर्थना च । आव० ३३९ ।
**भयणिस्सिया**-भयनिःसृता-यत्तस्करादिभयेनासमञ्जसभाषणम् । प्रज्ञा० २५६ । भयनिसृता-मृषाभाषाभेदः । दश० २०९ ।
**भयन्तारो**-भवतारो-निर्ग्रन्थप्रवचनसेवका भदन्ता वा-भट्टारका भयत्रातारो वा । उपा० २९ ।
**भयभेरव**-भैरवभया-अत्यन्तरौद्रभयजनकाः शब्दाः । दश० २६७ । प्राकृतत्वात्पदव्यत्यये भैरवभयं-भयङ्करभयम् । जं० प्र० १४३ । भयेन भैरवाः-अत्यन्तसाध्वसोत्पादका भयभैरवाः । उत्त० ४१९ ।
**भयमाण**-भज्यमानं-सेव्यमानम् । ज्ञाता० २३४ ।
**भयमाणा**-भयमानाः रात्रिजागरणात्तदुपासनां विदधानाः । ठाणा० ३५३ ।
**भयमोहणिज्ज**-यदुदयवशात् सनिमित्तमनिमित्तं वा तथारूपस्वसङ्कल्पतो बिभेति तद् भयमोहनीयम् । प्रज्ञा० ४६९ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भयवं**-भगवान् माहात्म्यवान् । उत्त० ४८३ । भगो-बुद्धिर्यस्यास्तीति भगवान् । उत्त० ३०६ । धैर्यवान् श्रुतवान् वा । उत्त० ३०७ ।

**भयसञ्ज्ञा**-भयवेदनीयोदयजनितत्रासपरिणामरूपा । जीवा १५ ।

**भयसन्ना**-भयवेदनीयोदयाद् भयोद्भ्रान्तस्य दृष्टिवदनविकाररोमाञ्चोद्भेदादिक्रिया सा भयसञ्ज्ञा । प्रज्ञा० २२२ ।

**भयसा**-यद् भयेन वन्दते तद् । कृति कर्मणि एकादशो दोषः । माभूद् गच्छादिभ्यो निर्द्धाटनमिति । आव०५४४ ।

**भयसूत्रं**- । बृ० प्र० २०१ आ ।

**भयाणि**-राजविड्वरादिजनितानि भयानि । उत्त० ४५६ ।

**भयाणिया**-भयमानीतं यया सा भयानीता, अथवा भयं-भयहेतुत्वादनीकं-तत्परिवारभूतमुल्कास्फुलिङ्गादिसैन्यं यस्याः सा भयनीका । भग० १७५ ।

**भयानकः**-भयजनकसङ्ग्रामादिवस्तुदर्शनादिप्रभवो भयानको रसः । अनु० १३५ ।

**भयाली**-जम्बूद्वीपस्य भरतक्षेत्रे आगामिन्यां चतुर्विंशिकायां अष्टादशमतीर्थंकरस्य पूर्वभवनाम । सम० १५४ ।

**भयालु**-भयबहुला । बृ० द्वि० २३ आ ।

**भर**-भरः-क्षेत्राद्याश्रितराजदेयद्रव्यप्राचुर्यम् । विपा० ३९ । विनयकरणलक्षणो आचारः । विशे० ६३६ । भरः-बाढम् । नंदी० १५३ । भारः । उत्त० ५८१ ।

**भरए**-भरकः । पिण्ड० १५४ । ओघ० १५९ । भरतः-प्रज्ञा० ३०८ ।

**भरगा**-स्वगा । नि० चू० द्वि० १६७ अ ।

**भरणी**-नक्षत्रविशेषः । ठाणा० ७७ । ज्ञाता० १५४ । सूर्य० १३० ।

**भरत**-प्रमाणाङ्गुलैर्दृष्टान्तः । विशे० २०२ । बृ० प्र० २७६ आ । नटविशेषः । बृ० प्र० १०६ आ । कर्मभूमिविशेषः । प्रश्न० ९६ । वर्षविशेषः । प्रज्ञा० ७३ । उत्त० ५०४ । भग० ३०५ । उत्त० ६२४ । अधर्मकारिनिग्रहकृत्राजा । अनमत्पार्थिवनमयिता । उत्त० ३१३ । चक्रवर्ती मूर्च्छारहितत्वे दृष्टान्तः । प्रज्ञा० २० । नंदी० २१८ । नटविशेषः । नंदी० १४५ । रामस्य मात्रान्तरसंबन्धी भ्राता । प्रश्न० ८७ । भग० ५८६ । त्यागनिरूपणे भरतः । दश० ९३ । चक्रवर्ती । आव० ५८५ । चक्रवर्ती । आचा० ८ ।

**भरतचक्रवर्ति**-प्रथमश्चक्रवर्त्ती । बृ० प्र० ११० आ ।

**भरतचक्रवर्ती**-सामायिकप्रतिपत्तौ दृष्टान्तः । विशे० १०९४ ।

**भरतादयः**-पूर्वापरव्यवहारी । नंदी० २१८ ।

**भरद्दाओ**-भारद्वाजः ब्राह्मणः, अग्निभूतिजीवः । आव० १७२ ।

**भरनित्थरणसमत्थो**-अतिगुरुकार्यं दुर्निर्वहत्वाद्भर इव भरस्तन्निस्तरणे समर्थः भरनिस्तरणसमर्थः । आव० ४२३ ।

**भरवह**-भारवहा-पोट्टलिकावाहिका । बृ० द्वि० १२५ अ । पोट्टलिकसार्थः । बृ० द्वि० १२५ अ ।

**भरह**-भरतः प्रथमचक्रवर्त्ती । नरवरेन्द्रः । आव० १५९ । ओघ० १७९ । भरतः-आभ्यन्तरे प्रविष्टस्य बाह्यकरणरहितस्यापि केवलज्ञानोत्पत्तौ दृष्टान्तः । आव० ५२९ । भारतः-रोहकः । आव० ४१६ । प्रथमश्चक्रवर्त्ती । सम० १५२ । भरतः-आराधनाविषये विनीतानगर्यां राजा । आव० ७२४ । आत्माभिषिक्तो भरतश्चक्रवर्त्ती । व्य० द्वि० १२९ आ । बृ० तृ० २५५ अ । नि० चू० तृ० २३ आ । नि० चू० प्र० २७० । भरतः-चक्रवर्तिविशेषः । उत्त० ४४८ । ठाणा० ४३३ । भरतः-आगामिकाले भरतक्षेत्रे प्रथमश्चक्रवर्त्ती । सम० १५४ । भरतः-चक्रवर्त्ती राजा । उत्त० ५८२ । कर्मभूमिविशेषः । ठाणा० ६८ । भरतः-अधःस्थानप्रतिपत्तौ सिद्धः । बृ० तृ० १६ आ । भरतः- कर्मभूमिविशेषः । प्रज्ञा० ५५ ।

**भरहकूड**-भरताधिपदेवकूटम् । जं० प्र० २६६ ।

**भरहजंबु**-भरतजम्बुः । दश० २३ ।

**भरहदारओ**-भरतदारकः-रोहकः । आव० ४१६ ।

**भरहराय**-भरतराजः-साधूनां भक्तेन निमन्त्रणकर्ता चक्री । बृ० तृ० ५२ अ ।

**भरा**-भरा-यवसादिसमूहः । पिण्ड० ३६ ।

**भरिए**-भरितः-हस्तपाशितः । विपा० ५९ । भरितः-भृतः । भग० २७५ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भरिज्जइ**-भ्रियते । आव० २१८ ।

**भरिमं**-यद् ग्रन्थितं सद् वेष्ट्यते यथा पुष्पलम्बूसको गण्डूक इत्यर्थः । जीवा० २५३ ।

**भरिली**-भरिलिः-चतुरिन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ । जीवा० ३२ ।

**भरुअच्छ**-भृगुकच्छः । नि० चू० प्र० २६७ अ ।

**भरुकच्छ**-जलस्थलनिर्गमप्रवेशपत्तनम् । व्य० प्र० १६८ अ । भृगुकच्छं नगरविशेषः । आव० ४११ ।

**भरुकच्छाहरणी**-भृगुकच्छहरणी । आव० ६६५ ।

**भरुयकच्छ**-भृगुकच्छं । आव० ४११ ।

**भरुयच्छ**-भृगुकच्छः । आव० ८९ । जनपदविशेषः । नरवाहणनगरी । बृ० प्र० २७ आ । नगरीविशेषः । बृ० द्वि० २६७ अ । द्रव्यप्रणिधौ नगरम् । आव० ७१२, ७१३ । लवालवोदाहरणे नगरम् । आव० ७२१ । भरुयच्छं-भरुकच्छनयरं नरवाहनराजधानि । व्य० प्र० २२७ आ ।

**भरुयत्थ** नयरे । व्य० प्र० २८० आ ।

**भरू**-म्लेच्छविशेषः । प्रज्ञा० ५५ ।

**भरेइ**-पूरयति । ज्ञाता० ८८ ।

**भरोल**- । बृ० प्र० १४२ अ ।

**भलण**-न भेतव्यं भवता अहमेव तद्विषये भलिष्यामीत्यादिवाक्यैश्चोर्यविषयं प्रोत्साहनं भलनम् । प्रश्न० ५८ ।

**भलनीयः**- । ओघ० ५७ ।

**भलिस्सामि**-मेलयिष्यामि-मिलिष्यामि । आव० ३९४, ४३१ ।

**भलेयव्वं**- । ओघ० १४० ।

**भल्ल**-भल्लः-व्याघ्रविशेषः । प्रश्न० ७ ।

**भल्लओ**-भल्लः । आव० २०७ ।

**भल्लाय**- । भग० ८०३ ।

**भल्लि**-शस्त्रविशेषः । जीवा० १९३ ।

**भल्ली**-शस्त्रविशेषः । नंदी० १५२ । नि० चू० प्र० ८ आ, ११७ अ ।

**भल्लुंकी**-वनजीवः । मर० ।

**भवंति**-भवन्ति-भ्रमन्ति वा । दश० ७२ ।

**भव**-स्वभवे स्थितिः भवजीवितम् । आव० ४८० । भवः कर्मसम्पर्कजनितो नैरयिकत्वादिकः पर्यायः । भवन्ति कर्मवशवर्तिनः प्राणिनोऽस्मिन्निति भवः । प्रज्ञा० ३२८ । संसारो मनुष्यभवो वा । आव० ४४४ । भवः-नारकादि जन्म । प्रज्ञा० ५३९ । नंदी० ११२ । भवग्रहणं-सर्वबन्धशाटयोरन्तरकालः । आव० ४६० । ईशानकल्पे देवविमानविशेषः । सम० २ । भवः-भवसिद्धिकः । अल्पबहुत्वपदे विंशतितमं द्वारम् । प्रज्ञा० ११३ । भवन्ति अस्मिन् कर्मवशवर्तिनः प्राणिन इति भवः स च नारकादिलक्षणः । आव० २७ । नारकादिजन्म । नंदी० ७६, ११२ । भवन्ति प्राणिनः कर्मवशवर्तिनोऽस्मिन्निति भवं-शरीरम् । प्रज्ञा० १०९ ।

**भवइ**-भवति-तिष्ठति । प्रज्ञा० ६०९ ।

**भवकाल**-भवस्थितिः । ठाणा० ३ । भवकालः-मोक्षगमनप्रत्यासन्नशैलेश्यवस्थान्तर्गतोऽन्तर्मुहूर्तप्रमाणः । आव० ५९५ ।

**भवक्खए**-भवक्षयः । आचा० ४२१ ।

**भवक्खय**-तद्भवजीवितभवः तस्य क्षयो भवक्षयः । आव० ४०७ ।

**भवचरम**-भवचरमः । प्रज्ञा० २४६ । भवचरमः-यावज्जीविकम् । आव० ८५३ ।

**भवजीव**-भवजीवः । दश० १२१ ।

**भवजीविय**-नारकादिभवविशिष्टं जीवितं भवजीवितं-नारकजीवितम् । ठाणा० ७ । भवजीवितं-भवायुः । दश० १२२ ।

**भवट्ठिती**-भवे भवरूपा वा स्थितिः भवस्थितिर्भवकालः । ठाणा० ६६ ।

**भवण**-भवन चतुःशालादि । प्रश्न० ८ । भवनं-भवनपतिदेवावासः । प्रश्न० ७० । भवनं-भवनपत्यावासादि । अनु० १७१ । भवनं-भवनपतिगृहं गृहमेव वा । प्रश्न० ९५ । आयामापेक्षया किञ्चिन्न्यूनोच्छ्रायमानं भवति । जं० प्र० ८८ । चतुर्दशस्वप्ने द्वादशमम् । ज्ञाता० २० । भवनं-भवनपतिनिवासः । भग० २३८ ।

**भवणगिह** भवनगृहं-कुटुम्बिवसनगृहम् । भग० २०० । भवनगृहं-यत्र कुटुम्बिनो वास्तव्या भवन्ति । शाल्यादिविशेषितानि भवनानि गृहाणि च, तत्र भवनं-चतुः-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शालादि गृहं तु अपवरकादिमात्रं तत् । ठाणा० २९४ ।

**भवणछिद्द**-भवनच्छिद्रं-भवनानामवकाशान्तरम् । प्रज्ञा० ७७ ।

**भवणनिक्खुड**-भवननिष्कुटः-गवाक्षादिकल्पः केचनभवनप्रदेशः । प्रज्ञा० ७७ ।

**भवणपत्थड**-नरकप्रस्तटान्तरेः-भवनप्रस्तटः । अनु० १७१ । भवनप्रस्तटः भवनभूमिकारूपः । प्रज्ञा० ७१ ।

**भवणपुंडरीअ**-भवनपुण्डरीकः-भवनप्रधानः पुण्डरीकशब्दस्येह प्रशंसावचनत्वात् । उत्त० ४८४ ।

**भवणवासी**-भवनेषु वसन्तीत्येवंशीला भवनवासिनः । प्रज्ञा० ६९ ।

**भवणविही**-भवनविधिः-वास्तुप्रकारः । जं० प्र० १०७ ।

**भवणागार**-वणरायमंडियं भवणं । नि० चू० द्वि० ७० अ ।

**भवत्याभाव्यं** । ओघ० १५५ ।

**भवधारणिज्जं**-भवधारणीयं-नैरयिकशरीरम् । तत् हि भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटितसकलग्रीवादिरोमपक्षिशरीरवत् अतिबीभत्ससंस्थानोपेतम् । प्रज्ञा० २९७ । भवधारणप्रयोजनं मनुष्यादिभवोपग्राहकं भवधारणीयम् । भग० ८८ । भवे धार्यते तदिति तं वा भवं धारयतीति भवधारणीयं यज्जन्मतो मरणावधिः । ठाणा० २८९ । यया भवो धार्यते सा भवधारणीया । जीवा० ३४ । भवं-जन्मापि यावद्धार्यन्ते भवं वा देवगतिलक्षणं धारयन्तीति भवधारणीयानि । ठाणा० १२६ ।

**भवधारणिज्जा**-भवे-नारकादिपर्यायभवने आयुःसमाप्ति यावत्सततं ध्रियते या सा भवधारणीया सहजशरीरगता अनु० १६३ ।

**भवन**-चतुःशालादि । ठाणा० २९४ ।

**भवनवासिनः**-भवनेषु-अधोलोकदेवावासविशेषेषु वस्तुं शीलमेषां इति भवनवासिनः । ठाणा० ६६ ।

**भवन्ति** अवगाहन्त इति यावत् । अनु० ६१ ।

**भवपच्चइए**-क्षयोपशमनिमित्तत्वेऽप्यस्य क्षयोपशमस्यापि भवप्रत्ययत्वेन तत्प्रधान्येन भव एव प्रत्ययो यस्य तद्भवप्रत्ययम् । ठाणा० ५० ।

**भवपच्चइय**-भव एव प्रत्ययः-कारणं यस्य स भवप्रत्ययः स एव भवप्रत्ययकः । प्रज्ञा० ५३९ ।

**भवपरीत्त**-यः किञ्चिदूनाऽपार्धपुद्गलपरावर्त्तमात्रसंसारिकः । प्रज्ञा० १३९ ।

**भवमरण**-मनुष्यादावेव बद्धायुषो मरणं भवमरणम् । भग० १२० ।

**भवमिथ्यात्व**-भवहेतुभूतं मिथ्यात्वम् । उत्त० ५९३ ।

**भववीरियं**-जंतासिकुंभिचक्ककंदुदुपयणभट्ठसोल्लणसिबलिसूलादीसु भिज्जमाणाणं महंतवेदणोदये वि जं ण विलिज्जंति एवं तेसिं भववीरियं । नि० चू० प्र० १९ अ ।

**भवसण्णा**-भवसञ्ज्ञा-भयाभिनिवेशः भयमोहोदयजो जीवपरिणामः । आव० ५८० ।

**भवसहस्स**-भवसहस्रः प्रस्तावाद् अनन्तभव इत्यर्थः । विशे० ११७६ ।

**भवसिद्धिए**-भवैः सिद्धिर्यस्यासौ भवसिद्धिको भव्यः । प्रज्ञा० ४७ । भवे सिद्धिर्यस्यासौ भवसिद्धिकः-भव्यः । प्रज्ञा० ३९५ । भवैः-संख्यातैरसंख्यातैरनन्तैर्वा सिद्धिर्यस्यासौ भवसिद्धिको-भव्यः । प्रज्ञा० ५१३ । भव्यसिद्धिको-भव्यो जीवः । विशे० १०७८ ।

**भवसिद्धिकाः**-भवैः सिद्धिर्येषां ते । बृ० १७ आ (?) ।

**भवसिद्धिय**-भवे सिद्धिर्यस्य स भवसिद्धिकः । जीवा० ४४९ ।

**भवसिद्धियसंमए**-भवसिद्धिका-भव्यास्तेषां समिति-भृशं मता-अभिप्रेताः भवसिद्धिसंमताः । उत्त० ७१२ ।

**भवसिद्धिया**-भवा-भाविनी सा सिद्धिः-निर्वृतिर्येषां ते भवसिद्धिकाः भव्याः । ठाणा० ३० । भवा-भाविनी सिद्धिर्येषां ते भव्यसिद्धिकाः । भग० ५५८ । भवसिद्धिकाः-भवे सिद्धिः येषां ते तद्भवसिद्धिकाः । विशे० ५४३ । भवे भव्या वा सिद्धिरेषामिति भवसिद्धिकाः भव्यसिद्धिका वा । उत्त० ३४३ ।

**भवसिद्धीयसंवुडे**-भवे-तस्मिन्नेव मनुष्यजन्मनि सिद्धिरस्येति भवसिद्धिकः स चासौ संवृतश्चाश्रवनिरोधेन भवसिद्धिकसंवृतः । उत्त० ७१२ ।

**भवसिद्धीया**-भविष्यतीति भवा, भवा सिद्धिः-निर्वृतिर्येषां ते भवसिद्धिकाः-भव्याः । भग० ८१ । भवे सिद्धिर्येषां ते भवसिद्धिकाः । आव० ७७ । भवा-भाविनी सिद्धिः-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्तिर्येषां ते भवसिद्धिकाः-भव्याः । सम० ७ ।

**भवस्थिति**-भवकालः । ठाणा० ३ ।

**भवा**-भविष्यति इति भवा-भाविनी । ठाणा० ३० । उत्त० ६५० ।

**भवाउए**-भवात्ययेऽपि कालान्तरानुगामीत्यर्थः, भवप्रधानमायुर्भवायुः । ठाणा० ६६ ।

**भवाकर्ष**-भवे-अनेकशोपशमादिश्रेणिप्राप्त्या आकर्षः-ऐर्यापथिककर्माणुग्रहणं भवाकर्षः । भग० ३८६ ।

**भवावीचिमरणं**- । उत्त० २३१ ।

**भविअ**-भविः-विवक्षितपर्यायार्हस्तद्योग्यो वा । अनु० १३ ।

**भविए**-भविष्यति-तेन तेनावस्थात्मना सत्तां प्राप्स्यति यः सः भव्यो जीवा० । उत्त० ७२ । भव्यः-योग्यः, कर्ता । भग० ६३ ।

**भविओ**-भव्यः-योग्यः द्रव्यदेवादिः । आव० ७६८ ।

**भवित्ता**-अन्तर्भूतकारितार्थत्वात् मुण्डान् भावयित्वेति दृश्यम् । ठाणा० ४३१ ।

**भविय**-भव्यः-योग्यः ।भग० ५८ । भव्यः-तथाविधानादिपारिणामिकभावात् सिद्धिगमनयोग्यः । प्रज्ञा० ४ । भव्यः-देवत्वयोग्यः । भग० ४६ ।

**भवियजणपयहियायाभिणंदियाणं**-भव्यजनानां भव्यप्राणिनां प्रजा-लोको भव्यजनप्रजा भव्यजनपदो वा तस्यास्तस्य वा हृदयैः-चित्तैरभिनन्दितानां-अनुमोदितानामिति । सम० ११५ ।

**भवियदव्वदेवा**- । भग० ५८३ ।

**भविस्सामि**-भविष्यामि-उत्पत्स्ये । आचा० १६ ।

**भवे**-भवेयुः । अयं शब्दः भवेयुरित्यस्यार्थे प्रयुक्तः । दश० ७१ ।

**भवोवग्गहं**-भवे-मनुष्यभवे उप-समीपेन गृह्यते-अवष्टभ्यते यैस्तत् भवोपग्रहम् । प्रज्ञा० ६०३ ।

**भवोवग्गाहकम्म**-भवोपग्राहकर्म-वेदनीयनामगोत्रम् । प्रज्ञा० ६०३ ।

**भवोहंतकरा**-भवा-नारकादयस्तेषामोघः-पुनः पुनर्भवरूपप्रवाहस्तस्यान्तकराः-पर्यन्तविधायिनो भवौघान्तकराः । उत्त० ५११ ।

**भव्यः**-योग्यः । आव० ५ । भवसिद्धिकः । ठाणा० ३० ।

**भव्व**-भव्यो-योग्य इन्द्रशब्दार्थं ज्ञास्यति यो न तावद्विजानाति स भव्यः । ठाणा० १०३ । भव्यं-योग्यं, कल्याणमिति । प्रश्न० १३३ । भव्यं-फलविशेषः । प्रज्ञा० ३२८ । भाविवस्तुविषयं भव्यम् । ठाणा० ४५० । भव्यं-भावस्य भाविनः पर्यायस्य यद् भव्यं-योग्यं तदपि द्रव्यम् । विशे० २५ ।

**भव्वय**-भव्वको-भागिनेयः । बृ० तृ० ९३ आ ।

**भस**-भसः शृङ्गारः । जं० प्र० ४१८ ।

**भसओ**-जितशत्रोः पुत्रः शशकभ्राता । बृ० तृ० ११३ अ ।

**भसोल**- । नि० चू० तृ० ७८ अ । एकोनत्रिंशत्तमो नाट्यविधिः । जीवा० २४७ । भसोलं-नाट्यविशेषः । जं० प्र० ४१२ । भसः-शृङ्गाररसस्तं अवतीति भसोस्तं इतिभावाभिनयेन न लाति-गृह्णातीति भसोलः नटः । जं० प्र० ४१८ । नट्टविसेसो । नि० चू० तृ० १ अ ।

**भस्त्रक**-तोणम् । औप० ७१ ।

**भस्त्रकाः**-तूणाः । जं० प्र० २१२ ।

**भस्त्रा**-धमनी । आचा० ७४ ।

**भस्त्रावातः**- । उपा० २५ ।

**भस्म**-रूक्षस्पर्शपरिणता । प्रज्ञा० १० ।

**भस्मक**-एतदभिधानो वायुविकारः । विपा० ४२ । व्याधिविशेषः । प्रज्ञा० ६०२ ।

**भस्मकव्याधिः**- । जीवा० ११६ ।

**भांड**-भाण्ड-यानपात्रम् । आव० ८२४ ।

**भांडग**-भाण्डकं-पतद्ग्रहम् । व्य० द्वि० २६६ आ ।

**भाइज्जाइया**-भ्रातृजाया । बृ० प्र० २६ आ ।

**भाइणिज्ज**-भागिनेयः-भगिनीपुत्रः । दश० २१५ ।

**भाइंति**-भाजयति विश्राणयति, शेषदेवेभ्यो ददाति । जीवा० २४६ ।

**भाइयपुणाणिय**-विभाजनं-ईश्वरादिगृहेषु वीननार्थमर्प्पणं तेभ्यः प्रत्यानयनं-पुनरानयनं, विभक्ताश्च ते पुरानीताश्चेति आव० २३८ ।

**भाइयव्व**-भेतव्यम् । आव० १२१ । भाज्यः-विकल्पनीयः । अनु० २२८ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाइल्ल-भागिकः यः षष्ठांशादिलाभेन कृष्यादौ व्याप्रियते । सूत्र० ३३१ ।
भाइल्लएइ-भागिको-द्वितीयाद्यंशग्राही । जं० प्र० १२२ ।
भाइल्लग-यो भागं लाभस्य लभते स । ज्ञाता० ८९ । भागो विद्यते यस्य सो भागवान् । शुद्धचातुर्थिकादि । ठाणा० ११४ ।
भाइल्लगत्ता-कृष्यादिलाभस्य भागग्राहकत्वम् । भग० ५८१ ।
भाउज्जा-भ्रातृजाया । भग० ५५८ ।
भाउज्जाइया-भ्रातृजाया-भ्रातृकलत्रम् । आव० ८२४ ।
भाए-भागः-विभागः । ज्ञाता० २३० । भागः-अर्द्धपोषः । आचा० ३२६ । भागः-अचिन्त्या शक्तिः । आव० ६० । भायणं-विभज्य समर्पणम् । बृ० द्वि० २०६ अ ।
भाएति-भाजयति-विश्राणयति । राज० १०३ ।
भाओया- । नि० चू० प्र० २७१ अ ।
भाग-भागः अवकाशः । सूर्य० १०४ । भागः । सूर्य० १६ । दशा । उत्त० १४४ । पूजा । सूत्र० १७४ । पलिकामात्रम् । उत्त० १४२ । लब्धद्रव्यविभागः । ज्ञाता० ४१ । नि० चू० प्र० १४२ आ । भागः अवसरः । विशे० १४२ । भागः-अचिन्त्या शक्तिः । प्रभावः । विशे० ४८८ ।
भागवए- । नि० चू० प्र० २५७ आ ।
भागवओ-भागवतः-पौराणिकः । आव० ४१९ ।
भागवतः-भागवतपाठकः । नंदी० १५२ । आचा० १४६ ।
भागसहस्साइं-बहवोऽसङ्ख्येया भागाः । प्रज्ञा० ५०८ ।
भागावडिओ-भागापतितः-भोग्यः । आव० ७०९ ।
भागिल्लओ-भागिकः-द्वितीयांशस्य चतुर्थांशस्य वा ग्राहकः। जीवा० २८० ।
भागिणीज्जी- । नि० चू० प्र० ७ आ ।
भागिणेय- । नि० चू० प्र० २६६ अ ।
भागी-भाजनम् । उत्त० ५९० ।
भागीरथी-गङ्गा । उत्त० ३७८ ।
भगीणोज्जी- । नि० चू० प्र० ७ आ ।
भाङ्कारः-भेरीशब्दः । नंदी० ६२ ।

भाजनोद्ग्रहण-भाजनाद्व्राजवे यावत्पतनम् । आव० ५७६ ।
भाटि-मैथुनार्थं यन्मूल्यम् । आव० ८२५ ।
भाड- । नि० चू० तृ० ४५ आ ।
भाडीकम्म-भाटीककर्म्म । आव० ८२९ ।
भाण-भाजनम् । ओघ० ११७ । आव० २८९, ४२७, ४३६ । पात्रम् । ओघ० १५५ । भाण्डम् । ठाणा० ३३६ ।
भाणक-वाद्यविशेषः । ठाणा० ६३ ।
भाणगो-उद्घोषकः । नि० चू० प्र० ३४४ आ ।
भाणदुगं-भाजनद्वितीयं-पतद्ग्रहं मात्रकं वा । ओघ० १५५ ।
भाणभूमी- । नि० चू० प्र० १४१ अ ।
भाणाइधावणा-भाजनादिधावनं-क्षालनं पात्रादेः। ओघ० ६६ ।
भाणिऊण-अभिधाय । आव० ३३० ।
भाणिय-भाणिकं अनन्तजीववनस्पतिभेदः। आचा० ५६ ।
भाणीअ-अभाणीत् । जं० प्र० २०० ।
भाणुमित्त-बलमित्तकणिट्ठभाया । नि० चू० प्र० ३३६ आ । ज्ञाता० १५२ ।
भाणुसिरी-भाणुमित्तस्स भगिणी । नि० चू० प्र० ३३६ ।
भाणू-धर्मनाथजिनस्य पिता । आव० १६१ । सम० १५१ ।
भाण्डागारं-श्रीगृहम् । विशे० ६१५ । कोशः । नंदी० १६७ । श्रीगृहम् । आव० ९६ ।
भातिसमाण-भ्रातृसमानः-अल्पतरप्रेमत्वात् तत्त्वविचारादौ निष्ठुरवचनादप्रीतेः तथाविधप्रयोजने त्वत्यन्तवत्सलत्वाच्चेति । ठाणा० २४३ ।
भादुगं-उत्कटस्पर्शरसगन्धतयाऽन्यद्रव्यपरिणामकम् । बृ० तृ० १६४ अ ।
भामण्डल-जनकराजपुत्रः सीतासहजातः । प्रश्न० ८६ ।
भामरं-भ्रामरं-मधुविशेषः । आव० ८५४ । महुणो तईओ भेओ । नि० चू० प्र० १६६ आ ।
भामुंडणा-भ्रंशना । बृ० द्वि० १३ अ ।
भाय भागः-लाभस्यांशः । विपा० ७७ । लाभांशः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञाता० ८३ ।

**भायण**-भाजनं-योग्यम् । सूर्य० १९६ । भाजनं-नन्दीपात्रम् । ओघ० १८४ ।

**भायणत्था**-भाजनार्थं विभाजनार्थम् । व्य० प्र० १७१ अ ।

**भायणवत्थ**-भाजनवस्त्रं पटलम् । ओघ० १७५ ।

**भायणवुट्ठी**-भाजनवृष्टिः-पात्रवर्षणम् । भग० १९९ ।

**भायल**-जात्यविशेषः । ज्ञाता० ५८ ।

**भारंडपक्खी**-चर्मपक्षिविशेषः । ज्ञाता० ४६ ।

**भार**-पुरुषोत्क्षेपणीयो भारः । जं० प्र० १६२ । भारः-विंशत्या पलशतैः, पुरुषोत्क्षेपणीयो भारो भारक इति । ठाणा० ४६२ । भारः-क्षीरभृतकुम्भद्वयोपेता कापोती । आव० ७७० । भारकः-पुरुषोद्वहनीयो विंशतिपलशतप्रमाणो वा । भग० ६६१ । भारः-विंशतितुलाप्रमाणः । अनु० १५४ । भारः-गुरुताकरणम्, परिग्रहस्य सप्तदशमं नाम । प्रश्न० ९२ ।

**भारए**- । भारतः सूर्य० २२ ।

**भारकाय**-भारः-क्षीरभृतकुम्भद्वयोपेता कापोती, स चासौ कायश्च, कापोती एव वा । आव० ७६७ । कापोती । दश० १३५ ।

**भारग्गस**-भारग्रशः-अनेकविंशतितुलापरिमाणानि । जं० प्र० १६२ । भारपरिमाणतः । ज्ञाता० १२६ ।

**भारती**-भरतस्त्री । जीवा० ६० ।

**भारद्दा**-गोत्रविशेषः । ठाणा० ३९० ।

**भारद्दाइस्स**- । भग० ६७४ ।

**भारद्दाजं**-भारद्वाजं-मृगशिर्षगोत्रम् । जं० प्र० ५०० ।

**भारद्दायसगोत्त**-भारद्वाजसगोत्रम् । सूर्य० १५० ।

**भारवह**-गर्दभादिः । ओघ० २२७ ।

**भारवहा**-पोट्टलिया । नि० चू० तु० ३७ अ ।

**भारह**-भरतः । ज्ञाता० ११, १२४ ।

**भारहर**-भारं धरतीति भारधरः । उत्त० ३६२ ।

**भारहो**-भारो अत्थो तं अत्थं धारयतीति । दश० चू० १०२ अ ।

**भारिय**-महत् । नि० चू० प्र० १५६ अ ।

**भारिया**-भारिका-दुर्निर्वाहः, भार्या । प्रश्न० ३९ । ज्ञाता० २५२ ।

**भारुंड**-भारुण्डपक्षिणोः किलैकं शरीरं पृथग् ग्रीवं त्रिपादं च भवति । ठाणा० ४६४ ।

**भारुंडपक्खी**-भारण्डपक्षी-चर्मपक्षिविशेषः । जीवा० ४१ ।

**भालिय**-भारितं-भृतम् । बृ० द्वि० २८७ अ ।

**भावंग**-भावाङ्गं-श्रुतनोश्रुतभेदभिन्नम् । उत्त० १४४ ।

**भाव**-भावः-पदार्थः । आव० ४४५, ६०६ । भावः-आदर्शपक्षे नयनमुखादिधर्माः साधुपक्षे अशठतया मनःपरिणामः । ओघ० ३६ । भावः-चित्तम् । प्रश्न० ३० । भावः-चित्तसंभवः । प्रश्न० १४० । भावः-अन्तःकरणवृत्तिः । प्रश्न० ९८ । भावः-सत्ता । प्रज्ञा० ३७१ । भावः-पदार्थः पर्यायः । प्रज्ञा० ११० । भावः-जातौ पुंवचनम् । प्रज्ञा० २५१ । वस्तु वस्तुधर्मो वा । ज्ञाता० १७७ । पर्यायः । विशे० ४५ । भावः-स्वभावः । विशे० २५१ । भवनं-विवक्षितरूपेण परिणमनं भावः, अथवा भवति विवक्षितरूपेण संपद्यत इति भावः । विशे० ३५ । भविष्यतीति भावः । विशे० १५ । भवनं भावः-पर्यायः । नि० चू० प्र० २३ अ । पर्यायः भेदः । विशे ३९ । मोक्खो । दश० चू० १४३ आ । चित्ताभिप्रायः । आचा० १३२ । परिणामः । भग० ८९० । धर्म्मः । भग० ७३७ । अन्तःकरणम् । उत्त० ३९९, ५६३ । भावः । नंदी० २२७ । भावं-इन्दनक्रियानुभवनलक्षणपरिणाममाश्रित्येन्द्र इन्दनपरिणामेन वा भवतीति भावः । ठाणा० १०३ । मनः । ठाणा० १९६ । आन्तरपरिणामः । उत्त० ७०८ । स्वरूपम् । आव० १८१ । युक्तार्थत्वादिको गुणः । अनु० १४८ । अभिप्रेतः । परकीयाभिप्रायः । अनु० ४९ । भावः-पर्यायः । प्रज्ञा० ५६ । भग० १४८ । चित्तसमुद्भवः । ज्ञाता० १४४ । भावः-बह्वर्थः, द्रव्यवाचकः, शुक्लादिवाचकः, औदयिकादिष्वपि वर्त्तमानः कर्मविपाकलक्षणश्च । दश० ६९ । सत्तापरिणामः । भग० ७६० । अस्तिकायः । दश० ७० । जगतीवर्षवर्षधराद्यास्तद्गतपदार्थाः । जं० प्र० १८ । भावना-स्तम्भादीनामपि तद्बुद्धयाऽऽलिङ्गनादिचेष्टा, असम्प्राप्तकामभेदः । दश० १९४ । भावः-अभिप्रायः, प्रार्थना । दश० ९७ । भावः-मोक्षः । दश० २५८ । औदयिकः । प्रज्ञा० २४६ । भावः-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओघ० ७३। भूयिष्ठशुक्लादिपर्यायः । ठाणा० ४६० । अनुभागलक्षणं कर्मणः पर्यायं चतुःस्थानिकत्रिस्थानिकादिरसम् । उत्त० ६४५ । इति द्रव्यादिको भावः । नि० चू० प्र० ८ अ । पर्यायः क्रमवर्त्ती । ओघ० ११७ । परमार्थः । उत्त० ५५५ । जं० प्र० ८ । उत्त० ५४९ । भवनं भावः-वक्तुमिष्टक्रियानुभवलक्षणः । पर्यायः । आव० ५ । प्रतिबन्धः । बृ० प्र० २४१ आ । सत्ता । विशे० ९०३ । भावः-अभिप्रायः । सूत्र० २३९ । भावः-पर्यायः । उत्त० २०३ । भावः-परमार्थः । आव० २६७ । भावः-आत्मपरिणामलक्षणः । आव० ३६६ । भावलिङ्गोपलक्षणार्थः । आव० ५२७ । भावः-अभिप्रायः । अ० १२ (?) । भावपरिहरणा,परिहरणाया अष्टमो भेदः । आव० ५५२ । भावः-सद्भावः । नंदी० ५३ ।

**भावकड**-भावकृतं-द्रव्यादिभिर्भेदैः सूत्रे विहितम् । बृ० प्र० १३२ अ ।

**भावकर्म्म**- । आचा० ९८ ।

**भावकसाए**-भावकषायाः-शरीरोपधिक्षेत्रवास्तुस्वजनप्रेष्याचादिनिमित्ताविर्भूताः शब्दादिकामगुणकारणकार्यभूतकषायकर्मोदयात्मपरिणामविशेषाः क्रोधमानमायालोभाः । आचा० ९१ ।

**भावकसिणं**-रागद्वेषाभ्यां वस्त्रधारणम् । बृ० द्वि० २२७ आ ।

**भावकायः**-भावा औदयिकादयोऽन्ये वा प्रभूतास्तेषां कायः । आव० ७६७ ।

**भावकाल**-भावकालः-सादिसपर्यवसानादिभेदभिन्नः । दश० ९ । भावकालः-औदयिकादेर्भावस्य सादिसपर्यवसानादिभेदभिन्नः कालः । विशे० ८३७ ।

**भावकुक्कुटी**-उदरानुकूलो धृतिजनकः ज्ञानदर्शनचारित्रवृद्धिकर आहारः । पिण्ड० (?) ।

**भावकेऊ**-भावकेतुः-अष्टाशीतौ महाग्रहे अष्टाशीतितमः । जं० प्र० ५३५ । ठाणा० ७९ ।

**भावकेतन**-लोभेच्छा । आचा० १६३ ।

**भावखंध**-भावश्चासौ स्कन्धश्च भावस्कन्धः, भावमाश्रित्य वा स्कन्धो भावस्कन्धः । अनु० ४२ ।

**भावगौरव**-संसारचक्रवालपरिभ्रमणहेतुः कर्मनिदानम् । अभिमानलोभाभ्यामात्मनोऽशुभभावगौरवम् । आव० ५७९ ।

**भावग्ग**-भावग्रम् । आचा० ३१८ ।

**भावचंचल**-चञ्चलस्य चतुर्थो भेदः । बृ० प्र० १२४ अ ।

**भावचपल**-सूत्रेऽर्थे वाऽसमाप्त एव योऽन्यद् गृह्णाति । उत्त० ३४७ ।

**भावज्जाइया**-भ्रातृजाया । नि० चू० प्र० ३५० आ ।

**भावट्ट**-भावार्त्तः-प्रियविप्रयोगादिदुःखसङ्कटनिमग्नो भावार्त्तः । आचा० ३५ ।

**भावण**-भावना-आचारप्रकल्पस्य चतुर्विंशतितमो भेदः । आव० ६६० । भावनं-आचाराङ्गस्य चतुर्विंशतितममध्ययनम् । आव० ६१७ । सम० ४४ ।

**भावणा**-भावना-अभ्यासः । आव० ५९२ । भावना-ईर्यासमित्यादयः । प्रश्न० ११० । भावना-अव्यवच्छिन्नपूर्वपूर्वतरसंस्कारस्य पुनःपुनस्तदनुष्ठानरूपा । अनु० ३० । अभ्यासरूपा । उत्त० ४१२ । भाव्यते-आत्मसात्नीयतेऽनयाऽऽत्मेति भावना-तद्भावाभ्यासरूपा । उत्त० ७१० । नामनिष्पन्ने निक्षेपे भावनेति नाम । आचा० ४१८ । भावना-आचारप्रकल्पे द्वितीयश्रुतस्कन्धस्य पञ्चदशममध्ययनम् । प्रश्न० १४५ । भावना-ज्ञानादिका । आव० ५९० । भावना-वासना । आव० ५९५ । भावना-ध्यानाभ्यासक्रिया । आव० ५८३ ।

**भावणाए**- । ठाणा० ४५६ ।

**भावणाओ**-प्राणातिपातादिनिवृत्तिलक्षणमहाव्रतसंरक्षणाय भाव्यन्ते इति भावनाः । सम० ४४ ।

**भावणागम**-भावनागमः-श्रीआचाराङ्गद्वितीयश्रुतस्कन्धगतभावनाख्याध्ययनगतपाठः । जं० प्र० १५३ ।

**भावतः**-परमार्थतः । आचा० १६६ ।

**भावतआम**-वर्षशतायुः पुरुषआयुष्कोपक्रमेण वर्षशतमपूरयित्वा म्रियते स । बृ० प्र० १४३ अ ।

**भावतितण**-कयाकएसु किंचि भणितो चोदितो वा दिवसंपि तिडितिडेत्ता अच्छति । नि० चू० तृ० ८० अ ।

**भावतीर्थ**-क्रोधादिनिग्रहसमर्थं प्रवचनम् । बहुभवैः सञ्चितं कर्मरजो यस्मात् तपःसंयमेन धाव्यते शोध्यते तस्मात्तत् प्रवचनम् । आव० ४९८ । सङ्घः । ठाणा० ३३ ।

**भावतेण**-भावस्य-श्रुतज्ञानादिविशेषस्य स्तेनो भावस्तेनः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रश्न० १२५ ।

**भावत्थ**-भावश्चासावर्थश्च भावार्थः । दश० ७० ।

**भावदेव**-देवायुष्काद्यनुभवन् वैमानिकादिः । ठाणा० ३०३। भावेन-देवगत्यादिकर्मोदयजातपर्यायेण देवो भावदेवः । भग० ५८३ ।

**भावदीव**-सम्यक्त्वम् । जं० प्र० ८ ।

**भावना**-तुलना । विशे० ११ ।

**भावनासत्यं**-शुद्धान्तरात्मा । प्रश्न० १४५ ।

**भावन्न**-चित्ताभिप्रायो दातुः श्रोतुर्वा तं जानातीति भावज्ञः । आचा० १३२ ।

**भावन्नाण**-यदा विवक्षितपर्यायतो न जानाति तदा भावाज्ञानम् । ठाणा० १५४ ।

**भावपएस**-भावप्रदेशः-एकगुणकालकादिकः । प्रज्ञा०२०२ ।

**भावपक्कं**-संजमजोगोवरित्तं व सुद्धं भावपक्कं, अथवा उग्गमादिदोसविसुद्धं भावपक्कं, अथवा जेण जं आउगं णिव्वतियं तं सव्वं पालेत्ता मरमाणस्स भावपक्कं भवति । नि० चू० द्वि० १४६ आ ।

**भावपडिलेहा**-भावप्रतिलेखा-भावप्रत्युपेक्षणा । ओघ० १०६ ।

**भावपरमाणू**-भावपरमाणुः-परमाणुरेव वर्णादिभावानां प्राधान्यविवक्षणात् सर्वजघन्यकालत्वादिर्वा । भग० ७८८ ।

**भावपलंब**-भावप्रलम्ब अष्टविधः कर्मग्रन्थिः । बृ० प्र० १४३ आ ।

**भावपव्वज्जा**-भावप्रव्रज्या-आरम्भपरिग्रहत्यागः । उत्त० २६८ ।

**भावपुरिस**-भावपुरुषः जीवः । पूः-शरीरं, पुरि शरीरे शेत इति निरुक्तिवशाद् भावपुरुषः-पारमार्थिकः पुरुषः, शुद्धो जीवः । विशे० ८६३ । पूः-शरीरं पुरि शेते इति निरुक्तवशाद् भावपुरुषः-जीवः । आव० २७७ ।

**भावप्राणाः**-ज्ञानादीनि । प्रज्ञा० ७ ।

**भावबंभ**-सत्तरसविहो संजमो । नि० चू० प्र० १ अ ।

**भावभिक्खू**-इहलोगणिप्पिवासो संवेगे भावितमती संजमकरणुज्जुत्तो । नि० चू० तृ० ८५ आ ।

**भावमंगल**-भावमङ्गलं-चरणकरणक्रियाकलापोऽभिप्रेतः । विशे० ३४ ।

**भावमंद**-भावमन्दः-अनुपचितबुद्धिर्बालः कुशास्त्रवासितबुद्धिर्वा । आचा० ७० ।

**भावमहत्**-प्राधान्यतः क्षायिको भावः । उत्त० २५५ ।

**भावमुह**-तिन्नि तिसट्ठा पावा दुपसया । नि० चू० द्वि० ९ आ ।

**भावयति**-निव्वत्तेति । दश० चू० ६४ अ ।

**भावयन्**-तेनात्मानमात्मसात्नयन् । उत्त० ५६३ ।

**भावर्जुकता**-भावः-अभिप्रायस्तस्मिंस्तेन वा ऋजुकता । यदन्यद्विचिन्तयन् लोकपङ्क्त्यादिनिमित्तं अन्यद्वाचा कायेन वा समाचरति तत्परिहाररूपा । उत्त० ५६० ।

**भावलेश्या**-तज्जन्यो जीवपरिणामः । ठाणा० ३२ ।

**भावलेस**-भावलेश्या-आन्तरपरिणामः । भग: ५७४ ।

**भावबल**-पल्लवगाही । बृ० प्र० १२४ आ ।

**भावविसोही**-भावविशुद्धिः प्रत्याख्यानशुद्धयाः षष्ठो भेदः । आव० ८४७ ।

**भावशुद्धं**-रागेण दोषेण वा परिणामेन इच्छादिना वा न दूषितं यत्तु तत्खलु प्रत्याख्यानं भावशुद्धम् । ठाणा० ३४६ ।

**भावश्रुत**-शब्दमाकर्णयतः स्वयं वा वदतः पुस्तकादिन्यस्तानि वा चक्षुरादिभिरक्षराण्युपलभमानस्य शेषेन्द्रियगृहीतं वाऽर्थं विकल्पयतोऽक्षरानुषितं विज्ञानमुपजायते तदिह भावश्रुतं श्रुतशब्देनोक्तम् । उत्त० ५५७ ।

**भावसंकोयणं**-भावसङ्कोचनं-विशुद्धमनसो नियोगः । आव० १७६ । विशुद्धस्य मनसोऽर्हदादिगुणेषु निवेशः । जं० प्र० २० ।

**भावसंविग**-भावसंविग्नाः-य संसारादुत्त्रस्तमानः । व्य० प्र० ६ आ ।

**भावसच्च**-भावसत्यं-शुद्धान्तरात्मनारूपं पारमार्थिकावितथत्वम् । भग० ७२७ । उत्त० ५६१ । भावसत्यं-शुद्धान्तरात्मा । सम० ४६ । भावसत्यं-भावलिङ्गं, अन्तः शुद्धिः । द्वादशोऽनगारगुणः । आव० ६६० । भावसत्यं-यथा पञ्चवर्णसम्भवेऽपि शुक्लाबलाका । दश० २०६ ।

**भावसच्चा**-भावसत्या-पर्याप्तिकसत्यभाषाया अष्टमो भेदः । यो भावो वर्णादिर्यस्मिन्नुत्कटो भवति तेन या सत्या सा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावसत्या । प्रश्ना० २५६ ।

**भावसत्थ**-भावशस्त्रं-असंयमः दुष्प्रणिहितमनोवाक्काय-लक्षणः । आचा० ३६ ।

**भावसन्धिः**-ज्ञानदर्शनचारित्राणामभिवृद्धिः । आचा० १३१। ज्ञानदर्शनचारित्राध्यवसायस्य कर्मोदयात् त्रुट्यतः-पुनः सन्धानं-मीलनम् । आचा० १६५ । ज्ञानावरणीयं-विशिष्टक्षायोपशमिकभावमुपगतमित्ययं सम्यग्ज्ञानावाप्ति-लक्षणः सन्धिः । आचा० १६५ ।

**भावसम्म**-भावसम्यक् दर्शनज्ञानचारित्रभेदात् । आचा० १७६ ।

**भावसाहु**-भावसाधुः निर्वाणसाधकान् योगान् सम्यग्दर्श-नादिप्रधानव्यापारान् यस्मात् साधयतीति साधुः, विहिता-नुष्ठानपरत्वात्, समश्च सर्वभूतेषु यः । आव० ४४६ ।

**भावसुत्तः**-मिथ्यात्वाज्ञानमयमहानिद्राव्यामोहितः। आचा० १५२ ।

**भावागार-अगं**:-विपाककालेऽपि जीवविपाकितया शरीर-पुद्गलादिषु बहिःप्रवृत्तिरहितैरनन्तानुबन्ध्यादिभिर्निर्वृत्तं, कषायमोहनीयमिति । उत्त० १६ ।

**भावाणुवाय**-जहा सप्रभेदा णाणदंसणचरित्ताया स परि-तावमहादुक्खादिगा एवमादि । नि० चू० तृ० १४६ अ ।

**भावात्मकर्म**-भावेन-परिणामविशेषेण परकीयस्यात्मसम्ब-न्धित्वेन कर्म-करणम् । पिण्ड० ४३ ।

**भावापाय**-भावादपायाः भावापायः, अपायभेदः । दश० ३६ ।

**भावाभियोगः**-विद्यामन्त्रेणाभिमन्त्र्य पिण्डं ददाति स । ओघ० १९३ ।

**भावावस्सय**-आवश्यकपदार्थज्ञस्तज्जनितसंवेगविशुद्ध्यमा-नपरिणामस्तत्र चोपयुक्तः साध्वादिरागमतो भावावश्य-कम् । अनु० २८ ।

**भावावीचिमरणं**- । उत्त० २३१ ।

**भावासण्ण**-अणहियासओ । ओघ० ७७ ।

**भावासन्न**-असहिष्णुः । ओघ० १५२ । जं अणहिया-सओ अतिवेगेण आसण्णे चेव वोसिरइ तं । ओघ० १२३ । संज्ञादिवेगधारणासहिष्णुः । ओघ० २८५ । भावासन्न-य उच्चारादिना पीडितः स । ओघ० १०७ ।

**भाविअतर**-भावितत्तरः-प्रसन्नतरः । दश० २६४ ।

**भाविअप्पा**-भावितात्मा । जं० ४१ (?) । भावितात्मा स्वागुणवर्णनापरः । दश० २५४ ।

**भाविओ**-भावितः । आव० १०१ ।

**भाविताभाविते**-भावितं-वासितं द्रव्यान्तरसंसर्गतः अभा-वितमन्यथैव यत् । ठाणा० ४८१ ।

**भाविय**-भावितः-परिणतजिनवचनः । बृ० द्वि० ३५ आ ।

**भावियकुला**-जाणि सड्ढकुलाणि अम्मापिति समाणाणि वा अविप्परिणामगाणि अणुड्डाहकराणि ते भावियकुला । नि० चू० द्वि० १४६ आ । यानि श्राद्धकुलानि, माता-पितृसमानानि साधूनामपवादपदेऽशुकादिकं गृह्णतामनु-ड्डाहकारीणि तानि भावितकुलान्युच्यन्ते । बृ० प्र० १७१ आ ।

**भावियप्पा**-भावितात्मा-चतुर्दशो मुहूर्त्तनाम । सूर्य० १४६ । भावितात्मा-भावितो-वासित आत्मा ज्ञानदर्शन-चारित्रैस्तपोविशेषैश्च येन स भावितात्मा । प्रज्ञा० ३०३ । भावितात्मा-संयमतपोभ्यां भावितात्मा एवंविधानामन-गाराणां हि प्रायोऽवधिज्ञानादिलब्धयो भवन्ति । भग० १८६ । भावितात्मा-स्वसमयानुसारिप्रशमादिभिः भावि-तात्मा । भग० १९३ । भावितात्मा-ज्ञानादिभिर्वासि-तात्मा । भग० ७४१ ।

**भावुक**-आम्रवृक्षः । ओघ० २२३ ।

**भावुग**-भाव्यते-प्रतियोगिना स्वगुणैरात्मभावमापद्यत इति भाव्यम्-कवेल्लुकादिकम् । आव० ५२१ । प्रतियोगिनि सति तद्गुणापेक्षया तथाभवनशीलं भावुकम् । आव० ५२१ ।

**भावुज्जुयया**-भावो-मनः, ऋजुकस्य-अमायिनो भावः कर्म्म वा ऋजुकता । ठाणा० १९६ ।

**भावुपहाण**-भावस्य उपधानं भावोपधानम्, तत्पुनर्ज्ञान-दर्शनचारित्राणि तपो वा । आचा० २९७ ।

**भावे**-भावपुरिसः भावपुरुः-शुद्धो जीवः तीर्थकरः । आव० २७७ । भावकालः सादिसपर्यवसानादिभेदभिन्नः । आव० २५७ । भावेन्द्रियम् । जीवा० १६ ।

**भावेन्द्रियाणि**-क्षयोपशमोपयोगरूपाणि । प्रज्ञा० २३ ।

**भावेमाण**-भावयन्-वासयन् । सूर्य० ५ । ज्ञाता० ६ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भावोञ्छ**-गृहस्थोद्धरितादि । दश० २५३ ।

**भावोवक्कम**-भावोपक्रमः-परकीयाभिप्रायस्योपक्रमणं यथावत्परिज्ञानम् । अनु० ४६ ।

**भावोवधी**- । नि० चू० प्र० २८६ आ ।

**भावोवाय**-भावोपायः उपायभेदः । दश० ४० ।

**भावौघ**-अष्टप्रकारं कर्म्म संसारो वा । आचा० १२४ । भावौघः-आस्रवद्वाराणि । आचा० ४११ ।

**भाषकः**-अविज्ञातविशेषस्वरूपस्य श्रुतमात्रस्य सव्युत्पत्तिकविशेषनाममात्रकथनेन व्यक्तिमात्रं कृत्वा चरितार्थः । विशे० ६१३ ।

**भाषाचपलः**-असदसभ्यासमीक्ष्यादेशकालप्रलापि । उत्त० ३४७ ।

**भाषानियतं**-देशीभाषानियतम् । बृ० प्र० २०१ आ ।

**भाषार्याः**-पंचविधार्यभाषाव्यवहाराः । तत्त० ३-१५ ।

**भाषावाक्**- । नंदी० १८६ ।

**भाषासमितिः**-हितमितासन्दिग्धानवद्यार्थनियतभाषणम् । तत्त्वा० ६-५ ।

**भाष्यं**- । सम० १११ ।

**भासंत**-भास्यान्-विकसिततया मनोहरतया च देदीप्यमानः । जं० प्र० १०४ । जीवा० २६७ ।

**भासंति**-भाषन्ते-विशेषतः कथयन्ति । भग० ९८ । भाषन्ते व्यक्तवाचा । ठाणा० १३६ । भाषन्ते-सामान्यतः सदेवमनुजायां परिषदि अर्द्धमागधया सर्वसत्त्वस्वभाषानुगामिन्या भाषया भाषन्ते । आचा० १७९ ।

**भास**-भासः-सकुन्ताख्यः । बृ० प्र० १११ अ । अष्टाशीतौ महाग्रहे एकोनत्रिंशत्तमः । ठाणा० ७९ । भासः-सकुन्तः । प्रश्न० ८ । भस्म । उत्त० ५२६ । भस्म-अष्टाशीतौ महाग्रहे एकोनत्रिंशत्तमो महाग्रहः । जं० प्र० ५३५ । खलाः । नि० चू० प्र० ३४४ आ । भस्मेव भस्मवत् कुर्यात्-विनाशयेत् । ठाणा० ५२१ ।

**भासइ**-भाषते विशेषवचनकथनतः । जं० प्र० ५४० ।

**भासए**-भाषकः-भाषालब्धिमान् । भग० २५६ । भाषकः-भाषालब्धिसम्पन्नः । प्रज्ञा० १३६ ।

**भासग**-भाषकः-परिस्थूरमर्थमात्रमभिधत्ते । आव० ९६ ।

**भासजाया**-भाषाजाता-आचारप्रकल्पस्य द्वितीयश्रुतस्कन्धे चतुर्थमध्ययनम् । प्रश्न० १४५ ।

**भासज्जयणा**-आचाराङ्गे त्रयोदशममध्ययनम् । सम० ४४ ।

**भासज्जाया**-आचारप्रकल्पस्य त्रयोदशमभेदः । आव० ६६० ।

**भासण**-याचने । व्य० प्र० २०४ अ ।

**भासती**-पडिभणति । नि० चू० तृ० ८१ अ ।

**भासमाण**-भासमानं-स्निग्धत्वचा देदीप्यमानम् । जीवा० १८८ ।

**भासरासि**-भासानां-प्रकाशानां राशिः भासराशिः-आदित्यः । सम० १४० ।

**भासरासिवण्णाभ**-भस्मराशिवर्णाभं-शुक्लं राहुविमानम् । सूर्य० २८७ ।

**भासरासी**-भस्मराशिः-अष्टाशीतौ महाग्रहे त्रिंशत्तमः । जं० प्र० ५३५ । ठाणा० ७९ ।

**भासवण्णा**-भस्मवर्णा भाषा वा-पक्षिविशेषस्तद्वर्णाश्च । ज्ञाता० २३१ ।

**भासा**-भाषा-आचाराङ्गस्य त्रयोदशममध्ययनम् । उत्त० ६१६ । भाषा-षड्विधा गद्यपद्यभेदेन भिद्यमाना द्वादशधा । प्र० (?) । भाष्यते इति भाषा-तद्योग्यतया परिणामितनिसृज्यमानद्रव्यसंहतिः । प्रज्ञा० २४६ । भाषव्यक्तायां वाचि भाषणं भाषा व्यक्ता वाग् । विशे० ६१३ । भाषा । ठाणा० ३७३ । भाष्यते सा तया वा भाषणं वा भाषा काययोगगृहीतवाग्योगनिसृष्टभाषाद्रव्यसंहतिः । ठाणा० १८४ । अर्थमेकं भाषते तस्य भाषणं भाषा । बृ० प्र० ३४ अ । भाषा । विशे० ५९३ । भाष्यत इति भाषा तद्योग्यतया परिणामितनिसृष्टनिसृज्यमानद्रव्यसंहतिः । भग० १४२ । भाष्यत इति भाषा, वक्ता शब्दतयोत्सृज्यमाना द्रव्यसंहतिरित्यर्थः । विशे० २०७ । भाषा-प्रज्ञापनाया एकादशं पदम् । प्रज्ञा० ६ । भाषा भाषणात्, व्यक्तीकरणमिति । आव० ८७ । भगवत्यां त्रयोदशमशते सप्तम उद्देशकः । भग० ५९६ । भग० ५०० । भाष्यत इति भाषा वक्त्रात् शब्दतयोत्सृज्यमाना द्रव्यसंहतिः । आव० १४ ।

**भासाकुक्कुओ**-सविकारस्य हास्योत्पादकस्य वा वचसो



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्ता । बृ० तृ० २४७ अ ।

**भासाचञ्चलो**-भाषाचञ्चलः । बृ० प्र० १२४ अ ।

**भासाचरम**-भाषाचरमः-चरमभाषा । प्रज्ञा० २४६ ।

**भासाजड्डो**-जड्डस्स पढमो भेओ । नि० चू० द्वि० ३६ आ ।

**भासाजाय**-भाषाजातं-भाषाप्रकाररूपम् । प्रज्ञा० २६० ।

**भासापज्जत्ति**-भाषापर्याप्तिः-यया पुनः भाषाप्रायोग्याणि दलिकान्यादाय भाषात्वेन परिणमय्यालम्ब्य मुञ्चति । बृ० प्र० १८४ आ ।

**भासापद**-भाषापदं-प्रज्ञापनाया एकादशं पदम् । भग० १४२, ८५७ ।

**भासारिया**-भाषार्याः । प्रज्ञा० ५६ ।

**भासाविजता**-भाषा सत्यादिका तस्या विचयो-निर्णयो भाषाविचयः, भाषाया वा-वाचो विजयः-समृद्धिर्यस्मिन् स भाषाविजयः । ठाणा० ४६१ ।

**भासासमिइ**-भाषणं भाषा तद्विषया समितिः भाषासमितिः हितमितासन्दिग्धार्थभाषणम् । आव० ६१६ ।

**भासासमिती**-कक्कसणिट्ठुरकडुयफरुस-असम्बद्धबहुप्पलावदोसवज्जिता हियमणवज्जमितासंदेहणभिदोहधम्मा सा भासासमिती । नि० चू० प्र० १६ अ। ।

**भासिओ**-भाषितः-जनानामुक्तः । प्रश्न० ११५ । भासितः-प्रतिभासितः । प्रश्न० ११५ ।

**भासित्तए**-भाषितुं-वक्तुम् । भग० ७०७ ।

**भासियव्वं**-भाषितव्यं-हितमितमधुरादिविशेषणतः । ज्ञाता० ६२ ।

**भासुंडणा**-भ्रंशना । बृ० द्वि० १८० ।

**भासुज्जुयया**- । ठाणा० १९६ ।

**भासुद्देसए**-भाषोद्देषकः । प्रज्ञा० ५०२ ।

**भासुर**-भास्वरं-दीप्तिशालि । भग० १७५ । ब्रह्मलोके देवविमानविशेषः । सम० १३ ।

**भासुरवरबोंदिधरो**-भासुरवरशरीरधरः । आव० ३४८ ।

**भासुरा**-भास्वरा-छायायुक्ता । आव० १८५ ।

**भास्वन्त**-महोरगभेदविशेषः । प्रज्ञा० ७० ।

**भिंगंग**-भृताङ्गः वृक्षः । जं० प्र० १०१ । भृङ्गाङ्गः । आव० ११० ।

**भिंगंगओ**-भृङ्गाङ्गकः-द्रुमगणविशेषः । जीवा० २६६ ।

**भिंग**-भृतं-भरणं-पूरणम् । जं० प्र० १०० । ठाणा० ५१७ । भृङ्गो-नीलकीटः । जं० प्र० ११३ । भाजनदायिनः । सम० १८ । भृङ्गः-कीटविशेषः, अङ्गारविशेषो वा । भग० १० । ओप० ११ । भृङ्गः-कीटविशेषोऽङ्गारविशेषो वा । ओप० ११ ।

**भिंगनिभा**-भृङ्गनिभा-पुष्करिणी नाम । जं० प्र० ३६० ।

**भिंगपत्त**-भृङ्गपत्रं भृङ्गपक्षिणः पक्ष्म । प्रज्ञा० ३६० ।

**भिंगा**-भृतं-भरणं-पूरणं, तत्र अङ्गानि-कारणानि भृताङ्गानि-भाजनानि प्राकृतत्वात् भिंगा । ठाणा० ५१७ । भृङ्गा-पुष्करिणीनाम । जं० प्र० ३६० ।

**भिंगार**-भृङ्गारः । जीवा० २४४ । भृङ्गारः । जं० प्र० ४१० । भृङ्गारः-विशिष्टवर्णकचित्रोपेतः । जं० प्र० ४०३ । भृङ्गारः-मत्तकरिमहामुखाकृतिसमानं भृङ्गारम् । जीवा० २५४ । भृङ्गारः-वाद्यविशेषः । आव० १२२ । भृङ्गारः-कनकालुका । जं० प्र० २६२ । भृङ्गारः-कनकालुषा । जं० प्र० १०१ । भृङ्गारः-जलभाजनविशेषः । जं० प्र० १८३ । कलशः । आव० ६९५ । पक्षिविशेषः । ज्ञाता० ६९ ।

**भिंगारए**-भृङ्गारकः-कनकालुकः । जं० प्र० ५६ ।

**भिंगारओ**-भृङ्गारकः । जीवा० २१३ ।

**भिंगारकलस**-भृङ्गारकलशः । जीवा० २४८ ।

**भिंगारग**-भृङ्गारकः, पक्षिविशेषः । ज्ञाता० ६७ । पक्षिविशेषः । भृङ्गारिका च, या रसति निशिभूमौ द्रघकुल-शरीरेत्येवंलक्षणा । प्रश्न० ८ ।

**भिंगिरिडी**-भृङ्गिरिटिः-चतुरिन्द्रियजीवभेदः । उत्त० ६९६ ।

**भिंडमओ**-भिण्डमयः । आव० ३९७ ।

**भिंडिमाल**-भिण्डिमालः-प्रहरणविशेषः । जीवा० १०८ । भिण्डिमालः । प्रश्न० २१ । भिण्डिमालम् । ओप० ७१ । भिन्दिपालाः-हस्तक्षेप्याः महाफला दीर्घा आयुधविशेषाः । जं० प्र० २०६ ।

**भिंडिमालग्गं**-भिण्डिमालाग्रम् । जीवा० १०७ ।

**भिंडियालिंगं**-अग्नेराश्रयविशेषः । जीवा० १२३ ।

**भिंद**-भेदनं-द्वैधीभावोत्पादनम् । दश० २२८ । भिंद-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुन्तादिना भेदं विधेहि । ज्ञाता० २३८ ।
**भिदति**-भिन्दति-व्यभिचरति । प्रश्न० ८६ ।
**भिदिय**-विदार्य । भग० ६५४ ।
**भिभि**-ढक्का । ठाणा० ४६१ ।
**भिभिसार**-भिभि-ढक्का सा सारो यस्य स भिभिसारः । ठाणा० ४५८ ।
**भिउडि**-भृकुटिः-कोपविकृतभ्रूरूपा । जं० प्र० २०२ । भृकुटिः-दृष्टिरचनाविशेषः ललाटे । उपा० २३ । भृकुटिः-नयनललाटविकारविशेषः । प्रश्न० ४१ । कोपकृतो भृविकारः । ज्ञाता० १३८ ।
**भिउडी**-भृकुटिः-लोचनविकारविशेषः । विपा० ५३ । भृकुटी-भृविकारः । ज्ञाता० १४२ । आव० ५१४ । भ्रकुटी-आवेशवशकृतभृत्क्षेपरूपा । उत्त० ५५३ ।
**भिऊ**-भृगुः-लोकप्रसिद्धऋषिविशेषः । ओप० ९२ ।
**भिक्खंतगो**-भिक्षमाणः । आव० ४२१ ।
**भिक्ख**-भिक्षा । उत्त० ५३० । भिक्षाणां समूहो भैक्षम् । ठाणा० ४५२ ।
**भिक्खकूरो**-ओदणं । नि० चू० प्र० ३२८ अ ।
**भिक्खा**-भिक्षा-तुच्छमविज्ञातं वा । ओप० ३९ । आव० ८४४ ।
**भिक्खाए**-भिक्षामत्ति-अकति वा भिक्षादो भिक्षाकः । उत्त० २५१, २६४ ।
**भिक्खागकुल**-भिक्षाककुलं-भिक्षणवृत्तिः । ठाणा० ४२० ।
**भिक्खागा**-भिक्षाटाः-साधवः । आचा० ३५६ । भिक्षणशीला-भिक्षुकाः साधवः । आचा० ३३५ । भिक्षणशीला, भिक्षणधर्माणो भिक्षणे साधवो वा भिक्षाकाः । ठाणा० १८६ । भिक्षाकाः-गौरीपुत्राः । जं० प्र० १४२ । भिक्षामटन्ति-भिक्षाटाः भिक्षणशीलः साधवः । आचा० ३५५ ।
**भिक्खाणिज्जोग**-पडलापत्तगबंधो । नि० चू० प्र० १५७ अ ।
**भिक्खाणियं**-आहारं । नि० चू० प्र० ३२७ अ ।
**भिक्खातरित**-भिक्षार्थं चर्या-चरणमटनं भिक्षाचर्या-वृत्तिसंक्षेपरूपा । ठाणा० ३६४ ।
**भिक्खाभायण**-भिक्षाभाजनमिव भिक्षाभाजनं तदस्माकं भिक्षोरिव निर्वाहकारणमित्यर्थः । ज्ञाता० १८७ । भिक्षाभाजनम् । आव० ३७३ ।
**भिक्खायर**-भिक्षाचरः । आव० २२२ ।
**भिक्खायरिय**-भिक्षाचरिकः-वृत्तिसंक्षेपः । ओप० ३७ ।
**भिक्खायरिया**-भिक्षाचर्या । उत्त० ६०६ । भग० ९२१ भिक्षानिमित्तं विचरणम् । ज्ञाता० १८८ ।
**भिक्खायरियाभग्ग**-भिक्षाचर्याभग्नः-भिक्षाटनेन निर्विण्णः । आव० ५३७ ।
**भिक्खु**-भिक्षुः-मतविशेषः । आव० ८५६ । भिक्षुः-श्रमणः । भग० १२३ । भिक्षुः-भिक्षणशीलः भिनत्ति वाऽष्टप्रकारकर्मेति भिक्षुः । दश० ८४ । भिक्षुकः-मतविशेषः । आव० ६२७ । भिक्षु-आरम्भपरित्यागाद्धर्मकायपालनाय भिक्षणशीलो भिक्षुः, एवं भिक्षुरपि । दश० १५२ । भिक्षुः-अष्टप्रकारं कर्म्म तां ज्ञानदर्शनचारित्रतपोभिर्भिनत्तीति भिक्षुः । व्य० प्र० ३९ आ । भिक्खणसीलो । दश० चू० ३३ आ ।
**भिक्खुउत्तमा**-भिक्षूत्तम ! हे यतिप्रधान ! । उत्त० ५३० ।
**भिक्खुउवासगपुत्त**-बौद्धोपासकपुत्रः । आव० ८१२ ।
**भिक्खुओ**-भिक्षुकः-सौगतः । बृ० द्वि० ९० आ ।
**भिक्खुणी**-संजतीए तईयो भेओ । नि० चू० प्र० १३२ आ । भिक्षुणी-साध्वी । आचा० ३२१, ३५८ ।
**भिक्खुपडिमा**-भिक्षुप्रतिमा-भिक्षूचितोऽभिग्रहविशेषः । भग० १२४ । अभिग्रहविशेषः । ज्ञाता० ७३ । भिक्षुप्रतिमा-साध्वभिग्रहविशेषः । ठाणा० ३८७ । भिक्षुप्रतिमा-साधुप्रतिज्ञाविशेषः । भग० ४९८ ।
**भिक्खुभाव**-ज्ञानदर्शनचारित्राणि तृतीयव्रतादिकं वा । बृ० तृ० ५१ आ । भिक्षुभावः-चारित्रम् । व्य० द्वि० १९० अ ।
**भिक्खू**-भिक्षुः-भिक्षणं शीलं-धर्म्मः तत्साधुकारिता वा यस्य स, भिनत्ति वा क्षुधमिति भिक्षुः । ठाणा० १४७ । भिक्षणशीलः भिक्षुः-पचनपाचनादिसावद्यानुष्ठानरहिततया निर्दोषाहारभोजी । सूत्र० २७३ । 'भिदुरु विदारणे', क्षुध इति कर्म्मणः आख्या, तं भिनत्तीति भिक्षः, भिक्षणशीलो वा, भिक्षभोगी वा । नि० चू० तृ० ८५ अ । 'भिदिर्विदारणे' क्षुध इति कर्मण आख्यानं, ज्ञानावरणादिकर्म्मं भिनत्तीति भिक्षुः । नि० चू० प्र० १०३



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अ । भिक्षुः-भिक्षणशीलः, भिनत्ति वाऽष्टप्रकारं कर्मेति दान्तादिगुणोपेतः भिक्षुः-साधुः। सूत्र० १६३ । भिक्षुः-निरवद्याहारतया भिक्षणशीलो भिक्षुः । सूत्र० २९८ । भिक्षत इत्येवंधर्मा तत्साधुकारी चेति भिक्षुः, परदत्तोपजीवी व्रती । उत्त० २४६ । भिनत्ति-यथाप्रतिज्ञातेनानुष्ठानेन क्षुधमष्टविध वा कर्मेति भिक्षुः । उत्त० ३५७ । बुद्धदर्शनाश्रितः । अनु० १४६ ।

**भिक्खोंड**-ये भिक्षामेव भुञ्जते न तु स्वपरिगृहीतगोदुग्धादिकं ते भिक्षोण्डाः, सुगतशासनस्था इत्यन्ये । अनु० २५ ।

**भिक्षा**-दत्तिरभिप्रेता । सम० ८८

**भिक्षाकुल**- । ठाणा० ३१२ ।

**भिक्षाचारी**- । ठाणा० ३४२ ।

**भिक्षुकाः**-शौद्धोदनीयादि । व्य० प्र० १६५ अ ।

**भिक्षुकी**-साध्वी । पिण्ड० ४ ।

**भिक्षूपचरक**-श्रावकविशेषः,यस्य मिथ्यादर्शनशल्ये दृष्टान्तः। आव० ५७९ ।

**भिगंगा**-भृतं-भरणं पूरणमित्यर्थः, तत्राङ्गानि-कारणानि, न हि भरणक्रिया भरणीयं भाजनं वा विना भवतीति तत्सम्पादकत्वात् वृक्षा अपि भृताङ्गाः । जं० प्र० १०१ । द्रुमगणविशेषः । जं० प्र० १०० ।

**भिगु**-भृगुः-राजिः । ओघ० १३७ । भृगुः-इषुकारनृपतिपुरोहितः । उत्त० ३९५ । भृगुः-प्रपातस्थानम् । जीवा० २८२ ।

**भिगुच्च**-भृगुः-लोकप्रसिद्ध ऋषिविशेषस्तस्यैते शिष्या इति भार्गवः । औप० ९१ ।

**भिगुण**-दितडी । नि० चू० द्वि० ५२ अ ।

**भिगप्पभा**-भृङ्गप्रभा-पुष्करिणीनाम । जं० प्र० ३३५ ।

**भिङ्गए**-भृङ्गः-पक्षिविशेषः पक्ष्मलः । प्रज्ञा० ३६० ।

**भिच्च**-भृत्यः-पदातिः । उत्त० ४०५ । प्रश्न० ४७ ।

**भिज्छुंड**-भिक्षाण्डः-भिक्षाभोजी । ज्ञाता० १९५ ।

**भिच्छुंडग**- । आचा० ४२१ ।

**भिच्छुप्पियं**-भिक्षुप्रियं पलाण्डु । बृ० तृ० २१२ अ ।

**भिज्ज**-भेदः-तोमरादिना शारीरादिविषयो भेदः । भग० १९ । अभि-व्याप्ता, विषयाणां ध्यानं तदेकाग्रत्वमभिध्या पिधानादिवदकारलोपाद्भिध्या । भग० ५७३ ।

**भिज्जति**-भिद्यते प्राक्तनसम्बन्धविशेषत्यागात् । भग० २५४ । भिद्यते-भेदवान् भवति । भग० २४ ।

**भिज्जा**-लोभः । बृ० तृ० २४६ अ । लोभः । ठाणा० २७५, ३७४ । गृद्धिः । ठाणा० २७५ । अभिध्यानम् । सम० ७१ ।

**भिज्जेज्ज**-भिद्येत-अनेकधा विदार्येत । अनु० १६१ ।

**भिज्झा**-भिध्या-लोभः । भग० २५३ ।

**भिणासि**-भेनाशितः पक्षिविशेषः । प्रश्न० ८ ।

**भिणिभिणंत**-गुञ्जन् । तं० ।

**भिण्डः**- । आचा० १९७ ।

**भिण्डमाल**-शस्त्रजातिविशेषः । जीवा० १२० ।

**भिण्ण**-अदसागं । नि० चू० प्र० १४० अ । सदसं सगलं ण भवति । नि० चू० तृ० ४६ अ ।

**भिण्णपिंड**-मिश्रपिंडं-घृतादिना मिश्रितम् । व्य० द्वि० ११ अ ।

**भिण्णरहस्स**-रहस्सं णं धारयति । नि० चू० प्र० १०२ आ । जो अववादपदं अण्णेसिं कप्पियाणं साहति । नि० चू० तृ० १४९ अ ।

**भिण्णवासं**- । नि० चू० तृ० ६९ आ ।

**भिण्णागार**-देसे पडियसडियं । नि० चू० प्र० २६५ अ ।

**भितग**-भृतकः-कर्मकरः । अनु० १५४ ।

**भिति**-भृतिः-पदात्यादीनां वृत्तिः । अनु० १५४ ।

**भित्तं**-अद्धं । नि० चू० द्वि० १२४ आ ।

**भित्ति**-णदि तडो तो जाव वट्टलिया सा भत्ती । दश० चू० ११९ आ । पक्वेष्टकादिरचिता । उत्त० ४२५ । अनु० १५४ । प्रकारवरण्डिकादि भित्ति पर्वतखण्डं । भग० ६४३ । भित्तिः-नदीतटी । दश० १५२ । भित्तिः-तटी । दश० २२८ ।

**भित्तिगुलिया**-भित्तिगुलिकाः-पीठकसंस्थानीयाः । जीवा० २०४ । पीठकसंस्थानीयाः । जं० प्र० ४६ । भित्तिगुलिकाः-भित्तिसत्का पीठिका । जीवा० ३५६ । भित्तिगुलिका-पीठकस्थानीया । राज० ६२ ।

**भित्तिमूल**-कुड्यैकदेशादि । दश० १७८ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भित्तिल्लं**-आनतकल्पे देवविमानविशेषः । सम० ३८ ।
**भित्ती**-तडो-नदी । दश० चू० ६८ अ ।
**भिन्देज्जा**-भिन्द्यात् काणताकरणेन । उपा० ४२ ।
**भिन्न**-णूमं । नि० चू० द्वि० ७० आ । प्रकाशितम् । बृ० तृ० २६५ आ । छिद्रं राजीयुक्तं वा । बृ० द्वि० २४४ आ । भिन्नो नाम तत्कालमरणिनिर्म्मथनेनोत्पादितोऽग्निः । व्य० प्र० १०१ आ । भिन्नः-खण्डीकृतः । उत्त० ४६१ । भिन्न-राजियुक्तं सच्छिद्रं वा । ओघ० २११ । भिन्नं-राजिमान् । विशे० ६३० । भिन्नं-गलत् । ओघ० १६५ । भेदः-कर्मणः शुभाशुभस्य वा तीव्ररसस्यापवर्त्तनाकरणेन मन्दताकरणम् । मन्दस्य चोद्वर्त्तनाकरणेन तीव्रताकरणम् । भग० १६ । भिन्नः-काष्ठाद्युपहतशब्दवत् । ठाणा० ४७१ । भिन्नः-खण्डः, अंशसहितः । सूर्य० १५६ । भिन्नः-व्युद्ग्राहितः । व्य० प्र० २०० आ ।
**भिन्नकहा**-भिन्नकथा-रहस्यालापः, मैथुनसम्बद्धं वचो वा । सूत्र० १०७ । मैथुनसम्बद्धा राभसिला कथा । ओघ० ५५ ।
**भिन्नकुट्ठी**-गलत्कुष्ठः । ओघ० १६५ ।
**भिन्नदाढ**-भिन्नदंष्ट्राकः । पिण्ड० ६९ ।
**भिन्नद्रव्यसम्यक्**-दधिभाजनादि भिन्नं सत् काकादि समाधानोत्पत्तेर्भिन्नद्रव्यसम्यक् । आचा० १७६ ।
**भिन्नपिंडवाइय**-भिन्नस्यैव-स्फोटितस्यैव पिण्डस्य-ओदनादिपिण्डस्य पातः-पात्रक्षेपो यस्य ग्राह्यतयाऽस्ति स भिन्नपिण्डपातिकः । प्रश्न० १०६ ।
**भिन्नपिंडपातित**-भिन्नस्यैव-स्फोटितस्यैव पिण्डस्य सक्तुकादिसम्बन्धिनः पातो-लाभो यस्यास्ति स भिन्नपिण्डपातिकः । ठाणा० २९८ ।
**भिन्नपुण्णचाउद्दस**-भिन्ना-परतिथिसङ्क्रमेन भेदं प्राप्ता या पुण्यचतुर्दशी तस्यां जातः । जं० प्र० २०२ ।
**भिन्नमार्गः**- । सम० ८४ ।
**भिन्नमुहुत्त**-खण्डो मुहूर्त्तो, अन्तर्मुहूर्त्तम् । जीवा० १० ।
**भिन्नरहस्सा**-भिन्नरहस्याः-विश्वस्तजनकथितरहस्यभेदिनः । उत्त० ५४६ ।
**भिन्नवास**-भिन्नवर्षं-बुद्बुदादि । आव० ७३२ ।
**भिन्ना**-विदारितास्तदभिघातेन लवमात्रीकृता इति । उत्त० ५०७ ।
**भिब्भिसमच्छ**-मत्स्यविशेषः । जीवा० ३६ ।
**भिब्भिसमाण**-अतिशयेन दीप्यमानम् । जीवा० ३५६ । आचा० ४२३ । अत्यर्थं देदीप्यमानम् । जं०प्र० २९२ ।
**भियग**-भृतकः-य आबालत्वात्पोषितः । ज्ञाता० ८६ । भृतकः-नियतकालमधिकृत्य वेतनेन कर्मकरणाय धृतः । जीवा० २८० ।
**भिलिंगसूव**-सस्नेहसूपः । व्य० द्वि० १३५ आ ।
**भिलिंजए**-अभ्यङ्गाय ढौकयस्व । सूत्र० ११७ ।
**भिलुगा**-स्फुटितकृष्णभूराजिः । आचा० ३३८ । राइ । दश० चू० १०१ आ । तथाविधभूमिराजिविशेषः । दश० २०५ ।
**भिलुगाणि**-श्लक्ष्णभूमिराजयः । आचा० ४११ ।
**भिल्ल**- । नि० चू० प्र० १३८ आ ।
**भिल्ला**- । जं० प्र० १९४ ।
**भिल्लाए**-भल्लातकः यस्य भल्लातकाभिधानानि फलानि लोकप्रसिद्धानि । प्रज्ञा० ३१ ।
**भिसंत**-भासमानम् । जं० प्र० ५२८ । दीप्यमानः । ज्ञाता० ५८ । ओप० ५३ । भासमानः स्निग्धत्वचा दीप्यमानः । जं० प्र० २६ । दीप्यमानो विमलः । जं० प्र० २६३ ।
**भिस**-जलरुहविशेषः । प्रज्ञा० ३३ । खाद्यविशेषः । जं० प्र० ११८ । बिसं-पद्मिनीकन्दः । जं० प्र० ३१ । पद्मकन्दमूलम् । आचा० ३४८ । पद्मिनीमूलम् । ज्ञाता० ९८ । बिसं-पद्मिनीकन्दः । राज० १३ । कन्दः । राज० १८, ७८ । बिशं-कन्दः । जं० प्र० ४२, २९१ ।
**भिसकंदए**-भिसकन्दः । प्रज्ञा० ३६४ ।
**भिसग**-गणविशेषः । ज्ञाता० १५४ । नि० चू० प्र० ६२ आ ।
**भिसमाणा**-दीप्यमाना । भग० ४७८ । आचा० ४२३ । दीप्यमानम् । जीवा० १९६, ३५६ ।
**भिसमुणाल**-पद्मकन्दोपरिवर्त्तिनी लता । आचा० ३४८ । जलरुहविशेषः । प्रज्ञा० ३३ ।
**भिसिगा**- । नि० चू० प्र० २०८ अ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भिसिणी**-बिसिनी-पद्मिनी । आव० १२८ ।
**भिसिमाविं**-कट्ठमयं । नि० चू० द्वि० ६२ आ ।
**भिसिय**-भृशिका आसनविशेषः । भग० ११३, ११६ ।
**भिसियग**- । नि० चू० प्र० ३४७ आ ।
**भिसिया**-वृषिका काष्ठमयं वा । बृ० द्वि० २११ अ । वृषिका-उपवेसनपट्टिका । औप० ९५ । उवेसणयं । दश० चू० १११ अ । आसनविशेषः । ज्ञाता० ४४ । भग० ५४८ । आसनम् । ज्ञाता० १४२ ।
**भिसिरा**-मत्स्यबन्धविशेषः । विपा० ८१ ।
**भीअं**-उत्त्रस्तं-यत् उत्रस्तेन मनसा गीयते तद्भीतपुरुष-निबन्धनत्वात् तद्धर्मानुवृत्तत्वाद्भीतमुच्यते । (?) ।
**भीअपरिकहण**-भीतानां परिकथनं भीतपरिकथनम् । आव० १३२ ।
**भीइपरिकहण**-भीत्या परिकथनं भीतिपरिकथनम् । आव० १३२ ।
**भीए**-भीतः-उत्पन्नसाध्वसः । उत्त० ४६१ ।
**भीओ**-भीतः-त्रस्तः । उत्त० १०९ ।
**भीम**-विकरालः । ठाणा० ४६१ । कर्मशत्र्वपेक्षया रौद्रम् । दश० १९२ । भीष्मः । ज्ञाता० ८९ । विकरालः-भयानकम् । आव० ६३४ । भीमः-राक्षसेन्द्रः । जीवा० १७४ । भीमः-भयानकः । भीमत्वादेव उत्त्रासनकः । जीवा० १०६ । प्रतिवासुदेवनाम । सम० १५४ । भीमः-दक्षिणनिकाये चतुर्थो व्यन्तरेन्द्रः । भग० ११८ । राक्षसेन्द्रः । ठाणा ८५ । भीमः-हस्तिनापुरे कूटग्राही । विपा० ४८ । कुन्ताग्रभिक्षाभिग्रहः पाण्डवः । मर० ।
**भीमसेण**-भरतक्षेत्रेऽतीतायामुत्सर्पिण्यां षष्ठः कुलकरः । ठाणा० ५१८ । सम० १५० । पाण्डुनृपस्य पुत्रः । ज्ञाता० २०८ ।
**भीमा**-वसन्तपुरप्रत्यासन्ना पल्ली । पिण्ड० ४८ । भीमाः-राक्षसविशेषाः । प्रज्ञा० ७० ।
**भीय**-भीतं-उत्त्रस्तम् । गीतविशेषः यदुत्त्रस्तेन गीयते । जीवा० १९४ । भीतं-उत्त्रस्तमानसम् । अनु० १३२ ।
**भीया**-भीतं-जातभयाः । भग० १६६ । त्रस्तमानसम् । ठाणा० ३९६ । त्रस्ताः । उद्विग्नाः । ज्ञाता० ९७ । भीताः । विपा० ४३ ।

**भीरु**-भीरुः-अकृतकरणः । सूत्र० ८९ ।
**भीरुदुंदुउ**-भारवाहकः । नि० चू० प्र० १४९ आ ।
**भील**-गुच्छाविशेषः । प्रज्ञा० ३१ ।
**भीष्मः**-कुण्डिनीनगर्यधिपतिः । प्रश्न० ८८ ।
**भुंजंति**-नि० चू० तृ० २३ अ ।
**भुंजति**-भुज्यति । आव० ६५१ ।
**भुंजमाण**-भुञ्जन्-पालनां कुर्वन् । दश० १७१ । भुञ्जानः-अनुभवन् । जं० प्र० २२२ ।
**भुंजसु**-भुङ्क्ष्व-समुद्दिश । बृ० तृ० गा० ६०७१ ।
**भुंजियव्व**-भोक्तव्यं वेदनादिकरणतो । अङ्गारादिदोष-रहितः । ज्ञाता० ६१ ।
**भुंजोआ**-भुक्तवन्तः । आव० १३० ।
**भुंदणघडियं**-वर्धकिः । नि० चू० प्र० २४४ आ ।
**भुंभलय**-शेखरः । उपा० २२ ।
**भुअपरिसप्पा**-भुजाः-शरीरावयवविशेषास्तैः परिसर्पन्तीति भुजपरिसर्पाः । उत्त० ६९९ ।
**भुअमोअग**-भुजमोकः-रत्नविशेषः । जं० प्र० ११३ ।
**भुकुंडेति**-उद्धूलयति । भग० ४७७ ।
**भुकुडति**-भूकुडति-उद्धूलयति । जं० प्र० २७५ ।
**भुक्खे**-बुभुक्षावशेन रूक्षीभूतः । ज्ञाता० ७६ ।
**भुक्खा**-बुभुक्षाक्रान्ता । ज्ञात० ३३ ।
**भुक्खियतिसिया**-बुभुक्षिततृषिता । आव० २३७ ।
**भुग्ग**-भुग्नः-वक्रः । उपा० २२ । भग्नः । ज्ञाता० १३७ ।
**भुग्गभग्गे**-अतीव वक्रे भ्रुवौ यस्य तत् । ज्ञाता० १३७ ।
**भुजग**-महोरगभेदविशेषः । प्रज्ञा० ७० ।
**भुजगनिर्मोक**-भुजककञ्चुकी । उत्त० ३८१ ।
**भुजङ्गजन**-गणिकादृष्टान्ते दृष्टान्तः । विशे० ४३७ ।
**भुजपरिसर्प**-परिसर्प्पभेदः । सम० १३५ ।
**भुजा**-भुजः-हस्ताग्रः । प्रज्ञा० ६१ ।
**भुजो**-प्राक्पादयोर्जानूपरिभागः । जं० प्र० २३७ ।
**भुज्जई**-भुज्यते-भक्तसूपादि । उत्त० ३६० ।
**भुज्जा**-भोजिताः । उत्त० ४०० ।
**भुज्जिय**-भृष्टम् । आव० ८५५ । अग्न्यर्द्धपक्वं गोधूमादेः शीर्षकमन्यद्वा तिलगोधूमादि । आचा० ३२३ ।
**भुज्जो**-भूयः-प्राचुर्ये । उत्त० २५२ । भूयः-अतिशयेन



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुबहून् वारानित्यर्थः । उत्त० २७७ । भुयोभुयः-पुनःपुनः । भग० २२ ।

**भुत्त**-यद् भुक्तं सत्पीडयति तद् भुक्तमित्युच्यते । ठाणा० ३७५ ।

**भुत्तभोगा**-इत्थिभोगा भुंजिउं पव्वइयाति ते भुत्तभोगा। नि० चू० प्र० १०७ आ ।

**भुत्तुअं**-परिभोक्तुम् । दश० १७८ ।

**भुत्तणुभुत्ते**-भुक्तानुभुक्तः-द्वयादीन् वारान् भुक्तवन्तः । बृ० प्र० २६४ आ ।

**भुत्तुय**-अनार्यविशेषः । भग० १७० ।

**भुयंगवती**-अतिकायेन्द्रस्य द्वितीयाऽग्रमहिषी । भग० ५०१ ।

**भुयंगा**-अतिकायेन्द्रस्य प्रथमाऽग्रमहिषी । भग० ५०५ । कीटिकाभक्षितो द्वितीयो बलयक्षः । मर० ।

**भुयग**-भुजङ्गः, भोगी । औप० ५ । ज्ञाता० ४ । भोजकः। ज्ञाता० ४ ।

**भुयगवती**-पञ्चमवर्गस्य षड्विंशतितममध्ययनम् । ज्ञाता० २५२ । ठाणा० २०४ ।

**भुयगवर**-भुजगवरः-अपान्तराले द्वीपः। जीवा० ३६८ ।

**महरिह**-महार्घ-बहुमूल्यं, अथवा महान्-चक्रवर्ती तस्य अर्हं-योग्यम् । जं० प्र० २४१ । महं-उत्सवमर्हतीति-महार्हः । जं० प्र० २७३ । महार्हः-महार्घम् । जं० प्र० ८२ । महार्हाः-महोत्सवार्हाः । जं० प्र० १०२ । महं उत्सवमर्हतीति महार्हः । जीवा० २४३ । महार्हः-महोत्सवार्हः । जीवा० २६७ । महं-उत्सवमर्हतीति महार्हः । राज० १०२ । महतां योग्यः । ज्ञाता० ५६ ।

**महलयसीहणिक्कीलियं**-महासिंहनिक्रीडितं तपोविशेषः । अन्त० २८ ।

**महलू**-तपनीयपट्टम् । जं० प्र० २११ ।

**महल्ल**-महान् । आव० १०६, ३१८, ६५४ । महानु वृद्धः । उत्त० १९३ । वृद्धः । आव० ७६ । बृहत्तरम् । बृ० तृ० ६४ अ । महत् । आव० ३०५ । महत्-महाप्रमाणम् । दश० २१७ । महत्तमम् । भक्त० ।

**महल्लए**-महति । आव० ५५७ । आर्यरक्षितपिता । उत्त० ८४ ।

**महल्लपयोयण**-महत्प्रयोजनः-महत्तराकारः । आव० ८४३ ।

**महल्लपिड**-पितृव्यः । आव० १७३ ।

**महल्लया**-महता भण्डकेन । ओघ० १६९ । महत्प्रमाणं-भाजनम् । ओघ० १६६ ।

**महल्लि**-महती । आव० २०० ।

**महल्ली**-महती । आव० ४१६ ।

**महव्वाइ**-महावादी । दश० ५३ ।

**महसिव**-षष्ठबलदेववासुदेवयोः पिता । सम० १५२ ।

**महसुक्क**-महाशुक्रः-वासुदेवागमनकल्पः । आव० १६३ ।

**महसेण** मुकुटबद्धराजा । भग० ६१८ । मल्लीसहप्रव्राजकोऽष्टमकुमारः । ज्ञाता० १५२, २०७ । बलवर्गशाहश्लोकः । अन्त० २ । चन्द्रप्रभजिनपिता । सम० १५० । महासेनः-सुप्रतिष्ठनगरनृपतिः । विपा० ८२ । महासेनः-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रप्रभापता । आव० १६१ ।

**महसेणवणुज्जाण**–महसेनवनोद्यानं–क्षेत्रम्, अनन्तरनिर्गमसामायिकक्षेत्रम् । आव० २७६ ।

**महंधकार**–महान्धकारं- महातमोरूपम् । भग० २७० ।

**महा**–अष्टमं नक्षत्रम् । ठाणा० ७७ । मघाः–महामेघाः । जीवा० ३८७ । मघा–मण्डिकपुत्रजन्मनक्षत्रम् । आव० २५५ । महान्–प्रधानः प्रभूतो वा । आव० ५९६ । बृहत् । उत्त० ३६६ । महत्–प्रभूतम् । जीवा० १२८ । महत्–भवनपति व्यन्तरेभ्योऽतिप्रभूतम् । ओघ० २१८ । महत्–प्रशस्तमात्यन्तिकं वा । ठाणा० १७१ । महान्–अविच्छिन्नयशवस्त्युपेतः । नंदी० २३ । महान्–कषायोपसर्गपरिषहेन्द्रियादिशत्रुगणजयादतिशायी । नंदी० २३ । महत् पूर्वम् । दश० चू० ४० अ । बाहुल्ले । दश० चू० १११ ।

**महाओहस्सरा**–महौघस्वरा–बलीन्द्रस्य घण्टा । ज० प्र० ४०७ ।

**महाकंदिय**–महाक्रन्दितः–व्यन्तरनिकायानामुपरिवर्तिव्यन्तरजातिविशेषः । प्रज्ञा० ९८ । महाक्रन्दितः–वाणमन्तरविशेषः । प्रज्ञा० ६५ ।

**महाकच्छ**–विजयविशेषः । ज० प्र० ३४६ । महाकच्छः–ऋषभप्रभोः शिष्यः । आव० १४३ । श्रीऋषभस्वामिनो महापाम तः । ज० प्र० २५२ ।

**महाकच्छकूड**–महाकच्छकूट–पद्मकूटवक्षस्कारे तृतीय कूटनाम । ज० प्र० ३४६ ।

**महाकच्छा**– । ठाणा० ८० । अतिकायमहोरगेन्द्रस्य तृतीयाग्रमहिषी । ठाणा० २०४ । अतिकायस्य तृतीयाग्रमहिषी । भग० ५०५ । धर्मकथायाः पञ्चमवर्गस्य सप्तविंशतितममध्ययनम् । ज्ञाता० २५२ ।

**महाकण्ह**–निरयावल्यां प्रथमवर्गे षष्ठममध्ययनम् । निरय० ३ ।

**महाकण्हा**–महाकृष्णा–अन्तकृद्दशानामष्टमवर्गस्य षष्ठमध्ययनम् । अन्त० २५ । महाकृष्णा–सर्वतोभद्रप्रतिमाकारिका । अन्त० २९ ।

**महाकप्पसयसहस्सा**– । भग० ६७४ महाकल्पशतसहस्रम् । भग ६७४ ।

**महाकप्पसुयं**–महाग्रन्थं महार्थम् । नंदी० २०४ ।

**महाकप्पसुया**– । नि० चू० तृ० ६७ ।

**महाकम्मतर**–विधायमानानलापेक्षयाऽतिशयेन महान्ति कर्माणि-ज्ञानावरणादीनि बन्धमाश्रित्य यस्यासौ महाकर्मतरः । भग० २२९ ।

**महाकल्प**–श्रुतधरविशेषः । आव० ३३१ ।

**महाकहापडिवन्न**–महाकथाप्रतिपन्नः–महाकथाप्रबन्धः । भग० ३२५ ।

**महाकाए**–महोरगेन्द्रः । ठाणा० ८५ । महाकायः–उत्तरनिकाये सप्तमो व्यन्तरेन्द्रः । भग० १५८ ।

**महाकाओ**–पंचिदिओ । नि० चू० तृ० ७२ अ । महाकायः–मूषकादिः । आव० ७४१ ।

**महाकादम्बा**–गन्धर्वभेदविशेषः । प्रज्ञा० ७० ।

**महाकाय**–महाकायः–महोरगः । जीवा० १७२ । महाकायः–महोरगेन्द्रः । जीवा० १७४ । महाकायः–सञ्जातः प्रीणितश्च । दश० २१७ ।

**महाकाया**–महोरगभेदविशेषः । प्रज्ञा० ७० ।

**महाकाल**–भीतपरिगृहीताऽर्हत्प्रतिमा । आव० ८११ । देवविमानविशेषः । सम० ३५ । श्मसानविशेषः । अन्त० ११ । महाकालः–पञ्चदशसु परमाधार्मिकेषु अष्टमः । उत्त० ६१४ । महाकालः–अष्टमपरमाधार्मिकः । आव० ६५० । महाकालः–केयूपाभिधपातालकलशे देवविशेषः । जीवा० ३०६ । अवन्त्यां महाकालश्मशानः । ठाणा० प्र० १४९ आ । महाकालः–लोकीकैः परिगृहितं चैत्यम् । आव० ६७० । निरयावल्यां प्रथमवर्गे तृतीयमध्ययनम् । निरय० ३ । महाकालः–अष्टमपरमाधार्मिकः । सूत्र० १२४ । अष्टाशितीमहाग्रह एकोनषष्ठीतममहाग्रहः । ठाणा० ७९ । पिशाचेन्द्रः । ठाणा० ८५ । वायुकुमारस्य द्वितीयो लोगपालः । ठाणा० १९८ । त्रिपलियोपमस्थितिको देवः । ठाणा० २२६ । चक्रवर्त्तेः सप्तमनिधिः । ठाणा० ४४८ । महाकालः–उत्तरनिकाये प्रथमो व्यन्तरेन्द्रः । भग० १५७ । महाकालः–पिशाचेन्द्रः । जीवा० १७४ । महाकालः–तमतमापृथिव्यां द्वितीयो महानिरकः । प्रज्ञा० ८३ । महाकालः–अष्टशीतौ सप्तपञ्चाशत्तमो महाग्रहः । ज० प्र० ५३५ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाकाल-पिशाचभेदविशेषः । प्रज्ञा० ७० ।
महाकालप्पभ-कालवालस्योत्पातपर्वतः । ठाणा० ४८२ ।
महाकलिदा-धर्मकथायाः षष्ठमवर्गे अग्रमहिषी । ज्ञाता० २५२ ।
महाकालि-महाकालनिधिः । जं० प्र० २५८ ।
महाकाली-अन्तकृद्दशानां अष्टमवर्गस्य तृतीयमध्ययनम् । अन्त० २५ । आर्याविशेषः । अन्त० २८ ।
महाकिण्हा-नदीविशेषः । ठाणा० ४७७ ।
महाकुमुद-देवविमानविशेषः । सम० ३३ ।
महाकुम्भीय-महाकुम्भी-महत्युखा । प्रश्न० १४ ।
महाकुष्ठ-द्वितीयं क्षुद्रकुष्ठम् । प्रश्न० १६१ । एकादश-क्षुद्रकुष्ठी द्वितीयः । आचा० २३५ ।
महागंगा-सप्तगंगा । भग० ६७४ ।
महागरा-महाकराः-ज्ञानादिभावरत्नापेक्षया आचार्यः । दश० २४६ ।
महागिरि-महागिरिः-योगसंग्रहे निभितोपधानदृष्टान्ते आर्य-स्थूलभद्रस्य ज्येष्ठः शिष्यः, उपाध्यायः । आव० ६६८ । तन्नामाचार्यः । विशे० ९२७ । एलापत्यगोत्रवान् आचार्यः । नंदी० ४९ । एलपत्यगोत्रवान् । (?) ।
महागिरी-महागिरिः-मिथिलायामाचार्यः । उत्त० १६३ । धणगुप्तगुरुवः । उत्त० १६५ । महागिर्याचार्यः-मिथि-लानगर्यां लक्ष्मीगृहे आचार्यः । आव० ३१६ ।
महागिहं-महपाहन्ने बहुत्ते वा, महंतं गिहं महागिहं, बहुसु वा उच्चारएसु महागिहं । नि० चू० प्र० २६५ अ ।
महागुल्मिकं-जातिभेदः । जीवा० १३६ ।
महागोव-भगवन्तेव षट्कायरक्षणार्थं यतः प्रयत्नं चक्रुस्तेन महागोवापोच्यन्ते । आव० ३८३ । श्रमणस्य भगवतो महावीरस्य गोशालककृतोपमा, गोपो-आरक्षकः स चेतरगोरक्षकेभ्योऽतिविशिष्टत्वान्महानिति महागोपः । उपा० ४५ ।
महाघोष-ओदीच्येन्द्रस्य लोकपालः । ठाणा० २०५ ।
महाघोस-देवविमानविशेषः । सम० १२ । लान्तककल्पे देवविमानविशेषः । सम० १७ । महाघोषः-स्तनितकुमाराणामिद्रः । प्रज्ञा० ९४ । महाघोषः-नरके पञ्चदशमपरमाधार्मिकः । आव० ६५० । महाघोषः-पञ्चदशमपरमाधार्मिकः । उत्त० ६१४ । महाघोषः-उत्तरनिकाये दशम इन्द्रः । जीवा० १७१ । महाघोषः-स्तनितकुमारेन्द्रः । ठाणा० ८५ । महाघोषः-अतीतोत्सर्पिण्यां सप्तम कुलकरः । ठाणा० ३९८ । जम्बूद्वीपे भरतक्षेत्रेऽतीतायामुत्सर्पिण्यां सप्तम कुलकरः । सम० १५० । जम्बूद्वीपे ऐरवतवर्षे-आगमिण्यामुत्सर्पिण्यां द्वादशमस्तीर्थंकरः । सम० १५४ । महाघोषः-उत्तरनिकाये दशम इन्द्रः । भग० १५७ । महाघोसं-धर्मघोषगाथापति नगरम् । विपा० ९५ । महाघोषः-पञ्चदशमपरमाधार्मिकः । सूत्र० १२४ । सम० २९ ।
महाघोसा-महाघोषा-इशानेन्द्रस्य घण्टा । जं० प्र० ४०५ ।
महाचंद-जम्बैवरवते आगाम्यष्टम तीर्थंकृतः । सम० १५४ ।
महाजण-महाजनः । दश० १०५ ।
महाजणट्ठाण-सिंघाडगट्ठाणं णीतो चउक्कं वा आरामाउ वा गामंणीतो एतेसु महाजणट्ठाणेसु । नि० चू० द्वि० १३४ अ ।
महाजणणाओ-महाजनज्ञातः-महानिनादः । आव० ६३८ ।
महाजस-महद् यशः-ख्यातिर्येषां ते महायशाः । सूर्य० २८६ । ठाणा० ४३० । जम्बूद्वीपे ऐरवतवर्षे आगमिण्या-मुत्सर्पिण्यां चतुर्थः तीर्थंकरः । सम० १५४ ।
महाजाइगुम्मा-महाजातिगुल्माः । जं० प्र० ९८ ।
महाजाई-गुल्मविशेषः । प्रज्ञा० ३२ ।
महाजाण-महद्यानम्-महच्च तद्यानं च महद्यानं-सम्यग्-दर्शनादित्रयं यस्य स महायानो-मोक्षः । महायानः-महच्च तद्याने च महायानं-मोक्षः । आचा० १७२ ।
महाजातिगुम्म-गुल्मविशेषः । जीवा० १४५ ।
महाजुद्ध-महायुद्धं-परस्परं मार्यमाणकतया युद्धम् । जीवा० २८३ ।
महाजुद्धाई-महायुद्धानि-व्यवस्थाहीनाः महारणाः । जं० प्र० १२५ ।
महाजुम्मा-महान्ति च तानि युग्मानि च महायुग्मानि । भग० ९६४ ।
महाणंदियावत्त-महाशुक्रे देवविमानविशेषः । सम० ३२ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

घोषस्य लोकपालः । ठाणा० १९८ ।

**महाण**-महाजनो-गच्छः । बृ० द्वि० २४० आ । महाजनः-समस्तसङ्घः । व्य० प्र० २३५ । महाजनः । मर० ।

**महाणक्खत्त**-मघानक्षत्रम् । सूर्य० १३० ।

**महाणदी**-महानदी-गुरुनिम्नगा । ठाणा० ३०९ ।

**महाणस**-उवक्खडसाला । नि० चू० प्र० २७२ आ ।

**महाणससाला**-माहनससाला-रसवतीगृहाणि । ज्ञाता० १५० ।

**महाणसिण**-महानसे नियुक्ता महानसिकी । ज्ञाता० ११९ । महानसिनी । आव० २१५ ।

**महाणिणाओ**-महानिनाद इति महाजनज्ञातः । आव० ६३८ ।

**महाणिणादो**-महांनिनादो-महाजनज्ञातः । बृ० तृ० १४७ आ ।

**महाणुभाग**-महानुभागः-महाप्रभावः । भग० १२१ ।

**महाणुभागा**-महानुभागा-सातिशयमाहात्म्या । उत्त० ३७० ।

**महाणुभाव**-महान्-प्रधानः प्रभूतो वाऽनुभावः-सामर्थ्यादिलक्षणो यस्य स महानुभावः । आव० ५९६ । महानुभावः-अचिन्त्यसामार्थ्यः । ज्ञाता० ७४ । महानुभावः-विशिष्टवैक्रियादिकरणाचिन्त्यसामर्थ्यः । भग० ८६ ।

**महातपस्तीरप्रभव** नाम्नि प्रश्रवणो । विशे० ९२७ (?) ।

**महातपस्तीरप्रभा**-मणिनागवास्तव्यनदविशेषः । ठाणा० ४१३ ।

**महातमःप्रभा**-महातमसःप्रभा यस्यां सा, अतिकृष्णद्रिव्योपलक्षिता पृथ्वी । अनु० ८९ ।

**महातव**-महातपः । भग० १४२ । प्रशस्ततपाः । भग० १२ । महत्-प्रशस्तमाशंसादोषरहितत्वात्तपो यस्य स महातपा । सूर्य० ५ ।

**महातवोतीर**-महातपस्तीरम् । उत्त० १९७ ।

**महातवोतीरप्पभ**-महातपस्तोरप्रभं नाम प्रश्रवणम् । आव० ३१८ ।

**महातवोवतीर**-महांश्चासावातपश्चेति महातपः महातपस्योपतीरं तीरसमीपे महातपोपतीरम् । भग० १४२ ।

**महातित्तगं**-नि० चू० प्र० १९१ अ ।

**महातिमहालया**-अतिमहान्तश्च ते आलयाश्च-आश्रयाः मतिमहालया महान्तश्च तेऽतिमहालयाश्चेति महतिमहलयाः अथवा लय इत्येतस्य स्वार्थिकत्वात् महतिमहान्त इत्यर्थः द्विरुच्चारणं च महच्छब्दस्य मन्दरादीनां सर्वगुरुत्वख्यापनार्थम्, अव्युत्पन्नो वाऽयमिति महदर्थे वर्त्तत इति । ठाणा० १९९ ।

**महातीरा**-महानदीविशेषः । ठाणा० ४७७ ।

**महाथंडिल**-महांस्थाण्डिल्यम्-मृतोज्झनस्थानम् । आव० ६२९ ।

**महादण्डक**- । प्रज्ञा० १३६, २७७, २८३ ।

**महादामड्ढी**-ऋषभाणिकाधिपतो । ठाणा० ३०३ ।

**महादिहाः**-पिशाचभेदविशेषः । प्रज्ञा० ७० ।

**महादेवी**-पट्टराज्ञी । आव० ५५७ ।

**महादुम**-महाद्रुमः-बलीन्द्रस्य पादत्राणीकाधिपतिः । जं० प्र० ४०७ । आनतकल्पे देवविमानविशेषः । सम० ३५ ।

**महादुमसेण**-महाद्रुमसेणः-अनुत्तरोपपातिकदशानां द्वितीयवर्गस्य नवममध्ययनम् । अनुत्त० २ ।

**महादेवाः**-किंपुरुषभेदविशेषः । प्रज्ञा० ७० ।

**महाधणू**-निरयावल्यां पञ्चमवर्गे नवममध्ययनम् । निरय० ३९ ।

**महाधम्मकही**-श्रमणस्य भगवतो महावीरस्य गोशालककृतोपमा । उपा० ४५ ।

**महाधायई**-महाधातकी-उत्तरकुरुषु पश्चिमार्द्धे नीलवद्गिरिसमीपे वृक्षविशेषः । जीवा० ३२८ ।

**महाधायतीरुक्खे**-वृक्षविशेषः । ठाणा० ७९ ।

**महाध्ययनानि**-सूत्रकृताङ्गस्य द्वितीयश्रुतस्कन्धे महान्ति प्रथमश्रुतस्कन्धाध्ययनेभ्यः - सकाशाद् ग्रन्थतो बृहन्ति अध्ययनानि । ठाणा० ३८७ ।

**महान्**-कषायोपसर्गपरिषहेन्द्रियादि शत्रुगणजयातिशयी महान्-अविचिन्त्यशक्त्युपेतः । ( ? ) ।

**महानई**-महानदी-स्वपरिवारभूतचतुर्दशसहस्रनदीसम्पदुपेतत्वेन स्वतन्त्रतया समुद्रगामित्वेन च प्रकृष्टा नदी । जं० प्र० २९० ।

**महानलिण**-सहस्रारकल्पे देवविमानविशेषः । सम० ३३ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

महानिज्जामए-श्रमणस्य भगवतो महावीरस्य गोशालककृतोपमा । उपा० ४५ ।
महानिनाद-शब्दितम् । ओघ० ४८ ।
महानिनादकुलं- । ओघ० ४७ ।
महानिमित्त-निमित्तशास्त्रविशेषः । ज्ञाता० २० ।
महानिसीह-यद्ग्रन्थार्थाभ्यां महत्तरं तन्महानिशीथम् । नंदी २०६ ।
महानील-प्रसिद्धं वस्तुजातम् । प्रज्ञा० ८१ । महानीलः-मणिविशेषः । ओप० ४९ ।
महानीला-महानदीविशेषः । ठाणा० ४७७ ।
महानुभाग वैक्रियादिकरणशक्तियुक्तत्वात् । ज्ञाता० ३४ । अचिन्त्यशक्तियुक्तत्वात् । ठाणा० २४७ ।
महापइरिक्कतरा-महत्प्रतिरिक्तं – विजनमतिशयेन । भग० ६०१ ।
महापउम-नवनिधौ पञ्चमः । ठाणा० ४४८ । जम्बूद्वीपे भरतक्षेत्रे आगमिण्यामुत्सर्पिण्यां प्रथमः तीर्थंकरः । सम० १५३ । जम्बूद्वीपे भरतक्षेत्रे आगमिण्यामुत्सर्पिण्यां नवमश्चक्री । सम० १५४ । सतद्वारनगरे सन्मतिराज्ञो पुत्रः । भग० ६८८ । महापद्मनिधिविशेषः । ज० प्र० २५८ । महापद्मः-पुण्डरिकीनगर्यां नृपतिः । उत्त० ३२६ । ठाणा० ७३ । महापद्मः भविष्यदुत्सर्पिण्यां प्रथमतीर्थंकरः, श्रेणिकराजजीव इति । ठाणा० ४३३ । सहस्रारकल्पे देवविमानविशेषः । सम० ३३ । सुकालमहापद्मायाः पुत्रः । निरय० २० । नवमश्चक्री । सम० १५२ । महापद्मः-नवमश्चक्रवर्त्ती । आव० १५९ । उत्त० ४४८ । महापद्मः-महाहिमवति ह्रदः । ठाणा० ७३ । पोण्डरिकिणीनगर्यां राजा । ज्ञाता० २४३ । निरयावल्यां द्वितीयवर्गे द्वितीयमध्ययनम् । निरय० १९ ।
महापउमद्दह-महापद्मद्रहः-द्रहविशेषः । ज० प्र० ३०१ ।
महापउमा-सुकालकुमारस्य देवी । निरय० २० ।
महापगब्भ-महाप्रगल्भः-अतिस्फारः । प्रश्न० २० ।
महापच्चक्खाण-महत्प्रत्याख्यानम् । नंदी० २०६ ।
महापज्जवसाण-महत्-प्रशस्तमात्यन्तिकं वा पर्यवसानं-पर्यन्तं समाधिमरणतोऽपुनर्मरणतो वा जीवीतस्य यस्य स तथा, अत्यन्तं शुभाशयत्वाविति । ठाणा० १७० ।
यस्य कर्मणः क्षयकरणात् महापर्यवसानः । व्य० द्वि० १६५ अ ।
महापण्ण-महती-निरावरणतयाऽपरिमाणा प्रज्ञा केवलज्ञानात्मिका संवित् अस्येति महाप्रज्ञा । उत्त० २४१ ।
महापण्णवणा-जीवादीनां पदार्थानां प्रज्ञापनं प्रज्ञापना सैव बृहत्तरा महाप्रज्ञापना । नंदी० २०४ ।
महापद्म-महाह्रदविशेषः । प्रश्न० ९६ । भावितीर्थंकरः । नंदी० ११४ । पद्मं निषधह्रदे पद्मम् । ठाणा० ३२६ ।
महापभ-ब्रह्मलोककल्पे देवविमानविशेषः । सम० १३ । महाप्रभः क्षोदवरे द्वीपे पश्चिमार्द्धाधिपतिर्देवः । जीवा० ३५५ ।
महापम्ह-महापक्ष्म नाम विजयः । जं० प्र० ३५७ ।
महापरिन्ना-आचाराङ्गस्य सप्तममध्ययनं, यत्व्यवच्छिन्नम् । आचा० २५९ ।
महापरिण्णा-महती प्रतिज्ञा-अन्तक्रिया लक्षणा सम्यग्विधयेति प्रतिपादनपरं महापरिज्ञा । ठाणा० ४४५ । महापरिज्ञा-अष्टाविंशतिविधाचारप्रकल्पे सप्तमः । आव० ६६० ।
महापरिन्ना-महापरिज्ञा आकाशगामिविद्यास्थानम् । आव० २६४ ।
महापवेसणतर-अतिशयेन महत्प्रवेशनं-गत्यन्तरान्नरकगतौ जीवानां प्रवेशः । भग० ६०५ ।
महापव्वय-महापर्वतः-हिमवदादि । ओघ० १२९ ।
महापसु-पुरुषः । व्य० प्र० १५५ आ ।
महापसिणविज्जा-महाप्रश्नविद्याः-वाचैव प्रश्ने सत्युत्तरदायिन्यः । सम० १२४ ।
महापह-महापथः-राजमार्गः । ओप० ४, ५७ । आव० १३६ । महापथः-राजपथः । जीवा० २५८ । महापथः-राजमार्गः । ज्ञाता० २५ । महापथः-राजमार्गः । भग० १३७ । भग० २००, ३३८ । महापथः-राजमार्गः । प्रश्न० ५८ । ठाणा० २६४ ।
महापाडिवय-महोत्सवानन्तरवृत्तित्वेनोत्सवानुवृत्या शेषप्रतिपद्धर्मविलक्षणतया महाप्रतिपदः । ठाणा० २१३ ।
महापाण-महाप्राणः-महाप्राणनामब्रह्मलोकविमानम् । उत्त० ४४५ । महाप्राणं-ध्यानविशेषः । आव० ६९७ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**महापाणावी**-महाप्राणादिध्यानः । व्य० द्वि० १७६ ।
**महापान**-पीबतीति वा मितोतीति वेति द्वावपि शब्दावेतावविरुद्धो तत्त्वत एकार्थाविस्यर्थः । व्य० प्र० १७७ अ ।
**महापाली**-सागरोपमप्रमाणा । उत्त० ४४५ ।
**महापिउए**-महापिता-पितुर्ज्येष्ठभ्राता । विपा० ५७ ।
**महापीठ**-महापीठः-वज्रसेनधारिण्योः पुत्रः । आव० ११७ ।
**महापुंख**-लान्तककल्पे देवविमानविशेषः । सम० २२ ।
**महापुंड**-लान्तककल्पे देवविमानविशेषः । सम० २२ ।
**महापुंडरीए**-महापुण्डरीको द्रहः । जं० प्र० ३८० । जलरुहविशेषः । प्रज्ञा० ३३ ।
**महापुंडरीय**- । ज्ञाता० ६७ ।
**महापुर**-नगरं-बलराजधानी । विपा० ९५ । वासुपूज्यस्य प्रथमपारणकस्थानम् । आव० १४६ ।
**महापुरा**-महापुरी-राजपूः । जं० प्र० ३५७ । ठाणा० ८० ।
**महापुरिस**-महापुरुषाः छत्रपत्यादयः । जं० प्र० १२५ । किंपुरिसेन्द्रः । ठाणा० ८५ । महापुरुषः-उत्तरनिकाये षष्ठो व्यन्तरेन्द्रः । भग० १५८ । महापुरुषः-किंपुरुषेन्द्रः । जीवा० १७४ । महापुरुषः-जात्याद्युत्तमः । प्रश्न० १३३ ।
**महापुरुषदत्ता**-महाविद्या । आव० ४११ ।
**महापुरुषाः**-किंपुरुषभेदविशेषः । प्रज्ञा० ७० ।
**महापोंडरीय**-महापौण्डरीकः-रुक्मिण्यां ह्रदः । ठाणा० ७३ । सहस्रारकल्पे देवविमानविशेषः । सम० ३३ ।
**महापोय**-महापोतं महाबोहित्थम् । आव० ६०२ ।
**महाप्पा**-महात्मा-उदात्तस्वभावः । जं० प्र० २१८ ।
**महाबल**-निष्क्रमणे भगवत्यागतं दाहरणम् । अन्त० ११ । गुणसमृद्धनगरे राजा । पिण्ड० ४७ । महाबलः-सम्यग्दृष्टी साकेतनरेशः । आव० ७०६ । षष्ठो बलदेवः । सम० १५४ । जम्बूद्वीपे ऐरवतवर्षे आगमिण्यामुत्सर्पिण्यां त्रयोविंशतितमतीर्थंकरः । सम० १५४ । महाबलकुमारः-भगवतिगतोऽतिदेशः । अन्त० २ । महाबलः-शतबलराजपुत्रः । आव० ११६ । निरयावलयाः पञ्चमवर्गे निषढाध्ययने दृष्टान्तः । निरय० ३९ । भगवत्यामभिहित दृष्टान्तः । ज्ञाता० १२९ । नि० चू० प्र० १७६ आ । सर्वकार्येष्वापृच्छनीयः । नि० चू० प्र० १९५ आ । पर्वताद्युत्पाटनसामर्थ्यापितत्वात् महाबलः । ज्ञाता० ३४ ।
**महाबलग**-महाबलः । आव० ७११ ।
**महाबाहू**-चतुर्थो बलदेवः । सम० १५४ ।
**महाबीर्य**-महाबोजम् । ओघ० ९७ ।
**महाबोहित्थ**-महापोतम् । आव० ६०२ ।
**महाभद्द**-महाशुक्रकल्पे देवविमानविशेषः । सम० ३२ ।
**महाभद्दा**-तृतीया प्रतिमा । ठाणा० २९२ । अहोरात्रद्वयमाना महाभद्राप्रतिमा । ओघ० ३० । महाभद्रा-प्रतिमाविशेषः । आव० २१५ । महाभद्रा-प्रतिमाविशेषः । ठाणा० ६५ । अहोरात्रप्रमाणा कायोत्सर्गरूपा । ठाणा० १९५ ।
**महाभयंकर**-अतिभयकारी । ज्ञाता० ६३ ।
**महाभल्ली**- । नंदी० १५२ ।
**महामाए**-महाभागः-महानुभागः । सूत्र० ३८६ ।
**महाभिसेओ**-महंततरो अभिसेओ । नि०चू०प्र० २७५ अ ।
**महाभीमा**-राक्षसभेदविशेषः । प्रज्ञा० ७० ।
**महाभीमे**-किम्पुरिषस्य द्वितीय इन्द्रः । भग० ८५ । अष्टमः प्रतिवासुदेवः । सम० १५४ । महाभीमः-उत्तरनिकाये चतुर्थो व्यन्तरेन्द्रः । भग० १५८ । महाभीमः-राक्षसेन्द्रः । जीवा० १७४ ।
**महाभीमसेण**-जम्बूद्वीपे भरतक्षेत्रे अतीतायामवसर्पिण्यां सप्तमः कुलकरः । सम० १५० । ठाणा० ५१८ ।
**महाभेरव**-महाभैरवम् । आव० २२७ ।
**महाभोगा**-महानदीविशेषः । ठाणा० ४७७ ।
**महामंडलिए**-महामण्डलिकः-अनेकदेशाधिपतिरल्पर्द्धिकः । जीवा० ४० । महामण्डलिकः-अनेकदेशाधिपतिः । प्रज्ञा० ४७ ।
**महामंति**-महामन्त्री-मन्त्रिमण्डलप्रधानः । भग० ३१८ । महामन्त्रीः-मन्त्रिमण्डलप्रधानः । जं० प्र० १९० ।
**महामट्ठं**-मकारस्यालाक्षणिकत्वात्महानर्थः-प्रयोजनं मुक्तिरूपमस्येति महार्थः । उत्त० ५२७ ।
**महामडमे**- । ज्ञाता० १९१ ।
**महामणुस्सत्तण**-महामनुष्यत्वम् । आव० ३९९ ।

महामण्डपवाटादि- । सम० ५२ ।
महामण्डलीक-महाराजा । आव० ८४० ।
महामन्त्री-मन्त्रिमण्डलप्रधानः । भग० ४६४ । राज० १२१ ।
महामह-इंदमहादि । नि० चू० प्र० १९७ आ ।
महामाउया-महामाता-पितुर्ज्येष्ठभ्रातृजाया, भ्रातुर्ज्येष्ठाः सपत्नी वा । विपा० ५७ ।
महामाठर-रथानिकाधिपतिः । ठाणा० ३०३ ।
महामाणस-चतुरशिति महाकलशशतसहस्रः । भग० ६७४ ।
महामात्र-हस्तिव्यावृतः । औप० ६२ ।
महामात्रा-हस्त्यारोहा । विपा० ४६ ।
महामाहण-मा हन्मि-न हन्मीत्यर्थः, आत्मना वा हनननिवृत्तः, परं प्रति 'मा हन' इत्येवमाचष्टे यः स माहनः महान्माहनो महामाहनः । उपा० ४० । श्रमणस्य भगवतो महावीरस्य गोशालककथितोपमा । उपा० ४५ ।
महामुणि-महामुनिः-प्रशस्यतपस्वी । उत्त० ३६६ ।
महामेह-महान् मेघो-दशवर्षसहस्रावधि एकेन वर्षणेन भूमेर्भावुकत्वात् महामेघः । ज० प्र० १७३ ।
महामोकप्रतिमा- । औप० ३२ ।
महामोह-अज्ञनाभिष्वङ्गः-महामोहकारणत्वान्महामोहः । आचा० १२८ ।
महायसा-महायशाः विख्यातसद्गुणः । दश० २४१ । महायशः-बृहत्प्रख्यातिः । भग० ८६ ।
महायुद्ध-महायुद्धं-व्यवस्थाविहीनमहारणः । भग० १९८ ।
महारंभा-महारम्भाः-पञ्चेन्द्रियादिव्यपरोपणप्रधानकार्यकारिणः कुटुम्बिनः । ठाणा० १२६ ।
महारयण-महारत्नं वज्रम् । सम० १५७ ।
महारयणविहाडगा-महारत्नं-वज्रं तस्य महाप्राणतया विघटका-अङ्गुष्ठतर्जनीभ्यां चूर्णका महारत्नविघटकाः, वज्रं हि अधिकरण्यां धृत्वा अयोघनेनाऽऽस्फोट्यते न च भिद्यते तावेव भिनत्तीति, दुर्भेदं तदिति, अथवा महती या रचना सागरशकटव्यूहादिना प्रकारेण सिसङ्ग्रामयिषोर्महासैन्यस्य रणरङ्गरसिकतया महाबलतया च विघटयन्ति वियोजयन्ति ये ते महारचनाविघटकाः । सम० १५७ ।
महारन्न:-लोकपालः । ठाणा० ४८३ । लोकपालस्याग्रभूताः प्रधानाः । ठाणा० २०५ ।
महारम्भकृत्- । आचा० ३९० ।
महाराजिक-लोकप्रसिद्धम् तृतीयाधर्मद्वारस्य चतुर्दशनाम । प्रश्न० ५८ ।
महाराय-लोकपालः । भग० ५२० । लोकपालः । निरय० २६ ।
महारायत्त-महाराजत्वं-लोकपालत्वम् । सम० ८६ ।
महारायवास-महान्-रागो-लौल्यं यत्र स चासौ वासश्च महारागवासः-गृहवासः, यद्वा-महान्-अरागः-अलौल्यं यत्र स चासौ वासश्चेति । जं० प्र० १४१ ।
महाराया-महाराजः । आव० ११८ ।
महाराष्ट्रः-अधोऽवनि । पिण्ड० १६७ ।
महारिट्ठ-न्यायाधिपतिः । ठाणा० ४०६ ।
महारिह-महम्-उत्सवं क्षणमर्हन्तीति महार्हाणि । राज० ४८ ।
महारुक्ख-महावृक्षं-मधुकादिकम् । जीवा० १३६ ।
महारुधिरनिवडण-महारुधिरनिपतनम् । भग० १९७ ।
महारुधिराणि-छत्रपत्यादिसत्करुधिराणि । ज० प्र० १२५ ।
महारोरुए-महारौरवः तमापृथिव्यां चतुर्थो महानिरयः । प्रज्ञा० ८३ ।
महारोहिणि-महारोहिणी-विद्याविशेषः । आव० ६८६ ।
महार्थं-महार्थत्वं-बृहदभिधेयता । सम० ६३ ।
महार्थकर्मप्रवादपूर्व-पूर्वविशेषः । उत्त० ६३ ।
महार्था-विभाषा वार्तिकाभिधेयाः । (?) ।
महालओ-महानालयोऽस्येति महालयः सर्वत्रानिवारितत्वात् । आव० ५६७ ।
महालय-महालयः-महाकायः । सूत्र० ३७४ । महालयः-महात्यः । उत्त० ४६१ । महाभये-वक्षःस्थलादिप्रमाणः । आचा० ३८१ ।
महालयसव्वतोभद्द-महालयसर्वतोभद्रं तपोविशेषः । अन्त० ३० ।
महालयाइं-महालयाणि-अतिशयमहान्ति, महान् वा लयः कर्मश्लेषो येषु तानि । उत्त० ३९० ।
महालिङ्गइ-महापिङ्गहम् । जीवा० ३०६ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**महालिया**-विस्तीर्णा । सूत्र० ३२५ ।
**महालोहिअक्खो**-महिषानिकाधिपतिः । ठाणा० ३०२ ।
**महावच्छ**-महावत्सो विजयः । जं० प्र० ३५२ ।
**महावच्छा**- । ठाणा० ८० ।
**महावज्जा**-महावर्ज्या । बृ० प्र० ९३ अ ।
**महावप्पा**- । ठाणा० ८० ।
**महावप्पे**-महावप्रो विजयः । जं० प्र० ३५७ ।
**महावाऊ**- । ठाणा० ३०३ ।
**महावाय**-महावातः-उद्दण्डवातः । ज्ञाता० १७१ ।
**महावासतरा**-अवकाशो-बहूनां विवक्षितद्रव्याणामवस्थानयोग्यं क्षेत्रं महानवकाशो येषु ते महावकाशाः अतिशयेन महावकाशा महावकाशतराः । भग० ६०५ ।
**महाविजय**-देवलोकः । आचा० ४२१ ।
**महाविजया**-वाद्यविशेषः । जीवा० २७८ । जं० प्र० ११८ ।
**महाविज्जा**-महाविद्याः-केवलिचतुर्दशपूर्वविद्प्रभृतिः । आव० ५९८ । महाविद्या-महापुरुषदत्तादिरूपा । आव० ४११ ।
**महाविदेह**-महाविदेहनामवर्षं चतुर्थं वर्षम् । जं० प्र० ३१० । महाविदेहः-कर्मभूमिविशेषः । प्रज्ञा० ५५ । महाविदेहः-महाबलराजधानी वैरजङ्घराजधानी च । आव० ११५ । ज्ञाता० २२७ । जम्बूविदेहः । ज्ञाता० १२१ । वर्षक्षेत्रम् । ज्ञाता० ७६, १६६, २५३ ।
**महाविदेहा**-महान्-अतिशयेन विकृष्टो-गरीयान् देहः-शरीरमाभोगः इति यावत् येषां ते महाविदेहाः, अथवा महान्-अतिशयेन विकृष्टः-गरीयान् देहः-शरीरं-कलेवरं येषां ते महाविदेहाः । जं० प्र० ३१२ ।
**महाविमानप्रविभक्तिः**- । नंदी० २०६ ।
**महाविस**-महाविषं-जम्बूद्वीपप्रमाणस्यापि देहस्य व्यापनसमर्थम् । भग० ६७२ । महत्-जम्बूद्वीपप्रमाणशरीरस्यापि विषतयाऽऽभावनात् । ज्ञाता० १६२ । महाविषः । उत्त० २१३ ।
**महाविसा**-महाविषा प्रधानविषयुक्ता । आव० ५६६ ।
**महाविस्संद**-महाविष्यन्दम् । आव० ४११ ।
**महावीर**-वीर 'सूर-वीर-विक्रान्तावी'तिवचनात् रिपुनिराकरणतो विक्रान्तः, स च चक्रवर्त्यादिरपि स्यादतो विशेष्यते-महांश्चासौ दुर्जयान्तररिपुतिरस्करणाद्वीरश्चेति महावीरः । भग० ७ । आवश्यके वर्णीतः । ज्ञाता० १२९ । बृ० प्र० २५७ आ । 'शूरवीर विक्रान्तौ' कषायादि महाशत्रुसैन्यजयाद् महाविक्रान्तो, महावीरः । विशे० ४८८ । ब्राह्मणचेटकप्रश्नोत्तरदाता । आव० ६६ । नि० चू० द्वि० १४५ अ । भगवान् । बृ० प्र० १६६ अ । श्रेणिकोदाहरणे श्रमणो भगवान् महावीरः । विशे० ६११ । महावीरः-कर्मदारणसहिष्णुः । सूत्र० २५६ । श्रीमान् महाराजः । भग० १ । द्वितीयोऽमुक्तरूपे दृष्टान्तः । ठाणा० २८४ ।
**महावीरथुई**- । सम० ३१ ।
**महाविहि**-महावीथिः-सम्यग्दर्शनादिरूपः मोक्षमार्गः । आव० ४४ ।
**महावेगा**-भूतभेदविशेषः । प्रज्ञा० ७० । महोरगभेदविशेषः । प्रज्ञा० ७० ।
**महावेज्ज**-अष्टांगायुर्वेदरूपं वैद्यशास्त्रं चक्रे तच्च यथाम्नायां येनाधीतं स महावैद्यः । बृ० प्र० १६० अ । जोगी धणंतरी तेण विभंगणाणेण दट्ठुं रोगसंभवं वेज्जसत्थयं कयं तं अधीयं जेण जहुत्तं सो महाविज्जो । नि० चू० द्वि० १३९ अ ।
**महाशिलाकंटकं**-कोणिकपक्षे अमरकृतो प्रथमो संग्रामः । व्य० द्वि० ४२६ अ ।
**महाशिलाकापल्य**-जम्बूद्वीपप्रमाणो चतुर्थः पल्यः । अनु० २३७ ।
**महासंगाम**-महासंग्रामः-चेटिककोणिकवत् घोरसङ्ग्रामः । जीवा० २८३ । महासङ्ग्रामः-सव्यवस्थचक्रादिव्यूहरचनोपेतमहारणः, महाशस्त्रनिपातनादयस्तु त्रयो महायुद्धादिकार्यभूताः । भग० १९८ । महासङ्ग्रामाः-चक्रादिव्यूहरचनोपेततया सव्यवस्था महारणाः । जं० प्र० १२६ ।
**महासंयुग**-महासंङ्ग्रामः । भग० २२५ ।
**महासउणि**-महाशकुनिः-कृष्णपितृवैरिणी विद्याधरयोषितः विकुर्वितगम्भीरूपा । प्रश्न० ७५ ।
**महासक्ख**-आशुगमनादश्वो-मनः अक्षाणि-इन्द्रियाणि अश्वाक्षाणि महान्ति च तानि यस्यासौ महाश्वाक्षः । जीवा० १०९ । महाश्वाक्षः-स्फीतमनाः-स्फूर्तिमच्चक्षुरा-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वीन्द्रियश्च । प्रज्ञा० ६०० ।

**महासक्खा**-महाश्वाक्षाः-आशुगमनादश्वो-मनः अक्षाणि-इन्द्रियाणि स्वस्वविषयव्यापकत्वात् अश्वश्च अक्षाणि चेत्य-श्वाक्षाणि महान्त्यश्वक्षाणि येषां ते महाश्वाक्षाः । प्रज्ञा० ८८ ।

**महासग्ग**-महास्वर्गः । भग० २२० ।

**महासड्ढी**-महाश्रद्धी-महती चाऽसौ श्रद्धा च महाश्रद्धा सा विद्यते भोगेषु तदुपायेषु वा यस्य स तथा । आचा० १३९ ।

**महासत्ता**-सर्वत्र सदित्येवमनुगताकारावबोधहेतुभूता । ठाणा० ३११ ।

**महासत्थ**-महाशस्त्रं-नागबाणादि । जं० प्र० १२५ ।

**महासत्थनिवडण**-महाशस्त्रनिपतनं महायुद्धादिकार्यभूतम् । भग० १९८ ।

**महासत्थनिपतण**-महाशस्त्रनिपतनं-यन्नागबाणादीनां दिव्यास्त्राणां प्रक्षेपणम् । जीवा० २८३ ।

**महासत्थवाहे**-श्रमणस्य भगवतो महावीरस्य गोशालककृतोपमा । उपा० ४५ ।

**महासद्दियं**-दुवक्खरियं दाणसंगहियं काउं महाजणमज्झे बोल्लवेति महासद्दियं । नि० चू० तृ० २० अ ।

**महासद्दिया**- । नि० चू० प्र० २४७ आ ।

**महासन्नाह**-बृहत्पुरुषाणामपि बहूनां यः सन्नाहः । जीवा० २८३ ।

**महासमरसंघाओ**-महासमरसंघातः-महायुद्धसमूहः । आव० ७११ ।

**महासय**-उपासकदशायामष्टममध्ययनम् । उपा० १ । राजगृहे गाथापतिः । उपा० ४८ ।

**महासागर**-महासागरः-स्वयम्भूरमणः । आव० ५६७ ।

**महासामाण**-सहस्रारकल्पे देवविमानविशेषः । सम० ३३ । महाशुक्रकल्पे विमानम् । भग० ७०६ ।

**महासाल**-महाशालः-पृष्टिचम्पानगर्यां युवराजा । उत्त० ३२१ । महाशालः-श्रीवीरशिष्यः केवलीजातश्च । उत्त० ३२३ ।

**महासावय**-षष्ठशतकस्य तृतीयोद्देशकः-महाश्रावकः । भग० ३२६ ।

**महासासण**-महाशासनः-राजाधिपः । आव० ७१२ । महाशासनः-महामण्डलिकः । आव० ७१८ । महाशासनः । उत्त० ३०२ ।

**महासिला**-सचेयणाऽसंदा महासिला । नि० चू० द्वि० ८२ आ ।

**महासिलाकंटए**-महाशिलेव कण्टको जीवितभेदकत्वात् महाशिलाकण्टकः । यत्र तृणशकलादिनाऽप्यभिहतस्याश्वहस्त्यादेर्महाशिलाकण्टकेनेवाभ्याहतस्य वेदना जायते सङ्ग्रामः महाशिलाकण्टकः । भग० ३१६ ।

**महाशिलाकंटओ**-महाशिलाकण्टकः-सङ्ग्रामविशेषः आव० ६८४ ।

**महासिव**-महाशिवः-षष्ठपुरुषपुण्डरीकवासुदेवपिता । आव० १६३ ।

**महासिंहनिक्रीडितम्**- । औप० ३० ।

**महासींहनिक्कीलिय**-तपविशेषः । ज्ञाता० १२४ ।

**महासीहसेण**-महासिंहसेनः-अनुत्तरोपपातिकदशानां द्वितीयवर्गस्य द्वादशममध्ययनम् । अनुत्त० २ ।

**महासुक्क**-महाशुक्रः-सप्तमदेवलोकः । भग० २२० । सहस्रारकल्पे देवविमानविशेषः । सम० ३३ । महाशुक्रः-सुप्रभ१सुदर्शना२नन्द३बलदेवत्रयागमनस्थानम् । आव० १६३ टी० । ज्ञाता० १६१ ।

**महासुक्का**-महाशुक्लाः-अतिशयोज्वलतया चन्द्रादित्यादयः । उत्त० १८७ । महाशुक्रः कल्पोपगः वैमानिकभेदविशेषः । प्रज्ञा० ६९ । महाशुक्रः नारायणवासुदेवागमनविमानम् । आव० १६३ टी० ।

**महासुविण** महाफलत्वात् । भग० ५४३ ।

**महासेए**-महाश्वेतः-व्यन्तरेषु इन्द्रविशेषः । प्रज्ञा० ९८ ।

**महासेण**-जम्बूद्वीपे ऐरवतवर्षे आगमिष्यामुत्सर्पिण्यां तीर्थकरनाम । सम० १५४ । महासेनः-अनुत्तरोपपातिकदशायां द्वितीयवर्गस्य द्वितीयमध्ययनम् । अनुत्त० २ । कुभेन्द्रः । ठाणा० ८५ ।

**महासेणकण्ह**-निरयावल्यां प्रथमवर्गे दशममध्ययनम् । निरय० ३ ।

**महासेणकण्हा**-महासेनकृष्णा-अन्तकृद्दशानामष्टमवर्गस्य दशममध्ययनम् । अन्त० २५ । महासेनकृष्णा । अन्त०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

३२ ।
**महासेते**–नाट्याधिपतिः । ठाणा० ४०६ ।
**महासेन**–द्वारामत्यां बलवर्गमुख्यः । ज्ञाता० १०० ।
**महासोक्ख**–महासौख्यः । भग० ८६ । महासौख्यः– महत्सौख्यं यस्य प्रभूतसद्वेदोदयवशा स महासौख्यः । जीवा० १०६ । महासौख्यः–महत्सौख्यं–प्रभूतसद्वेद्योदयवशात् यस्य स महासौख्यः । जीवा० २१७ । सूर्यं० २५८ । महासौख्यः विशिष्टसुखयोगाद् । ज्ञाता० ३० । प्रभूतसद्वेद्योदयवशाद् यः सः महासौख्यः । प्रज्ञा० ८८ । महत् सौख्यं येषां ते महासौख्याः । सूर्यं० २८६ । महत्–भवनपतिव्यन्तरेभ्योऽतिप्रभूतं तदपेक्षया तेषां प्रशान्तत्वात् सौख्यं येषां ते महासौख्याः । सूर्यं० २५८ ।
**महासोतामो**–पादत्राणाधिपती । ठाणा० ३०२ ।
**महास्कन्द**–भूतभेदविशेषः । प्रज्ञा ७० ।
**महास्थण्डिल**–शवपरिष्ठापनभूमिलक्षणम् । बृ० प्र० २३७ अ ।
**महाहरि**–महाहरिः–हरिसेनपिता । आव० १६२ ।
**महाहरो**–हरिसेन चक्रिणः पिता । सम० १५२ ।
**महाहिमवंत**–महाहिमवान्–हैमवतक्षेत्रस्योत्तरतः सीमाकारीवर्षधरपर्वतः । जीवा० १९४ । महाहिमवान् । आव० २९७ ।
**महाहिमवत्**–जम्बूद्वीपे दक्षिणस्यां पर्वतः । ठाणा० ६८, ७०, ७२ ।
**महिंद**–माहेन्द्रः–पर्वतविशेषः शक्रो वा । जं० प्र० ७६ । माहेन्द्रः–सुपार्श्वजिनप्रथमभिक्षादाता । आव० १४७ । माहेन्द्रः–अष्टममुहूर्तनाम । सूर्यं० १४६ । माहेन्द्रः–पर्वतविशेषः शक्रो वा । औप० ११ । लान्तककल्पे द्वादशसागरोपमस्थितिकदेवविमानविशेषः । सम० २१ ।
**महिंदकंतं**–महाशुक्रकल्पे देवविमानविशेषः । सम० २७ ।
**महिंदकुंभसमाण**–महेन्द्रकुम्भसमानः–महाकलशप्रमाणः । जीवा० २०५ ।
**महिंदकुंभसमाणाः**–महाकलशप्रमाणा यद्वा महीन्द्रो राजा तदर्थं तस्य सम्बन्धिनो वा कुम्भाः अभिषेककलशा तत्समानाः । जं० प्र० ५० ।
**महिंदज्झय**–लान्तककल्पे देवविमानविशेषः । सम० २२ ।
**महिंदज्झया**–महेन्द्रा–अति महान्तः समयभाषया ते च ध्वजाश्चेति अथवा शक्रदेवेन्द्रध्वजा । ठाणा० २३२ । मणिपेढिकोपरिध्वजा । ठाणा० २३० ।
**महिंदुत्तरवडिंसगं**–महाशुक्रकल्पे देवविमानविशेषः । सम० २७ ।
**महि**–महारात्रातिक्षिप्ता सचिता पृथिवी । विशे० १०२९ ।
**महिअ**–महितः–पुष्पादिभिः पूजितः । आव० ५०७ ।
**महिआ**–महिका:–धूमिकारूपोऽप्कायः । ओघ० ३१ । महिता–यथावस्थितानन्यसाधारणगुणोत्कीर्तनलक्षणेन भावस्तवेनार्चिताः । नंदी० १९२ ।
**महिओ**–महितः हृष्टो, तुष्टो, नन्दितो वा । आव० ७५९ । हृष्टतुष्टनन्दितो । नि० चू० तृ० ७८ अ । म्लानिं प्राप्तः । बृ० तृ० ११४ अ ।
**महिका**–स्निग्धा घना । अनु० १२१ । प्रालेयं–स्नेहसूक्ष्मविशेषः । दश० २२६ ।
**महिच्छं**–महेच्छं–अविद्यमानद्रव्यविषये महाभिलाषम् । प्रश्न० १२४ ।
**महिच्छा**–महेच्छा–अपरिमितवाञ्छा, परिग्रहस्यैकादशमनाम । प्रश्न० ९२ । महेच्छा–महाभिलाषः । प्रश्न० ९७ ।
**महिट्ठ**–महिष्ट–तर्कसंसृष्टम् । विपा० ८० ।
**महिड्ढिए**–महर्द्धिकः विमानपरिवारापेक्षया । भग० ८६ ।
**महिड्ढिओ**–राया । नि० चू० द्वि० १४३ आ । बृ० प्र० १६५ अ ।
**महिड्ढीय**–महर्द्धिकः–ग्रामस्य नगरस्य वा रक्षाकारी । व्य० प्र० १९ अ ।
**महित**–महितः–अभिष्टुतः–द्रव्यस्तवेन पूजितश्च । अनु० ३७ । मथितम् । आव० ८६ (?) ।
**महिता**– । ठाणा० ४७६ ।
**महित्थ**–गुच्छाविशेषः । प्रज्ञा० ३२ ।
**महिमा**–महिमा देवकृता । आव० २४१ । महिमा–यात्रा । आव० ५३७ । भगवत्प्रतिमायाः पुष्पारोपणादिपूजात्मकः । बृ० प्र० २७६ अ ।
**महिमाकाल**–महिमकालः । आव० ६६५ ।
**महिमाण**–माहात्म्यम् । मर० ।
**महियं**–देवविमानविशेषः । सम० ४१ । घोरसम् । आव०



Jain Education International For Private & Personal Use Only www.jainelibrary.org

९५ । गोरसं । आव० ६२४ । तक्रम् । बृ० प्र० २८ अ । मोहितं-जर्जरितम् । ज्ञाता० ८६ । सेव्यतया वाञ्छितः । उपा० ४० । मथितः माननिर्मथनतः । भग० ३१६ ।

**महिया**-महिका-धूमिका । दश० १५३ । महिका-धूमिका । आचा० ३३३ । धूमिया-सायं कत्तियमग्ग-सिरादिसु गब्भमासे भवति । नि० चू० तृ० ६६ आ । महिका-गर्भमासेषु गर्भसूक्ष्मवर्षा । उत्त० ६६१ । धूमिका । ओघ० १४१ । महिका-धूमिका । ठाणा० २८७ । जो सिसिरे तुसारो पडइ सो । दश० चू० ६८ आ । महिका-धूमिका । विशे० १०२६ । गर्भमासादिषु सायं प्रातर्वा धूमिकापाती महिका । आचा० ४० । महिका-धूमिका । सूत्र० ३५८ । महिका-आपाण्डुरा । भग० १६६ । महिका-गर्भमासेषु सूक्ष्मवर्षम् । जीवा० २५ । स्निग्धा-घना घनत्वादेव भूमौ पतिता सार्द्रतृणादिद-र्शनद्वारेणोपलक्ष्यमाणा महिका । जीवा० २८३ । महिका-गर्भमासेषु सूक्ष्मवर्षा । प्रज्ञा० २८ ।

**महिला**-मिथिला-अकम्पिकगणधरजन्मभूमिः । आव० २२५ । मिथिला-द्रव्यव्युत्सर्गे विदेहजनपदे नगरी । आव० ७१९ ।

**महिलाथूभं**-महिलास्तूभं-कूपादितटम् । विशे० ८५३ । महिलास्तूपं-कूपतटम् । आव० २७५ ।

**महिलाभाव**-महिलाभवम् । आव० २१३ ।

**महिवइपहा**-महीपतिपथा-राजमार्गः, महीपतिप्रभा । ज्ञाता० ३ । महीपतिपथः-राजमार्गः । राज० ३ ।

**महिषानीक**-पञ्चमोऽनीकभेदः । जीवा० २१७ ।

**महिस**-महिषः-द्विखुरचतुष्पदः । जीवा० ३८ । महिसः-सौरमेयः । जीवा० २७२ ।

**महिसपोहो**-छगणपोहः-गोमयम् । पिण्ड० ८३ ।

**महिसमड**-महिसमृतः-मृतमहिषदेहः । जीवा० १०६ ।

**महिसा**-द्विखुरविशेषः । प्रज्ञा० ४६ ।

**महिसिदुरुक्ख**-खर्जूरीवृक्षः । आव० १६४ ।

**महिसी**-कृताभिषेका देवी महिषी । राज० १४ ।

**महिस्सर**-भूतेन्द्रः । ठाणा० ८५ ।

**मही**-महानदीविशेषः । ठाणा० ४७७ ।

**महीयांस**-पूज्याः । नंदी० ६५ ।

**महुंडिमा**- । नि० चू० द्वि० २३ अ ।

**महु**-मधम् । आव० ४०२ । मधु-मद्यविशेषः । जं० प्र० १०० । मधु-शर्करापरपर्यायम् । जं० प्र० १०४ । मधु-मद्यविशेषः । प्रज्ञा० ३६४ । मधु-ब्रह्मदत्तस्य द्वितीय-प्रासादः । उत्त० ३८५ । मधु-अतिशातिशायिशर्करादि-मधुरद्रव्यम् । विशे० ३८४ । मधु-क्षौद्रम् । उपा० ४६ । मधु-मद्यविशेषः । उत्त० ६५४ ।

**महुआसव**-मध्वाश्रवः । ओप० २८ ।

**महुकेढव**-मधुकैटभः-पुरुषोत्तमवासुदेवशत्रुः । आव० १५६ ।

**महुकोसय**-मधुकोशकः-क्षौद्रोत्पत्तिस्थानम् । प्रश्न० ३८ ।

**महुघात**-मधुघातः-मधुग्राहकः । प्रज्ञा० १३ ।

**महुत्त**-कालविशेषः । भग० ८८८ ।

**महुपुग्गल**-मधुपुद्गलम् । आव० ८५७ ।

**महुमहण**-मधुमथनं-आक्रष्टुम् । आव० ४८ ।

**महुमुह**-दुर्जनः । बृ० द्वि० २५५ आ ।

**महुमेहणि**-मधुमेहो-बस्तिरोगः स विद्यते यस्यासौ मधु-मेही, मधुतुल्यप्रस्रावबानित्यर्थः । आचा० २३६ ।

**महुर**-मधुरं-मधुरस्वरेण गीयमानम् । जीवा० १६४ । मधुरस्वरं-कोकिलारुतवत् । जं० प्र० ४० । मधुरं-श्रवणमनोहरम्, अष्टमो सूत्रगुणः । आव० ३७६ । मधुरं-सूत्रार्थोभयैः श्राव्यम्, वचलक्षणविशेषः । दश० ८८ । महुरः-चिलातदेशवासीम्लेच्छविशेषः । प्रश्न० १४ । मधुरं-क्षीरमध्वादि । दश० १८० । मधुरा । आव० १७३ । मधुरं-कर्णसुखकरणम् । ज्ञाता० २११ । मधुरः-श्रवण-सुखकरः । ज्ञाता० २३२ । षष्ठ दूतप्रेषणस्थानम् । ज्ञाता० २०८ । मधुरः-ह्लादनबृंहणकृत् । ठाणा० २६ ।

**महुरग**-मधुरम् । आव० ६२० ।

**महुरतण**-तृणविशेषः । प्रज्ञा० ३३ ।

**महुररस**-मधुररसः-साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।

**महुरसर**-मधुरस्वरं मधुमत्तकोकिलारुतवत् । अनु० १३२ ।

**महुरस्सरा**-मधुरस्वरा-द्वीपकुमाराणां घण्टा । जं० प्र० ४०७ ।

**महुरा**-मथुरा-जीतशत्रुराजधानी । उत्त० १२० । मथुरा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिरप्रतिष्ठितापुरी, इन्द्रदत्तपुरोहितवास्तव्यानयरी । उत्त० १२५ । मथुरा-जितशत्रुराजधानी । उत्त० १४८ । मथुरा-यत्राक्रियावादीनिन्हव उत्पन्नः । उत्त० १७३,१७९। शङ्खयुवराजराजधानी । उत्त० ३५४ । मथुरा-नगरीविशेषः । दश० ३६ । मथुरा-जिनदासवास्तव्यानगरी । आव० १९८ । मथुरा । आव० ३० । मथुरा-पर्वतराजनगरी । आव० ३४४ । मथुरा-चक्षुरिन्द्रियोदाहरणे जितशत्रुराजधानी । आव० ३९८ । मथुरा-परलोकनमस्कारफलदृष्टान्ते पुरी । आव० ४५४ । असत्याकारे निर्व्याघाते नगरी । आव० ६२२ । तितिक्षोदाहरणे जितशत्रुराजधानी । आव० ७०२ । नि० चू० प्र० ३५२ आ । मथुरा-श्रमणीप्रभृतीनां मानुष्योपसर्गे नगरम् । व्य० प्र० १९६ अ । श्रमण्युपसर्गकृद्बोधिकनिवारिकः क्षपकस्थानम् । बृ० तृ० २४० अ । चन्द्रप्रभगाथापतिवास्तव्या नगरी । ज्ञाता० २५३ । तिविहं सुत्तअत्थअभिहाणमहुरं । दश० चू० ३५ अ । मथुरा-योगसंग्रहे भावापत्सु दृढधर्मत्वदृष्टान्ते नगरी, यमुनराजधानी । आव० ६६७ । देवनिर्मितस्तूभस्थानम् । व्य० प्र० १९७ अ । मथूरा-शूरसेनजनपदे आर्यक्षेत्रम् । प्रज्ञा० ५५ । मथुरा-कृष्णपुरी । आव० १६२ । मथुरा-त्रिपृष्ठवासुदेवनिदानभूमिः । आव० १६३ टी० ।

**महुरोल्लण-** । नि० चू०प्र० ३२३ आ ।

**महुला-**पादे गंडं । नि० चू० प्र० ११७ आ ।

**महुवयण-**वनस्पतिविशेषः । भग० ८०२ ।

**महुस-**नगरीविशेषः । नि० चू० प्र० २४१ अ ।

**महुसिगिणिरुहा-**वृक्षविशेषः । भग० ८०४ ।

**महुसिंगी-**साधारणबादरवनस्पतिकायविशेषः। प्रज्ञा० ३४ ।

**महुसित्थ-**येन प्रदेशेनालक्तकामिन्याः पात्यते तावन्मात्रं यो लिम्पति कर्दमः स मधुसिक्थः । ओघ० २९ । मधुसिक्थं-औपपातिक्यां दृष्टान्तः । उत्त० ४२१ । मदनम् । भग० ३९९ । मधुसिक्थः-तलयोर्यः कर्दमो लगति । बृ० तृ० १६३ अ ।

**महुसित्थगो-**तीलगतगमेत्तो । नि० चू० द्वि० ८० अ ।

**महुसित्थजलं-**मधुसित्थकजलं-यद् अलक्तकमार्गावगाहिकर्दमस्योपरि वहति । ओघ० ३२ ।

**महेंदज्झया-**महेन्द्रध्वजः । जीवा० २२९ ।

**महेइ-**मथ्नाति-घर्षयति । भग० ५२० । महति । आव० १९७ ।

**महेन्द्रसिंह-**कुवलमालागतराजपुत्रः । ठाणा० ५१६ ।

**महेयक्खा-**महोरगविशेषः । प्रज्ञा० ७० ।

**महेलागुण-**महेलागुणः - प्रियंवदत्वभर्तृचित्तानुवर्त्तकत्वप्रभृतिः । जीवा० २७४ ।

**महेसक्ख-**महेशाख्यः इति महान् ईशः-ईश्वरः इत्याख्या यस्य महेशाख्यः ईशं-ऐश्वर्यमात्मनः ख्याति-अन्तर्भूतण्यर्थतया ख्यापयति-प्रथयति महांश्चासावीशाख्यश्च । जीवा० १०९ । महान् ईश-ईश्वर इत्याख्या-शब्दप्रथा यस्य लोके स महेशाख्यः, अथवा ईशानमीशो, 'भावे घञ्' प्रत्ययः, ऐश्वर्यमित्यर्थः, 'ईश ऐश्वर्ये' इति वचनात् तत्र ईशं ऐश्वर्यमात्मनः ख्याति-अन्तर्भूतण्यर्थतया ख्यापयति प्रकाशयति तथा परिवारादिकीर्त्या वर्त्तते इति ईशाख्यः महांश्चासावीशाख्यश्च महेशाख्याः । प्रज्ञा० ६०० ।

**महेसक्खा-**महेशः-महेश्वर इत्याख्या-अभिधानं यस्या असौ महेशाख्यः महेशाभिधा । भग० ८६ । महान् ईशः-ईश्वरः इत्याख्या येषां ते महेशाख्याः । सूर्य० २८६ । इति-महान् ईश-ईश्वर इत्याख्या-प्रसिद्धिर्येषां ते महेशाख्याः, अथवा ईशानमीशो भावे 'घञ्' प्रत्ययः ऐश्वर्यमित्यर्थः-'ईश ऐश्वर्ये' इति वचनात् तमीशं-ऐश्वर्यमात्मानं-ख्यान्ति अन्तर्भूतण्यर्थतया ख्यापयन्ति-प्रथयन्ति इति ईशाख्याः महान्तश्च ते ईशाख्यश्च महेशाख्याः । प्रज्ञा० ८८ ।

**महेसरा-**महेश्वरः-जिनदासः । आव० ३९६ । महेश्वरः-विद्याचक्रवर्त्ती । आव० ६८५ । महेश्वरः-रुद्रापरनामा । आव० ६८५, ६८६ । महेश्वरः-श्राद्धकुलोत्पन्नस्य सत्यकिनाम । दश० १०७ । महेश्वरः-व्यन्तराणामिन्द्रविशेषः । प्रज्ञा० ८९ ।

**महेसरदत्ते-**महेश्वरदत्तः-जितशत्रुराजपुरोहितः । विपा० ६८ ।

**महेसरीए-**विन्ध्यगिरिपादमूले नगरम् । भग० ६५२ ।

**महेसि-**महान्-बृहन् शेषस्वर्गाद्यपेक्षया मोक्षस्तमिच्छति-अभिलषति महदेषी महर्षि वा । उत्त० ३६६ । महर्षिः-महैषी वा महांश्चासौ ऋषिश्चेति महर्षिः-महान्तं एषितुं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीलं यस्येति महैषी । दश० ११६ ।

**महेसी**-महर्षिः-महेसी, महः-एकान्तोत्सवरूपत्वान्मोक्षस्त-मिच्छतीत्येवं शीलः महैषी । उत्त० २५५ । महैषी-मोक्षैषी । दश० २४६ । महर्षिः-महांश्चासौ सर्वज्ञत्व-तीर्थप्रवर्त्तनाद्यतिशयवत्वाद् ऋषीश्च मुनिरिति तीर्थंकरः । प्रश्न० २ ।

**महो**-महः-एकान्तोत्सवरूपत्वान्मोक्षः । उत्त० २२५ ।

**महोदरो**-जो बहुं भुञ्जति सो । नि० चू० प्र० १४ आ ।

**महोयर**-महोदरः महज्जठरः । उत्त० २७३ ।

**महोरग**-उरःपरिसर्पभेदः । सम० १३५ । जीवा० ३९ । महोरगः-उरःपरिसर्पविशेषः । प्रश्न० ८ ।

**महोरगकण्ठ**-महोरगकण्ठप्रमाणो रत्नविशेषः । जीवा० २३४ ।

**महोरगच्छाय**-महोरगच्छाया-छायागतिविशेषः । प्रज्ञा० ३२७ ।

**महोरगा**-महोरगाः- उरःपरिसर्पभेदविशेषः । प्रज्ञा० ४६ । वाणव्यन्तरभेदविशेषः । प्रज्ञा० ६९ ।

**महोसही**-महोषधिः-राजहंसीप्रमुखः । जं० प्र० ४११ ।

**महोवगरण**-महोपकरणं-द्रव्यनिचयम् । आचा० १२३ ।

**मांस**-बलम् । अनु० १४१ । मांसं-अशुचिविशेषः । प्रज्ञा० ८० ।

**मांसकच्छप**-कच्छपभेदः । सम० १३५ ।

**मांसखलं**-यत्र सञ्खडिनिमित्तं मांसं छित्वा छित्वा शोष्यते शुष्कं वा पुञ्जीकृतमास्ते तै तत्तथा । आचा० ३३४ ।

**मांसचोडादि**- अनु० ३५ ।

**मांसलं**-गुरुधर्मकत्वात् । जीवा० ३३१, ३७० अकठिनः । जं० प्र० ४६ । मांसलः-बहलः । जीवा० ३५१ ।

**मांसानुसारि**-मांसान्तधातुव्यापकम् । ठाणा० ३७५ ।

**माअनि**-मादनि-निरयावल्यां पञ्चमवर्गे द्वितीयमध्ययनम् । निरय० ३४ ।

**माइअंग**-मातृकाङ्गं-आर्तवविकारबहुलम् । भग० ८८ ।

**माइअ**-हस्तपाशितम् । जं० प्र० २०५ ।

**माइग्गाम**-स्त्रीवर्गः । बृ० प्र० ३१४ आ ।

**माइट्ठाण**-मातृस्थानं-माया । दश० २९ ।

**माइट्ठाणिय**-मातृस्थानिकः-मायिकः । दश० ५९ ।

**माइमिस्सिगा**-मातृप्रभृतिका । आव० ७०३ ।

**माइय**-मयूरितः-सञ्जातपुष्पविशेषः । भग० ३७ । मयूरितः । ओप० ७ । मायिनो-वञ्चकः । ज्ञाता० १६१ । रूक्षादिवालयुक्तत्वात् पक्ष्मलम् । ज्ञाता० १३७ ।

**माइया**-मयूरिता । ज्ञाता० ५ । हस्तपासिका । प्रश्न० ४७ ।

**माइल्ल**-मायावान् । ठाणा० ५१४ । माया-परवञ्चनो-पायचिन्ता तद्वान् । उत्त० २४५ । मायालुः-मायावान् । ओघ० १५०, ९८ । मायावी । ओघ० १५१ ।

**माइवाहय**-मातृवाहकः-विकलेन्द्रियजीवविशेषः । अनु० १४१ ।

**माइवाहा**-द्विन्द्रियविशेषः । प्रज्ञा० ४१ । मातृवाहः-कोद्रवाकारतया ये कोद्रवा इति प्रसिद्धा । जीवा० ३१ ।

**माइसपत्ति**-मातृसपत्नी । आव० ३६६ ।

**माई**-मायी-अनन्तानुबन्धिकषायोदयवान् । प्रज्ञा० ३३९ । मायी-उत्कटरागद्वेषः । प्रज्ञा० ३०४ । माया-कौटिल्यम् । दश० २५४ । माया-अनन्तानुबन्धिकषायः । भग० ४४ । अभीक्ष्णं मायाप्रतिसेवी । व्य० प्र० २१४ ।

**माईठाण**-मायास्थानम् । सम० ३९ ।

**माउ**-माता । आव० ३७२ ।

**माउओय**-मातुरोजः-जनन्याऽऽर्तवं, शोणितम् । भग० ८७ ।

**माउगंतं**-वस्त्रस्याद्यन्तभागो मूलदशारूपो वस्त्रं यतो व्यूयते तदादिभूतत्वान्मातृका अन्तः-दशान्तः । बृ० द्वि० २३५ अ ।

**माउगा**-मातृका-कृष्णवासुदेवनिदानकारणम् । आव० १६३ टी० ।

**माउगाओ**-मातरः-प्रवचनमातरोऽष्टौ, प्रवचनमूलम् । आ० ४८३ ।

**माउगापय**-मातृकापदं-उत्तरभेदापेक्षया व्यशीतिर्विषम् । नंदी० २१ ।

**माउग्गाम**-मातृगामः । बृ० प्र० १८४ आ ।

**माउपय**-मातृकापदं, तद्यथा-उपन्ने इ वेत्यादि इह प्रवचने दृष्टिवादे समस्तनयवादबीजभूतानि मातृकापदानि भवन्ति,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा उपन्ने इ वा विगमे इ वा धुवे इ वात्ति । ठाणा० २२३ ।

**माउयंगा**-मात्रङ्गानि-आर्त्तवपरिणतिप्रायाणीत्यर्थः। ठाणा० १७० ।

**माउयकाय**-मातृकापदानि उप्पणेति वेत्यादीनि तत्समूहः मातृकाकायः । आव० ७६७ ।

**माउयपय**-मातृकापदः-'उप्पण्णे इ वा विगमेइ वा धुवे इ वा' इति ऐषां मातृकवत्सकलवाङ्मयमूलता । अकाराद्यक्षरात्मिका । उत्त० १४१ । प्रवचने-दृष्टिवादे समस्तनयवादबीजभूतं मातृकापदम् । दश० ७ । मातृकापदं-मातृकाक्षरादि मातृकाभूतं वा पदम् । दश० ८७ । मातृकापदं-'उप्पन्ने इ वा विगमे इ वा धुवे इ वा, इत्येष मातृकावत्सकलवाङ्मयमूलतया अवस्थितानामान्यन्तरद्विवक्षितं अकाराद्यक्षरात्मिकाया वा मातृकाया एकत्तरोऽकारादिः । ठाणा० ६ ।

**माउया**-मातृका-प्रवचनपुरुषस्योत्पादव्ययध्रौव्यलक्षणा पदत्रयी । ठाणा० ४८१ । वस्त्रादिस्थूलिभावः । बृ० द्वि० २३५ अ । सख्यो मातरो वा । ज्ञाता० १५८ ।

**माउयाणुयोग**-दशविधद्रव्यानुयोगे द्वितीयः । मातृका-प्रवचनपुरुषस्योत्पादव्ययध्रौव्ययलक्षणा पदत्रयी तस्य अनुयोगः। ठाणा० ४८१ ।

**माउर**-चक्षुरिन्द्रियनष्टः । भक्त० ।

**माउल**-मातुलः-मातृसहोदरः । दश० २१५ ।

**माउलिंग**-मातुलिङ्गम् । प्रज्ञा० ३६४ । मातुलिङ्गं-बहुबीजकम् । प्रज्ञा० ३२ । मातुलिङ्गं-बीजपूरकम् । दश० १८५ । वनस्पतिविशेषः । भग० ८०३ । मातुलिङ्गः-बीजपूरकः । अनु० १९२ ।

**माउलिंगपाणगं**-पाणकविशेषः । आचा० ३४७ ।

**माउलिंगी**-गुच्छाविशेषः । प्रज्ञ० ३२ ।

**माउलुंग**-मातुलुङ्गः । प्रज्ञा० ३२८ ।

**माउसिया**-मातृस्वसा-जनिनीभगिनी । विपा० ५८ ।

**माउसियाउत्तो**-मातृष्वस्रेयः । आव० १८८ ।

**माओऊयं**-मातृरजः । तं० ।

**माकंदी**-चंपायां सत्थवाहः । ज्ञाता० १५६ ।

**मागंदियदारए**- । ज्ञाता० २२१ ।

**मागंदियदारा**- । नि० चू० तृ० ६४ अ ।

**मागंदियपुत्त**-महावीरविभोः शिष्यः । भग० ७३६ ।

**मागंदी**-ज्ञातायां नवममध्ययनम् । आव० ७५३ । सम० ३६ ।

**मागध**-तीर्थविशेषः । ज्ञाता० १२८ । द्रव्यतीर्थः । आव० ४९८ ।

**मागधगणिका**-नानाविधकपटकरणदक्षा गणिका । सूत्र० १०५ ।

**मागह**-मगधजनपदजातत्वान्मागधः । भग० ११४ । मागधः-क्षत्रियवैश्याभ्यां जातः । आचा० ८ । मगधदेशः । ज्ञाता० ११६ । मागधः-भट्टः । ज्ञाता० ४ । मागध.-मङ्गलपाठकः । अनु० ४६ । जम्बूद्वीपे तृतीयं तीर्थम् । ठाणा० १२२ । मागधः-भट्टः । ओप० ५ । मागधः-बन्दीभूतः । जीवा० २८० । मगधेषु भवं मागधं-मगधदेशव्यपहृतम् । ठाणा० ४३५ ।

**मागहओ**-मागधिकः-मागधसत्कः । ओघ० २१५ ।

**मागहतित्थकुमार**-मागधतीर्थकुमारः मागधतीर्थस्याधिपतिः कुमारो मागधतीर्थकुमारः, तन्नामकः देवः । जं० प्र० २०३ ।

**मागहपत्थए**-प्रमाणेन मगधदेशव्यवहृतः प्रस्थोः मागधप्रस्थः । ज्ञाता० ११६ ।

**मागहपेच्छा**-मागधप्रेक्षा । ओप० ६१ ।

**मागहिआ**-मागधिका-छन्दोविशेषः । ज० प्र० १३८ ।

**मागहिय**-कलाविशेषः । ज्ञाता० ३८ ।

**मागहिया**-मागधिका । उत्त० १३७ ।

**मागमग्गि**-पृष्ठतःपृष्ठतः । आव० ३८८ ।

**माघभद्रा**-वापी नाम । ज० प्र० ३७० ।

**माघवति**-कृष्णराज्ञेः तृतीयं नाम । ठाणा० ४३२ ।

**माघवती**-माघवती-कृष्णरात्रिः । भग० २७१ ।

**माञ्जिष्ठ**-रागविशेषः । ज० प्र० १८८ ।

**माडंब**-मडम्बं जलदुर्गम् । उत्त० ३४३ । सर्वतश्छिन्नजनाश्रयविशेषरूपं मडम्बम् । अनु० २३ ।

**माडंबिअ**-माडम्बिकः-पूर्वोक्तमडम्बाधिपः । ज० प्र० १९२ । माडम्बिकः-छिन्नमण्डपाधिपः । राज० १२१ । मडम्बं-जलदुर्गं तस्मिन् भवो माडम्बिकः तन्नोक्ता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्त० ३४३ ।

**माडंबिआ** माडम्बिकः–मडम्बाधिपतिः । जीवा० २८० ।

**माडंबिइया**–माडम्बिकः- छिन्नमडम्बाधिपतिः । बृ० द्वि० १२१ अ ।

**माडंबित**–माडम्बिकः–छिन्नमडम्बाधिपः । ठाणा० ४६३ । प्रज्ञा० ३२७ ।

**माडंबिय**–माडम्बिकः–प्रत्यन्तराजा । प्रश्न० ६६ । माडम्बिकः–छिन्नमडम्बाधिपः । भग० ३१८, ४६३ । माडम्बिकः संनिवेशविशेषनायकः । भग० ११५, ४६३ । चित्रमण्डपाधिपः । राज० १२१ ।

**माडंबी**–माडम्बिकः–प्रत्यन्ताधिपः–छिन्नमडम्बनायकः । बृ० प्र० २५५ आ ।

**माडंबिओ**–जो छिण्णमंडवं भुञ्जति सो माडंबिओ । नि० चू० प्र० २७० अ ।

**माढभाग**–रजतमय उत्सेधः । ज० प्र० ४१ ।

**माढर**–रथानितापतो । ठाणा० ३०३ ।

**माढरि**–साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।

**माढी**–सन्नाहविशेषः । ज० प्र० २०६ । तनुत्राणविशेषः । प्रश्न० ४७ ।

**माण**–मानं–कुडवादि । आव० ८२३ । मानक्रिया-मानाय त्स्करणम्, क्रियायाः नवमो भेदः । आव० ६४८ । मानं–जलद्रोणप्रमाणता । औप० १३ । मानान्मानावमानगणिमप्रतिमानलक्षणम् । आव० १२८ । मानं–जलद्रोणप्रमाणता । प्रश्न० ७४ । मानं-प्रमाणम् । सूर्य० १७१ । मानः वन्दनाभ्युत्थानलाभनिमित्तः । दश० १८७ । मानं–जलद्रोणप्रमाणता । ज० प्र० २५३ । मानं–जलद्रोणप्रमाणता । ठाणा० ४६१ । मानं–स्वलक्षण अनन्तानुबन्ध्यादिविशेषः । आचा० १६४ । भग० १४३ । मृषाभाषाया द्वितीयो भेदः । ठाणा० ४८९ । मानम् । पिण्ड० १२१ । विभागनिष्पन्ने प्रथमो भेदः । अनु० १५१ । मानः–गर्वपरिणामः । जीवा० १५ । ज्ञाता० २७ । ठाणा० ३३६ । मानः–जात्यादिगुणवानहमेवेत्येवं मननं–अवगमनं, मन्यते वाऽनेनेति मानः । ठाणा० १९३ । मानः-अहमितिप्रत्ययहेतुः । उत्त० २६१ । मानः–जातिकुलरूपबलादिसमुत्थो गर्वः । आचा० १७० । मानं–प्रस्थकादिः । आचा० ४१३ । मानं–सेतिकादि तद्विषयम् । ठाणा० ४४९ । मानं–जलद्रोणप्रमाणता । ज्ञाता० ११ । एतत् । बृ० प्र० १३३ अ । वंदण–अब्भुट्ठाणपव्वइओ जो रागदेसे कीरइओ वा । दश० चू० ८८ आ । मानः । राज० १३३ ।

**माणक**–माप्यविशेषः । ज० प्र० २४४ ।

**माणकर**-माणकरः–गच्छार्थंकरोऽहमिति माद्यति । ठाणा० २४१ ।

**माणजुत्तो**–जलपरियाए दोणीए जलस्स दोणं छड्डेंतो माणजुत्तो । नि० चू० द्वि० ८५ आ । द्रोणं पाणियस्स पडिच्छति । नि० चू० तृ० ६१ अ ।

**माणण**-माननं–अभ्युत्थानासनदानाञ्जलिप्रग्रहादिरूपम् । आचा० २६ ।

**माणनिसूरण**–हस्तारात्यहङ्कारविनाशकः । उत्त० ४४८ ।

**माणनिस्सिआ**–माननिसृता–मृषाभाषाभेदः । मानाध्माताः दश० २०६ । माननिःसृता यत्पूर्वमननुभूतमप्यैश्वर्यमात्मोत्कर्षख्यापनायानुभूतमस्माभिस्तदानीमैश्वर्यमित्यादि वदतो भाषा । प्रज्ञा० २५६ ।

**माणपिंडो**–माणट्ठितो जं एसतित्ति सो माणपिंडो, अभिमाणतो पिंडग्गहणं करेतित्ति माणपिंडो । नि० चू० द्वि० १०० आ ।

**माणब्भंस**–मानभ्रंशम् । ज्ञाता० १९२ ।

**माणभद्द**–मिथीलायां चैत्यः । भग० ४२५ ।

**माणमाणे**–मानयन् तदनुभावमनुभवन् । ४६२ ।

**माणयति**–मानयति श्रुतोपदेशं प्रति चोदनादिभिः शिष्यान् दश० २६४ ।

**माणवए**–माणवर्गः–षट्चत्वारिंशत्तमो महाग्रहः । ठाणा० ७९ । माणवकः । दश० ६३ । माणवकः । सूर्य० २६७ । अष्टाशीतौ षट्चत्वारिंशत्तमो महाग्रहः । जं० प्र० ५३५ ।

**माणवक**–चैत्यस्तम्भः । सम० ६४ । सौधर्मसभायां स्तम्भः । ज्ञाता० १५ ।

**माणवग**–माणवकः–चैत्यस्तम्भः । ज० प्र० ३२७ । चक्रवर्तेऽष्टमो निधिः । ठाणा० ४४८ ।

**माणवगण**–श्रमणस्य भगवतो महावीरस्य अष्टम गणः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठाणा० ४५१ ।

**माणवगनिही**-माणवकनिधिः । आव० ११४ ।

**माणवगा**-माणवकनामानः चैत्यस्तम्भः । जं० प्र० १६३ ।

**माणस**-गान्धर्वनिकाधिपतिः । भग० ६७४ । ठाणा० ४०६ ।

**माणसन्ना**-मानोदयादहङ्कारात्मिका उत्सेकादिपरिणति-र्मानसंज्ञा। प्रज्ञा० ६२२ । मानोदयादहङ्कारात्मिकोत्सेक-क्रिया, मानसः संज्ञाऽनयेति मानसंज्ञा । भग० ३१४ । मानोदयादहङ्कारात्मिकोत्सेकक्रियैव सञ्ज्ञायतेऽनयेति मान-सञ्ज्ञा । भग० ३१४ ।

**माणसिय**-मानसिकः । आव० ७७८ । मनसा निर्वृतो मानसः स एव मनःकृतो मानसिकः । आव० ५७१ । मानसिकं-चिन्तितम् । ठाणा० ४६६ ।

**माणसीसहस्सं**-मानसीसहस्रम् । जीवा० २३३ ।

**माणा**-माना-मानानुगता । आव० ५४८ ।

**माणि**-माणिभद्रमिधानदेवावासत्वान्माणिभद्रकूटम् । ठाणा० ४५४ ।

**माणिओ**-मानिकः । ओघ० ६८ ।

**माणिकी**-( देशी० ) कोयवः । (?) ।

**माणिज्जामि**-मानयिष्ये । उत्त० ८४९ ।

**माणिभद्द**-माणिभद्रः-वर्द्धमानपुरस्य विजयवर्द्धमानोद्याने यक्षः । विपा० ८८ । माणिभद्रः वैश्रमणस्य पुत्रस्था-नीयो देवः । भग० २०० । माणिभद्रः-उत्तरनिकाये व्यन्तरेन्द्रः । भग० १५८ । भग० ६८० । निरयावल्यां तृतीयवर्गे षष्ठमध्ययनम् । निरय० २१ । सुधर्मसभायां माणिभद्रसिंहासने देवः । निरय० ३६ । मणिपतिनगर्यां गाथापतिः । निरय० ३६ । माणिभद्रः-यक्षेन्द्रः । जीवा० १७४ । नि० चू० द्वि० २२ अ । माणिभद्रं-औत्तर-पौरस्त्ये दिग्विभागे चैत्यः । सूर्य० २ । माणिभद्रः-यक्षविशेष । आव० २२५ । मिथिलानगर्यां चैत्यविशेषः । जं० प्र० ६, ५४० ।

**माणिभद्दकूड**-मणिभद्रनाम्नो देवस्य निवासभूतं कूटं मणिभद्रकूटम् । जं० प्र० ७७ । मणिभद्रकूटं-वैताढ्य-कूटनाम । जं० प्र० ३४१ ।

**माणिभद्दत**-महापद्मसेनापतिः । ठाणा० ४५९ ।

**माणिभद्र**-द्रव्यपूतिनिरूपणे समिल्लपुरे यक्षः । पिण्ड० ८३ । अनिसृष्टद्वारविवरणे गृहस्थविशेषः । पिण्ड० ११३ । यक्षभेदविशेषः । प्रज्ञा० ७० ।

**माणिम**-माणजोगो-माणणोओ । दश० चू० १५७ आ । मान्यः । दश० २७५ ।

**माणी**-माणिका-षट्पञ्चाशदधिकशतद्वयपलप्रमाणा । अनु० १५२ । मानी-जात्यादिमदोपेतः । सूर्य० २९६ ।

**माणुम्माणियं**-एगस्स वलमाणं अन्नेण अणुमीयत इति माणुम्माणियं । नि० चू० द्वि० ७१ अ ।

**माणुम्माणियट्ठाणाणि**-मानोन्मानस्थानानि-मानं-प्रस्थ-कादिः उन्मानं-नाराचादि, यदि वा मानोन्मानमित्य-श्वादीनां वेगादिपरीक्षा तत्स्थानि तद्वर्णनस्थानानि वा । आचा० ४१३ ।

**माणुस**-मनसि शेते मानुषः, मनोऽपत्यमिति वा । उत्त० १८१ । मानुषः । आव० २७३ ।

**माणुसखेत्त**-मानुषक्षेत्रं-समयक्षेत्रम् । प्रज्ञा० ४२९ ।

**माणुसगाइ**- । ज्ञाता० ८१ ।

**माणुसरंधणाणि**-मानुषरन्धनानि चुल्ल्यादीनि । आचा० ४११ ।

**माणुसुत्तर**-मानुषोत्तरः-पुष्करवरस्य द्वीपस्य बहुमध्यदेश-भागे पर्वतः । जीवा० ३३३, ३४३ । मानुषोत्तरः । आव० १९२ । मण्डलाकारपर्वतः । ठाणा० १६६ । मानुषेभ्यो-मानुषक्षेत्राद्वोत्तरः परतो वर्त्ती मानुषोत्तरः । ठाणा० १६६ । ईशानकल्पे देवविमानविशेषः । सम० २ ।

**माणुस्स**-मानुष्यकं-मनुष्यसम्बन्धि औदारिकशरीरम् । उत्त० १८४ । मानुष्यम् । आव० ३४१ ।

**माणेमाणी**-मानयन्ती स्पर्शनद्वारेण । ज्ञाता० ३३ ।

**मातंजणा**- । ठाणा० ८० ।

**मातङ्गविद्या**-यदुपदेशादतीतादि कथयन्ती डोम्ब्यः । ठाणा० ४५१ ।

**मातमिस्सिया**-मातृमिश्रा । आव० ८२३ ।

**मातापितृसमान**-अम्मापिइसमाणो-उपचारं विना साधुषु एकान्तेनैव वत्सलः । ठाणा० २४३ ।

**मातिघर**-मातृगृहम् । आव० ८६३ ।

**मातुगाम**- । नि० चू० प्र० २४७ अ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मातुलिंग-बीजपूरम् । आव० ३६५ ।

मातुलुंग-बीजपूरकम् । अनुत्त० ६ ।

मातृवाहकाः-ये काष्ठशकलानि समोभयाग्रतया सम्बन्धिः उत्त० ६९५ ।

मातृस्थानं-मायागारवम् । दश० २२६ । कपटम् । पिण्ड० १४४ । अनु० १४० । आव० ८३८ ।

मातुस्थानतः- । उपा० ११ ।

मात्रः-कांस्यभाजनाद्युपकरणमात्राया आधार विशेषः । अनु० १५६ ।

मात्रकम्- । आचा० ३४५ ।

मात्रा-तुल्यवाची । नि० चू० तृ० १०८ आ ।

मात्रापुत्रीय-सङ्ग्रामे परानीकसुभटेन जेत्रा । सूत्र० ८०।

मात्सिकमल्ल-मल्लविशेषः । व्य० द्वि० ३५७ अ ।

माथुरकोट्टइल्ल-उदायिनृपमारकः । आव० ५२६ ।

माथुरखभार-आक्रोशसहः । मर० ।

माथुरी-मथुरापुरिसङ्घटितमत इयं वाचना माथुरी । नंदी० ५१ । स्कन्दिलाचार्यसङ्घटिता । (?) । स्कन्दिलाचार्य-प्रभृतिसङ्घटितवाचना । (?) । मथुरापुर्यां पुनरनुयोगः प्रवर्त्तित इति वाचना माथुरी । नंदी० ५१ ।

मादिमिस्सगा-मातृमिश्रका । आव० ६७६ ।

मान-धान्यमानं-सेतिकाकुडवादि । ज० प्र० २१७ । मानं-जलद्रोणमानता । भग० ११६ ।

मानकर-कथमहमनभ्यर्थितः कथयिस्यामीति मानकरः । ठाणा० २४१ ।

मानक्रिया-यज्जात्यादिमदमत्तस्य परेषां हीलनादिकरणम् । ठाणा० ३१६ ।

मानमूरण-मानमर्दनः । ज० प्र० ४२१ ।

मानवत्तिए-मानप्रत्ययः-जात्यादिमदहेतुकः । सम० २५ ।

मानसं-एकस्मिन् वस्तुनि चित्तस्यैकाग्रता । बृ० प्र० २५६ अ ।

मानससरः-दिव्यसरोवरविशेषः । प्रज्ञा० १५९ ।

मानुष-मनुजः । नंदी० १६१ ।

मानुषोत्तर-लब्धिमतामेकोत्पातस्थानम् । आव० ४७ ।

माप-मानम् । नंदी० ६२ ।

माम-भ्रातः । पउ० ३८-४६ ।

मामए-मामकः-ममेदमहमस्य स्वामीत्येवं परिग्रहाग्रही । सूत्र० ६९ । मामकः-मा मम समणा घरमइंतु । ओघ० १५६ । नि० चू० प्र० २९२ अ ।

मामग-मामकं-यत्राहं गृहपतिः मा कश्चिद् गृहमागच्छेत् एतादृशं गृहम् । दश० १६६ । य एवं वक्ति-मा मम समणा घरमइंतु । ओघ० ९३ ।

मामणा ममीकारार्थे (देशीवचनम्) । आव० १२८ ।

मामाओ-आहारादिएसु चेव सव्वेसु ममत्तं करेति मामाओ । विविधदेसगुणेहिं पडिबद्धो मामाओ । नि० चू० द्वि० ६२ आ ।

मामाक-ईर्ष्यालुः । बृ० प्र० २४६ अ ।

मामिया-मामिका-मातुलभार्या । विपा० ५८ ।

मायंकटु-मायां कृत्वा-मायां पुरस्कृत्य माययोत्येर्थः : ठाणा० १३७ ।

मायंग मातङ्गः-हस्ती । जीवा० १२२ ।

मायंगी-मातङ्गी-योगसंग्रहे शिक्षादृष्टान्ते श्रेणिकदौहित्री अभयपत्नी विद्याधरपुत्री । आव० ६७३ ।

मायंजण-तृतीयो वक्षस्कारः । ठाणा० ३२६ । मातञ्जनो-वक्षस्कारादिः । ज० प्र० ३५२ ।

मायंदी-माकन्दी-षष्ठाङ्गे नवमं ज्ञातम् । उत्त० ६१४ । ज्ञाताधर्मकथायाः प्रथमश्रुतस्कन्धे नवममध्ययनम्, माकन्दीनाम वणिक् तत्पुत्रो माकन्दीशब्देनेह गृहीतः । ज्ञाता० ९ ।

माय-गुरुत्वेन मायाप्रधानोऽतिचारः । ठाणा० ४१६ । मातं-अन्तःप्रासावस्थिति तद्द्रव्यम् । अन्तरवस्थितम् । उत्त० ५१३ । माया-परवञ्चनाध्यवसायः । आचा० १७० । माया-दशविधमृषायां तृतीया मृषाभाषा । ठाणा० ४८९ ।

मायन्ने-यावद् द्रव्योपयोगिता मात्रा तो जानातीति तज्ज्ञः । आचा० १३२ ।

माया-मीयते वाऽनयेति माया । ठाणा० १९३ । माया-सर्वत्र स्ववीर्यं निगूहनम् । आव० ४३ । माया-वञ्चनबुद्धिः । सूयं० ३१९ । मात्रा-आहारमात्रा । भग० १२२ । मात्रा-आलम्बनसमूहांशः । भग० २१४ । माता-व्युत्पत्तिभूमिः । प्रश्न० १७ । मर्यादा-मात्राशब्दस्य मर्यादावाचित्वेनापि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूढत्वात् । उत्त० २६६ । परिमाणार्थोऽयं मात्राशब्दः । उत्त० २६६ । ज्ञाता० ७१ । परवञ्चनबुद्धिः । ज्ञाता० २३८ । पवञ्चनाभिप्रायः । व्य० द्वि० २६ अ । मात्र-शब्दः आकारभावव्यतिरिक्तप्रतिबिम्बादिधर्मान्तरप्रतिषेध-वाचक:, वास्तव्यपरिणामप्रतिषेधवाचकः । आव० ३३८ । स्वपरव्यामोहोत्पादकं शाठ्यम् । उत्त० २६१ । प्रता-रणबुद्धिः । प्रश्न० ५८ । माया । पिण्ड० १२१ । मायाक्रिया, क्रियाया एकादशमो भेदः । आव० ६४८ । निकृतिः । आव० ७८९ । मायानुगता । आव० ५४८ । मायानिर्वर्त्तितं यत्कर्म मिथ्यात्वादिकं तदपि माया । प्रज्ञा० ५५८ । अनार्जवम् । प्रज्ञा० ३३५ । निकृति-रूपा । जीवा० १५ । मायाविषयं गोपनीयं, प्रच्छन्न-मकार्यं कृत्वा नो आलोचयेत् मायाम् । ठाणा० १३७ । परवञ्चनबुद्धिः । ज्ञाता० ७६ । मात्रा-संयमयात्रार्थं परिमिताहारग्रहणम् । नंदी० २१० । मात्रा-परिमाणम् । उत्त० २८१ । अष्टमं पापस्थानकम् । ज्ञाता० ७५ ।

**मायाकारः-** । ठाणा० ४९० । दश० २०६ ।

**मायाक्रिया-**यच्छठतया मनोवाक्कायप्रवर्त्तनम् । ठाणा० ३१६ ।

**मायागारव-**मायागारवं मातृस्थानम् । दश० २२६ ।

**मायागोलकः-** । उत्त० १६३ ।

**मायानियडीपसंग-**मायैव निकृतिर्माया निकृतिस्तस्याः प्रसङ्गः । आव० २६४ ।

**मायानिस्सिया-**मायानिःसृता, यत्परवञ्चनाद्यभिप्रायेण सत्यमसत्यं वा भाषते । प्रज्ञा० २५६ ।

**रयणावलिवरमहाभद्द**-रत्नावलिवरमहाभद्रः-रत्नावलिवरे द्वीपेऽपरार्द्धाधिपतिर्देवः । जीवा० ३६६ ।

**रयणावलिवरमहावर**-रत्नावलिवरमहावरः- रत्नावलिवरे समुद्रेऽपरार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**रयणावलिवरावभासभद्द**-रत्नावलिवरावभासभद्रः-रत्नावलिवरावभासे द्वीपे पूर्वार्द्धाधिपतिर्देवः । जीवा० ३६६ ।

**रयणावलिवरावभासमहाभद्द**-रत्नावलिवरावभासमहाभद्रः-रत्नावलिवरावभासे द्वीपेऽपरार्द्धाधिपतिर्देवः । जीवा० ३६६ ।

**रयणावलिवरावभासमहावर**-रत्नावलिवरावभासमहावरः- रत्नावलिवरावभासे समुद्रेऽपरार्द्धाधिपतिर्देवः । जीवा० ३६९ ।

**रयणावलिवरावभासवर**-रत्नावलिवरावभासवरः-रत्नावलिवरावभासे समुद्रे पूर्वार्द्धाधिपतिर्देवः । जीवा० ३६६ ।

**रयणावली**-रयणेहिं रयणावली । नि० चू० प्र० २५४ आ । नि० चू० प्र० ३०६ आ । रत्नावली-आभरणविशेषः । तपो विशेषः । अन्त० २५ । रत्नमयी । भग० ४७७ । रत्नावलिः-द्वीपविशेषः, समुद्रविशेषश्च । जीवा० ३६८ । रत्नावली-आभरणविशेषः, रत्नावलीव रत्नावली, यथा हि रत्नावली उभयत आदिसूक्ष्मस्थूलस्थूलतरविभागकाहलिकाख्यसौवर्णावयवद्वययुक्ता भवति, पुनर्मध्यदेशे स्थूलविशिष्टमण्यलङ्कृता च भवति, एवं यत्तपः पट्टादावुपदर्श्यमानमिममाकारं धारयति तद् रत्नावलीत्युच्यते । अन्त० २५ ।

**रयणावलीवरावभास**-रत्नावलिवरावभासः-द्वीपविशेषः समुद्रविशेषश्च । जीवा० ३६८ ।

**रयणाहिय**-रत्नाधिकः-प्रव्रज्यापर्यायाधिकः, श्रुताधिकः समवया वा । सूत्र० २४४ ।

**रयणि**-रत्निः-हस्तः । भग० ३०९ । रत्निः-द्विवितस्तिप्रमाणा, हस्तः । जीवा० ४० ।

**रयणिखेत्त**-रजन्या एव । सम० ८६ ।

**रयणी**-द्वे वितस्ती रत्निः-हस्तः । अनु० १५८ । हस्तः । ठाणा० ३६, २०४, २८६ । प्रज्ञा० ४८, ४२६ । भग० २७५ । ठाणा० ३६३ । चतुर्विंशत्यङ्गुलप्रमाणः । भग० २७५ । चमरेन्द्रस्य तृतीयाऽग्रमहिषी । भग० ५०३, ५०१ । चतुर्विंशतिरङ्गुलानि रत्निः । नामकोशादौ "बद्धमुष्टिर्हस्तो रत्निः ।" ज० प्र० ६४ । धर्मकथायां प्रथमवर्गे तृतीयमध्ययनम् । ज्ञाता० २४७ । आमलकल्पायां गाथापतिः । ज्ञाता० २५१ । रत्नीगाथापतेर्दारिका । ज्ञाता० २५१ । बद्धमुष्टिको हस्तः रत्निः । ज० प्र० १६६ । रजनी-पिण्डदारुहरिद्रा । उत्त० १४२ । रत्निः-विततागुलिर्हस्तः । सम० १३ ।

**रयणीपमाणमित्त**-रत्निप्रमाणमात्रं-यथा दण्डो हस्तप्रमाणो भवति तथा । ओघ० २१४ ।

**रयणुच्चए**-रत्नानां नानाविधानामुत्-प्राबल्येन चयः-उपचयो यत्र स रत्नोच्चयः । सूर्य० ७८ ।

**रयणुच्चओ**-रत्नोच्चयः-मेरुमहीधरः । बृ० द्वि० २६५आ ।

**रयणुच्चय**-त्रयोदशमं स्वप्नम् । ज्ञाता० २० ।

**रयणोच्चय**-रत्नानां-नानाविधानामुत्-प्राबल्येन चयः-उपचयो स रत्नोच्चयः, मेरुनाम । जं० प्र० ३७५ ।

**रयणोच्चया**-रत्नोच्चया-उत्तरपश्चिमरतिकरपर्वतस्य दक्षिणस्यामीशानदेवेन्द्रस्य वसुगुप्ताया अग्रमहिष्या राजधानी । जीवा० ३६५ ।

**रयणोरुजाल**-रत्नोरुजालं-भूषणविधिविशेषः । जीवा० २६९ । रत्नोरुजालं-रत्नमयं जङ्घायाः प्रलम्बमानं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्कुलकं सम्भाव्यते । जं० प्र० १०६ ।

**रयत**-रजतकाण्डं-द्वादशं, रजतानां विशिष्टो भूभागः । जीवा० ८६ ।

**रयतणी**- । ठाणा० ३९३ ।

**रयत्ताणं**-रजस्त्राणम् । ओघ० १९९ । रजस्त्राणं-पात्रवेष्टनचीवरम् । प्रश्न० १५६ । रजस्त्राणम् । आव० ६२३ । रजस्त्राणं-आच्छादनविशेषः । ज्ञाता० १३ । रजस्त्राणं-आच्छादनविशेषः । जं० प्र० २८५ ।

**रययकूड**-रजतकूटं-नन्दनवने पञ्चमं कूटनाम । जं० प्र० ३६७ ।

**रययवडिसए**-रजतावतंसकः-अपरस्यामवतंसकः । जीवा० ३९१ ।

**रयरेणुविणासण**-श्लक्ष्णतरा रेणुपुद्गला रजस्त एव स्थूला रेणवः रजांसि च रेणवश्च रजो-रेणवस्तेषां विनाशनं रजोरेणुविनाशनम् । जीव० २४५ ।

**रयसंसट्ठहडा**-रजःसंसृष्टाहृता-पृथिवीरजः सम्बद्धा नीता प्राभृतिका । आव० ५७६ ।

**रयसुसंपउत्तं**-श्रृङ्गमयो दारुमयो वंशमयो वाऽङ्गुलिकोशस्तेनाहतायास्तन्त्र्याः स्वरप्रकारो लयस्तमनुसरद् गेयं लयसुसंप्रयुक्तम् । जीवा० १९५ ।

**रयहरणं**-रजोहरणम् । आव० ३१९, ७९३ । रजोहरणं-धर्मध्वजः । पिण्ड० १३ । ज्ञाता० ५३ ।

**रयहरणचाय**-रजोहरणवर्जः, रजोहरणग्रहणम् । व्य० द्वि० २७ आ ।

**रयहरणपडिग्गहमत्ता**-रजोहरणप्रतिग्रहमात्रा । आव० ३५६ ।

**रयहरणसीसगा**- । नि० चू० प्र० २४६ अ ।

**रयिप्पिया**-धर्मकथायां पञ्चमवर्गेऽध्ययनम् । ज्ञाता० २५२ ।

**रयुग्घात**-महास्कन्धावारगमनसमुद्धता इव विश्रसापरिणामतो समंता रेणुपतनं । नि० चू० तृ० ७० अ ।

**रयुग्घाय**-रजउद्घातः-रजस्वला दिशः । अनु० १२१ ।

**रयोहरण**-रजोहरणम् । प्रश्न० १५६ ।

**रल्लग**-रल्लकः-कम्बलविशेषः । जं० प्र० १०७ ।

**रल्ला**-दधिजन्तुविशेषः । आव० ६२४ ।

**रव**- । ज्ञाता० १५१ ।

**रवइ**-रवते-शब्दं करोति । जीवा० २४८ ।

**रविउ**-द्रावितः-खण्डशो नीतः । विशे० ६२७ ।

**रविगत**-जत्थ सूरो ट्ठितो तं रविगतं । नि० चू० तृ० ६९ अ ।

**रविगय**-रविगतं यत्र रविस्तिष्ठति । विशे० १२९४ ।

**रवित**-रुतम् । ज्ञाता० १६० ।

**रस**-रस्यते-आस्वाद्यत इति रसः । प्रज्ञा० ४७३ । अत्यन्तासक्तिरूपः । उत्त० २९६ । रस्यते-अन्तरात्मनाऽनुभूयत इति रसः । अनु० १३५ । रसं-रसग्राहकं रसनेन्द्रियम् । रस्यते-आस्वाद्यतेऽनेन तिक्तादिरूपम् । प्रज्ञा० ५९९ । श्रोतृणामाक्षेपकारी गुणविशेषः । बृ० प्र० १९२ आ । विपाकः । विशे० ५६५ । इक्षुरसः । नि० चू० द्वि० १८७ अ । धातुपाणिएण तंबगादि आसित्तं सुवण्णादि भवति सो रसो भण्णति । नि० चू० द्वि० ८६ आ । रसः लक्षणम् । दश० चू० ४८ । रसः-श्रृङ्गारादिः । प्रश्न० ११७ । रसः-मधुरादिकः, भोगो वा । उत्त० ४०६ । तीमनकाञ्जिकादिः । ठाणा० ३८६ । विकृतिः । आचा० ३०६ । फाणितादृसः । दश० ८४ । रसः-निष्यन्दः सारः । दश० ११० ।

**रसकषाय**-हरीतक्यादीनां रसः । आव० ३६० ।

**रसगा**-रसमनुगच्छन्तीति रसगाः-कटुतिक्तकषायादिरससंवेदिनः संज्ञिनः इत्यर्थः । आचा० २३७ ।

**रसगारव**-रसगौरवं रसेन गौरवं-इष्टरसप्राप्त्यभिमानाप्राप्तिप्रार्थनद्वारेणात्मनोऽशुभभावगौरवम् । आव० ५७९ ।

**रसघातः**- । उत्त० ५८० ।

**रसट्ठाए**-रसार्थं सरसमिदमहमास्वादयामीति धातुविशेषो वा रसः, स चाशेषधातूपलक्षणं ततस्तदुपचयः स्यादित्येतदर्थम् । उत्त० ६६७ ।

**रस(सर)देवी**-चतुर्थवर्गे नवममध्ययनम् । निरय० ३७ ।

**रसना**-जिव्हा । जीवा० २७३ ।

**रसनिज्जूढ**-रसनिर्यूढं-कदशनम् । दश० २३१ ।

**रसनिज्जूहणया**-घृतादिरसपरित्यागः । ठाणा० २३३ ।

**रसपरिच्चाओ**-रसत्यागः । भग० ९२१ ।

**रसमाणप्पमाणे**-रसमानप्रमाणं-सेतिकादेश्चतुर्भागादिकमभ्यन्तरशिखायुक्तं यद्रसमानं क्रियते तत् । अनु० १५२ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रसमान-कर्षादि । ठाणा० १९८ । चतुःषष्टिकादि । ज० प्र० २२७ ।

रसमुच्छिए-तत्पिशितास्वादस्तत्र मूर्च्छितो-गृद्धो रस-मूर्च्छितः । उत्त० ४३८ ।

रसमेह-रसजनको मेघो रसमेघः । ज० प्र० १७४ ।

रसया-रसाजाता रसजाः-तक्रारनालदधितीमनादिषु पायु-कृम्याकृतयोऽति सूक्ष्मा जीवाः । दश० १४१ ।

रसवती-शालनकादि । व्य० प्र० ८१ अ ।

रसवाणिज्ज-रसवाणिज्यं-रसव्यापारः । आव० ८२९ ।

रसहरणो-रसो ह्रियते-आदीयते यया सा रसहरणी-नाभिनालम् । भग० ८८ ।

रसाः-पृथगेव शृङ्गारादयो वा । उत्त० २९६ ।

रसाञ्जनम्- । दश० ११८ ।

रसातण-रसः-अमृतरसस्तस्यायनं-प्राप्तिः रसायनम् । ठाणा० ४२७ ।

रसायण-रसः-अमृतरसस्तस्यायनं-प्राप्तिः रसायनम् । आयुर्वेदस्य सप्तमाङ्गम् । विपा० ७५ ।

रसालू-मज्जिका । प्रश्न० १६३ । रसालूः-मज्जिका । भग० ३२६ । रसालूः-मर्जिका । सूर्य० २९३ ।

रसावण-मज्जावणो । नि० चू० प्र० १५४ आ । मद्या-पणम् । बृ० द्वि० १८६ अ ।

रसिए-रसिकः-स्निग्धमधुरः । बृ० प्र० २१७ अ ।

रसणो-रसिनी-सौवीरिणी । बृ० प्र० २७३ आ ।

रसितं-रसिकं-माधुर्याद्युपेतम् । ठाणा० ३७५ ।

रसियं-रसितं-शूकरादिशब्दितमिव करुणोत्पादकम् । प्रश्न० १६० । रसितं-रसयुक्तं दाडिमाम्रादि । आव० ७२६ ।

रसुंठ- । भग० ८०२ ।

रसेसि-रसैसी पानार्थी । आचा० ३१४ ।

रसोतोए- । नि० चू० प्र० १९७ आ ।

रसोदए-पुष्करवरसमुद्रादिषु रसोदकम् । प्रज्ञा० २८ ।

रस्सी-रश्मिः-प्रग्रहः । उत्त० ५०७ ।

रस्सीमंडल-रश्मिमंडलः-सूर्यः । आव० १९२ ।

रह-क्रीडारथादयः । जं० प्र० ३० । रणरथः । जं० प्र० ३७ । विजनम् । ठाणा० ४६६ । रथः । प्रश्न० ८ । रथः-रथाङ्गः चक्रम् । प्रज्ञा० ६०० । यानरथः सङ्ग्राम-रथश्च । अनु० १५९ । रथः-क्रीडारथः सङ्ग्रामरथश्च । जीवा० १८९ । रथः-द्विप्रकारैः यानरथसङ्ग्रामरथभेद-भिन्नः । जीवा० २८१ । रथः-शकटः । बृ० प्र० ७४ आ । भग० २३७ ।

रहकार- । नि० चू० प्र० १२० अ ।

रहघणघणाइय-रथघणघणायितम् । जीवा० २४७ ।

रहचरियं- । भग० ६८९ ।

रहछाया-रथच्छाया । प्रज्ञा० ३२७ ।

रहजोही- । ज्ञाता० ३८ ।

रहट्ठाण-रहःस्थानं-गुह्यापवरकमन्त्रगृहादि । दश० १६६ ।

रहण- । ठाणा० ४६६ ।

रहणेमी-रथनेमिः । दश० ९६ ।

रहनेउर-रथनूपुरं-विद्याधरनगरविशेषः । आव० १४४ ।

रहनेउरचक्कवालपामोक्खा-रथनूपुरचक्रवालप्रमुखाः-विद्याधरनगरविशेषाः । ज० प्र० ७४ ।

रहनेमिज्जं-उत्तराध्ययने द्वाविंशतितममध्ययनम् । सम० ६४ ।

रहनेमियं-उत्तराध्ययनेषु द्वाविंशतितममध्ययनम् । उत्त० ६ ।

रहनेमी-रथनेमिः-समुद्रविजयस्य द्वितीयः सुतः । उत्त० ४९६ ।

रहपहकर-रथनिकरः । औप० ४ ।

रहमद्दणे- । ज्ञाता० २२४ ।

रहमुसल-रथमुशलः-सङ्ग्रामविशेषः । भग० ३१७ । रथमुशलः-यत्र रथो मुशलेन युक्तः परिधावन् महाजन-क्षयं कृतवान् असौ रथमुशलः सङ्ग्रामः । भग० ३२२ । रथमुशलम् । आव० ८१२ । रथमुशलः-सङ्ग्रामविशेषः । आव० ६८४ । रथमुशलम् । निरया० १८ ।

रहरेणू-रथगमनोत्खात-रथरेणुः । ठाणा० ४३५ । रथ-रेणुः-रथगमनोत्खात रेणुः । अनु० १६३ । रथगमनात् रेणू रथरेणुः । ज० प्र० ९४ । रथगमनोत्खात रेणु रथरेणुः । भग० २७५ ।

रहवीरपुर-रथवीरपुरं-बोटिकोत्पत्तिस्थानम् । आव० ३१२ । रथवीरपुरं-यत्र बोटिकानां दृष्टिरुत्पन्ना तन्नग-रम् । आव० ३२३ । रथवीरपुरं-यत्र बोटिकदृष्टिरुत्पन्ना



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् कर्बटविशेषः । उत्त० १७८ । रथवीरपुरम् । अष्टमनिह्नवोत्पत्तिस्थानम् । विशे० ६३४ ।

**रहसंगेल्ली**-रथसङ्केलो-रथसमूहः । ज्ञाता० ५८ । भग० ४७४। रथसंगेल्लिः-रथसमुदायः । औप० ७२ । रथसङ्केल्ली रथसमुदयः, (देश्योऽयं शब्दः) । जं० प्र० २६५ ।

**रहसाअब्भक्खाण**-रहः-एकान्तस्तेन हेतुना अभ्याख्यानं रहोऽभ्याख्यानम् । उपा० ७ ।

**रहसिर**-रथशिरः-रथाग्रभागः, काकमुखः । जं० प्र० २४६ ।

**रहसुत्तं**-रहस्यसूत्रं-निशीथादिकम् । बृ० द्वि० १४५ अ ।

**रहस्याभ्याख्यानं**-स्त्रीपुंसयोः परस्परस्मरेणान्यस्य वा रागसंयुक्तं हास्यक्रीडासंगादिभिः रहस्येनाभिशंसनम् । तत्त्वा० ७-२५ ।

**रहस्स**-ह्रस्वं-अल्पम् । ठाणा० ४३ । रहस्यं-एकान्तम् । सूत्र० ११० । ह्रस्वस्वरं-लघुशब्दम् । अनु० १३२ । ठाणा० ३९६ । रहस्यं-ऐदम्पर्यम् । भग० ११४ । रहस्यं-एकान्तकृत्यत्वात् । अब्रह्मणस्त्रयोविंशतितमं नाम । प्रश्न० ६६ । एकान्तयोग्यः । भग० ७३६ । ह्रस्वः-ह्रस्ववर्णाश्रयो विवक्षया लघुर्वा वीणादिशब्दवत् । ठाणा० ४७१ । रहस्यः-अषडक्षीणः । राज० ११६ । अपवादपदानि । बृ० तृ० २६२ आ । अववातो । नि० चू० प्र० १०२ आ । रहस्यं-गुप्तत्वम् । ज्ञाता० १९१ । रहस्यं-एकान्तयोग्यम् । ज्ञाता० ११ ।

**रहस्सकड**-रहःकृतं-प्रच्छन्नकृतम् । भग० ११७ ।

**रहस्सगुज्झ**-सति रहस्से वि गुज्झंगं मृगीपदमित्यर्थः रहस्स अरुहं जं गुज्झं तं रहस्सगुज्झं । नि० चू० प्र० २९२ आ ।

**रहस्सट्ठाणं**-गुज्झावरगा जत्थ वा राहस्सियं मंतेति । दश० चू० ७६ ।

**रहस्सब्भक्खाण**-रहस्याभ्याख्यानं-एकान्तेऽभ्याख्यानं असदध्यारोपणम् । आव० ८२० ।

**रहस्सिय**-रहस्यिकम् । आव० ३६७ ।

**रहस्सिया**-रोहस्यिकी । बृ० प्र० ५९ आ ।

**रहाणीयं**-रहेहिं बलदरिसणा रहाणीय । नि० चू० द्वि० ७१ अ ।

**रहावत्त**-रथावर्त्तः-पर्वतविशेषः । आव० १७६, ३०४ ।

**रहितं**-अप्रपादाभ्यामीक्षणं एकपक्षदृष्टिसंबन्धो वा । बृ० द्वि० १४ आ ।

**रहिय**-रहितः-परित्यक्तः । उत्त० ४२८ ।

**राअ**-राजा-चक्रवर्त्ती । भग० ७०० । भरताधिपः । आव० १५६ । चक्रवर्ती-वसुदेवः-बलदेवः-महामण्डलिकश्च । अनु० २३ ।

**राइंदिय**-रात्रिन्दिवं-रात्रिदिवसप्रमाणम् । सूर्य० ६१ ।

**राइ**-धर्मकथायां प्रथमवर्गे द्वितीयमध्ययनम् । ज्ञाता० २४७ । राजा-महामण्डलिकः । ठाणा० ४६३ ।

**राइए**-रात्रिशब्दोऽप्यहोरात्रवाची । जं० प्र० १५० ।

**राइणा**-राज्ञा । ओघ० १९८ । आव० ३६७ ।

**राइणिओ**-रात्निकः-आचार्यः । आव० ६३८ । रात्निकः-आचार्यः, अन्यो वा यो जातिश्रुतपर्यायादिभिर्महान् । आव० ६५४ ।

**राइणियपरिभासिय**-रात्निकपरिभाषी-यो रात्निकस्य-आचार्यस्य जातिश्रुतपर्यायादिभिर्महतोऽन्यस्य वा पराभवकारी । पञ्चमसमाधिस्थानम् । आव० ६५३ ।

**राइणिया**-पुव्वदिक्खिया सब्भा उवदेसगा वा, जे वा अन्ने पूया । दश० चू० १२४ । आव० ७९३ ।

**राइण्ण**-राजन्यः-भगवद्वयस्य वंशजः । भग० ११५ । यस्तेनैव वयस्यतया व्यवस्थापितस्तद्वंशजश्च राजन्यः । औप० १७ ।

**राइतओ**-रागवान् । आव० २०६ ।

**राइन्ना**-आदिदेवेनैव-वयस्यतया व्यवहृताः । भग० ४८१ । कुलार्यभेदविशेषः । प्रज्ञा० ५६ । राजन्याः-वयस्यतया व्यवस्थापिताः । जं० प्र० १४५ । राजन्याः-सखिस्थानीयाः । आचा० ३२७ । ये तु वयस्यतयाऽऽचरितास्ते राजन्याः । ठाणा० ३५८ । राजन्याः-भगवद्वयस्यवंशजाः । राज० १२१ ।

**राइभत्तो**-रात्रिभक्तः-रात्रिभोजनम् । दश० ११६ ।

**राइमई**-राजीमतीः-उग्रसेनपुत्री । दश० ९६ ।

**राइयं**-रात्रिकं-रजनिनिर्वृत्तम् । प्रतिक्रमणविशेषः । आव० ५६३ ।

**राइल्लेऊण**-रालालिप्तं-सन्धितं कृत्वा । आव० ४२५ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

राइस्सिउ-राजाश्रितः । नि० चू० द्वि० २५ अ ।
राई-राजः-चक्रवर्त्यादिः । ठाणा० १७२ । धान्यविशेषः । नि० चू० द्वि० १२० अ । आमलकल्पायां गाथापतिः । ज्ञाता० २५० । रातीगाथापतेर्दारिका । ज्ञाता० २५० । राजानो-मण्डलिकाः । राज० १२१ । राजी । राज० ११२ ।
राईण-राजानः-क्षत्रियेभ्योऽन्ये । आचा० ३३४ ।
राईणिया-राजानः-तत्कल्पा ईश्वरादयो वा । सूत्र० ७१ ।
राईतिहो-यस्तु पश्चार्द्धभागः स रात्रितिथिः । सूर्य० १४६ ।
राईसिरी-रातीगाथापतेर्भार्या । ज्ञाता० २५० ।
राईहितो-राजभ्यः । आव० ३४४ ।
राउल-राजकुलम् । आव० ६६ । ओघ० १५२ । आव० २९७ ।
राउलओ-राजकुलगः । आव० ८९ ।
राउलग-राजकीयः । बृ० प्र० २७ आ ।
राउला-राजकीया । ओघ० १४० ।
राउलिय-राजकुलिकम् । उत्त० ११६ । राजकुलीनः । आव० ५५८ । राजकुलीयः-राजकुलसम्बन्धो । दश० ४५ ।
राओ-सन्ध्या विकालवियुता रात्रिर्वा । बृ० द्वि० ६२ आ । संज्ञा । नि० चू० प्र० १६३ अ ।
राओलं- । नि० चू० द्वि० १६९ आ ।
राओवरयं-रात्र्युपरतम् । उत्त० ४१४ । रागः-अभिष्वङ्गः उपरतः-निवृत्तो यस्मिंस्तत् रागोपरतम् । उत्त० ४१४ । रात्रोपरात्रम्-अहर्निशम् । आचा० ३१३ ।
राक्षसराक्षसाः-राक्षसभेदविशेषः । प्रज्ञा० १७० ।
राग-रागः-रञ्जकरसः । ठाणा० २१६ । रक्तता । जीवा० १७३ । रूपाद्याक्षेपजनितः प्रीतिविशेषः । आव० २७२ । रागः-रागानुभूतिरूपत्वादस्य अब्रह्मणो विंशतितमं नाम । प्रश्न० ६६ । रागः-पित्रादिषु स्नेहरागः । प्रश्न० १३७ । रागः-स्नेहरागः । प्रश्न० १३८ । रागः-रक्तता । प्रज्ञा० ६६ । रागः-अभिष्वङ्गलक्षणः । आव० ८४८ । रागः-रूपादिगुणाकृष्टः चेतसः । विशे० ८४७ (?) । कम्मजणितो जीवभावो रागो । नि० चू० द्वि० ७ अ । अभिष्वङ्ग-लक्षणः । आव० ५९७ ।

रागझञ्झा-इष्टविषयावाप्तौ रागझञ्झा । आचा० १७० ।
रागद्दोसतुलग्ग-रागद्वेषयोस्तुलाग्रमिव तदनभिभाव्यत्वेन रागद्वेषतुलाग्रम् । उत्त० ११५ ।
रागद्दोसभयाईयो-रागश्च-प्रतिबन्धात्मको द्वेषश्च-अप्रीतिरूपो भयं च इहलोकभयादि रागद्वेषभयानि तान्यतीतो-निष्क्रान्तः रागद्वेषभयातीतो-रागादिरहितः । उत्त० ५२७ ।
रागभावितमूर्ति-अभिष्वङ्गलक्षणरागरक्तः । आव० ५८५ ।
रागरत्त-अभिष्वङ्गलक्षणो रागस्तेन रक्तः-तद्भावितमूर्तिः रागरक्तः । आव० ५८५ ।
राजगिह-राजगृह-जरासंधराजधानी । प्रश्न० ७५ ।
राजगृह-नगरविशेषः । भग० ५ । प्रसेनजितराजधानी । नंदी० १५१ । भगवत्समवसरणस्थानम् । विशे० ६११ । महावीरविहारभूमिः । बृ० प्र० १६६ अ ।
राजचम्पक वरचम्पकः । जं० प्र० १८३ ।
राजनियुक्त-राजाज्ञापालकः । नंदी० १५१ ।
राजपट्टः- । अनु० २५४ ।
राजभाग-राजाभाव्यद्रव्यापह्नवः । प्रश्न० ५८ ।
राजमन्द्रः- । उत्त० १२० ।
राजयक्ष्म-रोगविशेषः । ठाणा० ४४७ ।
राजवर्णवान्-राजभटः । विपा० ६३ ।
राजवेष्टिकल्पः- । दश० १०६ ।
राजहंसी-महोषधीविशेषः । जं० प्र० ४११ ।
राजाण-राजा । आव० १७२ ।
राजावग्रहः-अवग्रहस्य द्वितीयो भेदः । आचा० १३४ । भरताधिपावग्रहः । आव० ११६ ।
राजि-भृगुः । ओघ० १३७ ।
राडी-राटिः-कलहः । भग० ८० । राटी-कलहः । उत्त० १०० ।
राढा-अवज्ञा । व्य० द्वि० १७८ आ । विभूषा । दश० २०६ ।
राढामणी-काचमणिः । उत्त० ४७८ ।
राण-दानः । भग० ७७६ ।
रातिंदिवग्ग-रात्रिन्दिवाग्रं-रात्रिन्दिवपरिमाणम् । सूर्य० ११ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रातिणि**-अपरिभाषी रात्निकपरिभाषी-आचार्यादिपूज्यपुरुषपराभवकारी, पञ्चममसमाधिस्थानम् । सम० ३७ ।

**रातिणिय**-रत्नैः-ज्ञानादिभिर्व्यवहरतीति रात्निकः-बृहत्पर्यायो ज्येष्ठो वा । ठाणा० ३०१ ।

**राती** राजिः-रेखा । ठाणा० २३५ । ईशानेन्द्रस्य द्वितीयाऽग्रमहिषी । ठाणा० २०४ । राजिः-पद्धतिः । प्रश्न० ८३ । संज्ञा । नि० चू० प्र० २६५ आ । रात्री-रज्जत इति रात्री, स च रामस्वभाव्या उभयोरपि विद्यते । नि० चू० तृ० १४० अ ।

**रात्रीभोजनम्**-तृतीयः शबलः । प्रश्न० १४४ ।

**रात्री**- । आचा० ३३१ ।

**राद्धान्तोपन्यासः**- । आचा० ४७ ।

**रामसिया**- । व्य० प्र० २२४ अ ।

**राम**-रामः-नवमबलदेवः । आव० १५६ । रामः-वसुदेवज्येष्ठसुतः । उत्त० ४८९ । रामः-तापसीपुत्रः परशुरामः । आव० ३९२ । ज्ञाता० २५३ । रामः- । नंदी० २१८ ।

**रामकण्हा**-अन्तकृद्दशानामष्टमवर्गस्याऽष्टममध्ययनम् । अन्त० २५, ३० । प्रथमवर्गेऽष्टममध्ययनम् । निरय० ३ ।

**रामकेसीणं**-रामकेशवाभ्याम् । पउ० २६ ।

**रामकेसीहि**-रामकेशवाभ्याम् । पउ० १०-२४ ।

**रामगुत्त**-रामगुप्तः-राजर्षिः, योऽशनादिकं भुञ्जान एव सिद्धिं प्राप्तः । सूत्र० ९५ ।

**रामदेव**-अयोध्याधिपतिदशरथराजपुत्रः पद्मापरनाम । प्रश्न० ८७ ।

**रामपुत्त**-अनुत्तरोपपातिकदशानां तृतीयवर्गस्य पञ्चममध्ययनम् । अनुत्त० २ ।

**रामरक्खिया**-धर्मकथायां दशमवर्गेऽध्ययनम् । ज्ञाता० २५३ । ईशानदेवेन्द्रस्य चतुर्थाऽग्रमहिषी । भग० ५०५ ।

**रामरक्खियात**-जम्बुद्वीपप्रमाणा राजधानी । ठाणा० २३१ ।

**रामरक्षिता**-ईशानदेवेन्द्रस्य चतुर्थ्याऽग्रमहिषी । जीवा० ३६५ ।

**रामा**-धर्मकथायां दशमवर्गेऽध्ययनम् । ज्ञाता० २५३ । ईशानदेवेन्द्रस्य तृतीयाऽग्रमहिषी । जीवा० ३६५ । भग० ५०५ । सुविधिनाथमाता । सम० १५१ । आव० १६० । जम्बुद्वीपप्रमाणा राजधानी । ठाणा० २३१ ।

**रामावि**- । नंदी० २१८ ।

**रायंसी**-राजांसो-राजयक्ष्मा सोऽस्यातीति राजांसी, क्षयी । आचा० २३३ ।

**राय**-रागः-विषयाभिष्वङ्गः । दश० ८६ ।

**रायकरंडग**-राजकरण्डकः-अमूल्यरत्नादिभाजनत्वात्सारतम इति । ठाणा० २७२ ।

**रायकरण**-न्यायालयम् । नि० चू० तृ० १०१ अ ।

**रायकहा**-राज्ञः-नृपस्य कथा राजकथा । ठाणा० २०१ । राज्ञः सम्बन्धी कथा राजकथा । आव० ५८१ । राज्ञः- अमुकशोभन इत्यादिका । दश० ११४ ।

**रायकेर**-राजकीयः । ओघ० ६७ ।

**रायगिर**- । व्य० द्वि० १६६ अ ।

**रायगिहं**-राजगृहं-जितशत्रुनगरम् । आचा० ७५ । राजगृहं-श्रेणिकराजधानी । सूत्र० ४०७ । आव० ६५, १६६ । राजगृहं-भगवत्यां द्वितीयशतके पञ्चमोद्देशकेऽप्रहृदप्रश्ने नगरम् । भग० १४१ । राजगृहं-विकुर्वणाऽधिकारे नगरम् । भग० १९३ । राजगृहं-श्रेणिकराजधानी । अनुत्त० ७,८, १८, २३ । भग० ३७९, ५०२ । राजगृहं-नगरविशेषः । अन्त० २३ । राजगृह-मगधजनपदे आर्यक्षेत्रविशेषः । प्रज्ञा० ५५ । राजगृहं-नगरविशेषः । भग० १०६ । राजगृहं-स्कन्दकचरित्रे नगरम् । भग० ११२, १२६ । राजगृहं-नगरम् । भग० १३९ । राजगृहं-ईशानेन्द्रस्य वैक्रियरूपकरणतेजोलेश्यासामर्थ्योपदर्शने नगरम् । भग० १६० । राजगृहं-असुरकुमाराणां गतिशक्तिप्ररूपणायां नगरम् । भग० १६६ । राजगृहं-चमरोत्पातक्रियानिरूपणे नगरम् । भग० १८१ । राजगृहं-योनिसङ्ग्रहवक्तव्यतायां नगरम् । भग० ३०३ । राजगृहं-आयुष्कादिनिरूपणे नगरम् । भग० ३०४ । राजगृहं-परमतनिरासे नगरम् । भग० ३२३ । राजगृहं-इन्द्राणां लोकपालनिरूपणे नगरम् । भग० १९४ । राजगृहं-असुरकुमाराणां देववक्तव्यतायां नगरम् । भग० २०० । राजगृहं-दिक्षु वातप्रतिपादने नगरम् । भग० २११ । राजगृह-संसारिणः शाश्वतादिस्वरूपनिरूपणे नगरम् । भग० ३०२, ७३१, ७३६,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

७५० । राजगृहं-नगरविशेषः । विपा० ८९ । राजगृहं श्रेणिकराजधानी । दश० १०२ । राजगृहं । दश० १० । राजगृहं-जयराजधानी । आ० (?) । धन्यसार्थवाहवास्तव्या नगरी । ज्ञाता० ७९ । गौतमस्वामिवक्तव्यतायां नगरम् ज्ञाता० १७०, १७१ । यत्र गुणशीलचैत्यम् । श्रेणिकराजधानी । ज्ञाता० १७८ । नंदमणिकारवास्तव्यनगरम् । ज्ञाता० १७८ । राजगृहं-संवरोदाहरणे नगरम् । आव० ७१३ । राजगृहं-अप्रमादविषये जरासन्धराजधानी । आव० ७२१ । राजगृहं-साधुजुगुप्साविषये नगरम् । आव० ८१६ । राजगृहं-परलोकफलविषये नगरम् । आव० ८६३ । राजगृहं-नगरम् । उत्त० ८९, १०४ । राजगृहं-क्षितिप्रतिष्ठितस्य चतुर्थं नाम । उत्त० १०५ । राजगृहं-अर्जुनमालाकरवास्तव्यं नगरम् । उत्त० ११२ । राजगृहम् । उत्त० १५८ । राजगृहम्-अर्थसिद्धदृष्टान्ते नगरम् । आव० ४१३ । राजगृहं-पारिणामिकीबुद्धिविषये नगरविशेषः । आव० ४२८ । राजगृहं-द्रव्यव्युत्सर्गोदाहरणे नगरम् । आव० ४८७ । राजगृहं-शुद्धविषये वस्त्रदृष्टान्ते नगरम् । श्रेणिकराजधानी । आव० ५६२ । राजगृहं-संवेगोदाहरणे नगरम् । आव० ७०३ । राजगृहं-नगरविशेषः, श्रेणिकराजधानी । आव० ९५ । राजगृहं-मुनिसुव्रतस्वामिनः प्रथमपारणकस्थानम् । आव० १४६ । राजगृहं-नारायणपुरम् । आव० १६२ । राजगृहं-मुनिसुव्रतस्वामिजन्मभूमिः । आव० १६० । राजगृह-पुरुषसिंहवासुदेवनिदानभूमिः । आव० १६३ । विश्वनन्दीवास्तव्यं नगरम् । आव० १७२ । राजगृहं-नगरम् । आव० १९९, २११, २१२ । राजगृहं-नगरविशेषः । आव० ३१४ । राजगृहं-यत्र मौर्यवंशप्रसूतबलभद्रराजस्य नगरी । आव० ३१५ । उत्त० १६२ । राजगृहं-नगरम् । आव० ३५२, ३६७ । धनसार्थवाहवास्तव्यं स्थानम् । आव० ३७० । रायगृहं-समवसरणस्थानम् । ज्ञाता० ११३ । राजगृहं- । उत्त० २८८, ३७९, ३८० । राजगृहं-भावोपायोदाहरणे नगरम् । दश० ४१ । राजगृहं-मायापिण्डदृष्टान्ते नगरम् । पिण्ड० १३३, १३७ । राजगृहं-नगरम् । महावीरसमवसरणस्थानम् । भग० १३४ । राजगृहं-क्षत्रीयनगरम् । प्रज्ञा० ५५ । नगरं राजगृहाख्यं यत्र श्रेणिकराजा । निरय० १ । श्रेणिकराजधानी । उपा० ४८ । श्रेणिकराजधानी । ज्ञाता० ११ । द्रौपद्याः स्वयंवरे सप्तमदूतप्रेष्यस्थानम् । ज्ञाता० २०८ । ज्ञान० २५३ । धनसार्थवाहवास्तव्यं नगरम् । ज्ञाता० २३५ । यत्र चतुष्पुत्रको धन्नो श्रेष्ठिः । व्य० द्वि० ३६ आ । यत्र श्रेणिकराजा । व्य० प्र० १९ अ । सुलसावास्तव्यं नगरम् । व्य० प्र० १८ आ । राजगृहं-अपरनाम क्षितिप्रतिष्ठितं चणकपुरं वृषभपुरं कुशाग्रपुरं च । आव० ६७० । नगरीविशेषः । नि० चू० तृ० १५ अ । श्रेणिकराजनगरी । बृ० प्र० ३१ अ । वीरसमवसरणस्थानम् । बृ० प्र० ४६ आ । रोहिणिधन्यसार्थवाहनगरी । ज्ञाता० ११५ । राजगृहः-अपरनाम काम्पिल्यपुरनगरम् । विशे० ९६० ।

**रायग्गल**-अष्टाशीतौ महाग्रहे षडशीतितमः । ठाणा०

**रायणा**-राज्ञा । आव० ३४३ । उत्त० १४८, ३०२ ।

**रायणिओ**-रत्निकः-रत्नाधिकः । बृ० प्र० १०० अ । रत्नाधिकः-पर्यायज्येष्ठः । ओघ० १५० ।

**रायणित**-रत्नानि भावतो ज्ञानादीनि तैर्व्यवहरति इति रात्निकः पर्यायज्येष्ठ इत्यर्थः । ठाणा० ३४२ । रात्निकः-रत्नाधिकोऽनुभाषकः । व्य० द्वि० १७१ अ ।

**रायण्ण**-राजन्यः-वयस्यः । आव० १२८ । राजन्यः-वयस्यः । बृ० द्वि० १५२ अ ।

**रायदारिए**-राजामात्यमहत्तमादिभवनेषु मच्छद्भिर्यद् परिभुज्यते तद् राजद्वारिकम् । बृ० प्र० १०४ अ ।

**रायदारिय**-रायकुलं पविसंतो जं परिहेति तं रायदारियं । नि० चू० द्वि० १६२ अ ।

**रायदुट्ठ**-राजद्विष्टं-राजा द्विष्ट इति । आव० ६२६ ।

**रायधम्म**-राजधर्मो-निग्रहानुग्रहादिः । जं० प्र० १६७ । राजधर्मः-दुष्टेतरनिग्रहपरिपालनादिः । दश० २२ ।

**रायन्न**-राजन्यः-तत्रैव वयस्यः । ठाणा० ११४ ।

**रायपसेणी**-राजप्रश्नीयम् । भग० १९६ ।

**रायपिंड**-राजपिण्डः-राजसम्बन्धी पिण्डः । भग० २३१ ।

**रायपिंडेइ**-साधुनामकल्प्यम् । भग० ४६७ ।

**रायपुर**-राजपुरं-अरजिनस्य प्रथमपारणकस्थानम् । आव० १४६ । राजपुरं-परलोकफलविषये दामन्नकदृष्टान्ते



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नगरम् । आव० ८६३ ।

**रायपेसिया**-राजप्रेष्याः-दण्डपाशिकप्रभृतयः । आचा० ३३४ ।

**रायमच्च**-राजाऽमात्यः-मन्त्री । दश० १९१ ।

**रायमास**-राजमाषः-चपलकः । दश० १६३ । राजमाषाः-सामान्यतश्चपलः, श्वेतचवलिक वा । पिण्ड० १६८ । पंडरचवलगो । नि० चू० प्र० १४४ आ ।

**रायरुक्ख**-राजवृक्षः-एकोरुकद्वीपे वृक्षविशेषः । जीवा० १४५ ।

**रायलक्खणसंजुए**-राजेव राजा तस्य लक्षणानि चक्रस्वस्तिकाङ्कुशादीनि त्यागशौचशौर्यादीनि वा तैः संयुतोयुक्तो राजलक्षणसंयुतः । उत्त० ४८९ ।

**रायललिए**-नवमबलदेवस्य पूर्वभवनाम । सम० १५३ । राजललितः-रामबलदेवपूर्वभवः । आव० १६३ टी० ।

**रायललिओ**-राजललितः-वासुदेवपूर्वभवः । आव० ३५८।

**रायवंसट्ठिया**-राजवंशे स्थिता-राज्ञो मातुलभागिनेयादयः। आचा० ३३४ ।

**रायवत्ती**-साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४।

**रायवरसासण**-राजवरशासनं-आज्ञा । ज्ञात० १३३ ।

**रायवर**-राजवरः-आबद्धमुकुटराजः । जं० प्र० २०० ।

**रायवल्लि**- । भग० ८०४ ।

**रायविट्ठी**-राजवेष्टिः-नृपतिहठप्रवर्त्तितकृत्यम् । उत्त० ५५३ ।

**रायवुग्गह**-राज्ञां सङ्ग्राम उपलक्षणत्वात् सेनापतिग्रामभोगिकमहत्तरपुरुषस्त्रीमल्लयुद्धान्यस्वाध्यायिकम् । ठाणा० ४७७ ।

**रायसंमत**-रायवल्लभो । नि० चू० प्र० १६ अ ।

**रायसंमय**-राजसंमतः मन्त्र्यादिः । दश० १०३ ।

**रायसंसारिया**-राजान्तरस्थापना । बृ० तृ० १५५ आ ।

**रायसत्थाणि**-सत्थमादियाणि । नि० चू० प्र० २७७ अ ।

**रायसभा**-राजसभा । आव० ३२० ।

**रायसुयसेट्ठिमच्चासत्थवाहसुया**-राजसुतश्रेष्ठ्यमात्यसार्थवाहसुताः-उत्तरकुरुसौधर्ममहाविदेहाधिपतिमहाबलसुतस्य वयस्याः । आव० ११५ ।

**रायहंस**-राजहंसः-मरालः । उत्त० ६९१ । राजहंसः-लोमपक्षिविशेषः । जीवा० ४१ । लोमपक्षिविशेषः । प्रज्ञा० ४९ । उत्त० ६९९ ।

**रायहाणिरूव**-राजधानीरूपम् । भग० १९३ ।

**रायहाणी**-राजधानी-राजाधिष्ठानं, राज्ञः पीठिकास्थानम् । आचा० २८५ । राजा धीयते-विधीयते अभिषिच्यते यस्यां सा राजधानी, जनपदानां मध्ये प्रधाननगरी । ठाणा० ४७९ । राजधानी-यत्र राजा अभिषिच्यते । ठाणा० ३१४ । राजधानी । सूत्र० ३०९ । यस्यां राजाऽभिषिच्यते राजधानी । ठाणा० ८६ । राजधानी-यत्र राजा स्वयं वसति । भग० ३६ । राजधानी-राजाधिष्ठानं नगरम् । जीवा० ४० राजधानी यत्र स्वयं राजा वसति सा । जीवा० २७९ । राजधानी-राजाधिष्ठानं नगरम् । प्रज्ञा० ४८ । जत्थ राया वसइ सा रायहाणि । नि० चू० द्वि० ७० आ । रायाधिट्ठिया रायहाणी । नि० चू० प्र० २२९ अ । राजाऽनया धीयत इति राजधानी, राज्ञः पीठिकास्थानम् । उत्त० ६०५ ।

**राया**-राजा-चक्रवर्त्तिबलदेववासुदेवप्रभृतिः । सूत्र० ५६ । राजा-चक्रवर्त्यादिः । सूत्र० ८७ । राजा-माण्डलिकः । ओप० ५८ । भग० ३१८ । राजा-मण्डलिकः । ओप० १४ । राजा चक्रवर्ती । जीवा० १२९ । राजा-चक्रवर्त्ती बलदेववासुदेवौ महामाण्डलिको वा । जीवा० २८० । राजा-अष्टाशितो महाग्रहे पञ्चाशीतितमः । जं० प्र० ५३५ । राजा-पृथिवीपतिः । प्रज्ञा० ३३० । राजा-उभययोनिशुद्धः-मातृपितृपक्षपडिशुद्धः । व्य० प्र० १६९ आ । राजा । आव० २४३ । मडबिओ । नि० चू० प्र० २७० आ । राजा-चक्रवर्तिमण्डलिकादिः । आव० २३८ । राजा-बद्धमुकुटः । आव० ५१६ । राजा । आव० ४२९ ।

**रायाएण**-राज्ञा । आव० ३४३ ।

**रायाणो**-बितिउरायराया समं पव्वाइया । नि० चू० द्वि० ४९ आ । चक्रवर्तिवासुदेवाः । ठाणा० १२६ ।

**रायाणए**-राज्ञा । आव० ३६० । राज्ञा । आव० ३५० ।

**रायाणि**-राजानम् । आव० ६७६ । राज्ञा । आव० ८१६ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रायाणिए-रत्नाधिकः-चिरदीक्षितादिः । दश० २३५ । गीतार्थः । ओघ० १७ ।
रायाभिओग-राजाभियोगः । आव० ८११ ।
रायाभिसेय-राज्याभिषेकं-राज्याभिषेक-राज्याभिषेकसामग्रीम् । ज्ञाता० ५१ ।
रायारक्खिओ-सिरोरक्षः । नि० चू० प्र० १९५ अ ।
रायाराम-राजारामः-क्षत्रियपरिव्राजकविशेषः । औप० ९१ ।
रायाराया-राजराजः-क्षत्रियपरिव्राजकविशेषः । औप० ९१ ।
रायावगारा- । ज्ञाता० २३६ ।
रायासाहिए- । ज्ञाता० ४९ ।
रायाहिट्ठिय-राजाधिष्ठितः-स्वयमध्यासितः । ज्ञाता० १८९ ।
रायाहिणकज्जा-राजाधीनां कार्यां यस्य स राजाधीनकार्याः । ज्ञाता० १८६ ।
रायाहीण-राजाधीनः-राजवशवर्तिनः । ज्ञाता० १८६ ।
रायी-चमरेन्द्रस्य द्वितीयाऽग्रमहिषी । भग० ५०३, ५०५ ।
राल-रालकं-तृणविशेषः । सूत्र० ३०९ ।
रालउ-कंगुभेया । दश० चू० ९२ । कङ्गुलपलालम् । नि० चू० द्वि० ६१ अ ।
रालग-ओषधिविशेषः । प्रज्ञा० ३३ । रालकः-धान्यविशेषः । तृणपञ्चके चतुर्थो भेदः । आव०६५२ । रालकः-धान्यविशेषः । दश० १९३ । रालगः । आव० ८५५ । रालकः-कङ्गुविशेषः । ठाणा० ४०६, २३४ । रालकः-कङ्गुविशेषः । भग० २७४, ८०२ । रालकः-कङ्गुविशेष एव स चायं विशेषः बृहच्छिराः कङ्गुरल्पशिरा रालकः । जं० प्र० १२४ । अल्पतरशिरा रालकः । नि० चू० प्र० १४४ आ ।
रालियं-रालिकं अतिशयेन स्कारप्रभूतवेला मिति यावत् । व्य० द्वि० ४८ आ ।
राव-प्रशिवप्रादुर्भावः । नंदी० ६२ ।
रावग-राजा । नि० चू० द्वि० १०७ अ ।
रावण-सीतापहारी राक्षसः । प्रश्न० ८७ । रावणः-नारायणवासुदेवशत्रुः । आव० १५६ ।
रावेंता-रायवन्तः शब्दान् कारयन्तः स्वजल्पिकाण्यनु वादयन्तः । जं० प्र० २६४ ।
रावेइ-घृतजलाभ्यामार्द्रयति । ज्ञाता० २०६ ।
राशि-सजातीयवस्तुसमुदायः । विशे० ३२८ । राशिः-स्कन्धेकार्थिकनाम । वि० ४१६ ।
राशित्रयव्यापकः-त्रैराशिकः । आव० ३११ ।
राष्ट्र-जनपदैकदेशः । भग० ६९१ ।
राष्ट्रपाल-मायापिण्डोदाहरणे नाटकविशेषः । पिण्ड० १३८ ।
रासी-राशिः-त्रैराशिकपञ्चराशिकादि । ठाणा० २६३ । धान्यादेरुत्करस्तद्विषयं सङ्ख्यानं राशिः, स च पाट्यां राशिव्यवहारः इति प्रसिद्धः, । ठाणा० ४९७ । बहुल्ले दश० चू० ७४ । राशिः-स्कन्धेकार्थिकनाम । विशे० ४२६ ।
राह-राधः । उत्त० ९९ ।
राहक्खमणा-राधक्षमणा-आर्याविशेषः । उत्त० ९९ ।
राहग-आराधकः । आ० उ० ।
राहस्सिए-राहस्यिकाः-पुरुषेण भोगे स्त्रियाः स्तनिताद्या । बृ० द्वि० ५६ अ ।
राहु-भगवत्यां द्वादशशतके षष्ठ उद्देशकः । भग० ५५२ ।
राहुकम्मं-राहुकर्म रहूक्रिया । सूर्य० २८८ ।
राहुहत-जत्थ रविससीण गहणं आसी तं राहुहतं । नि० चू० तृ० ६६ अ ।
राहुहय-राहुहतं-यत्र सूर्यस्य वा ग्रहणम् । व्य० प्र० ६२ अ ।
राहू-अष्टाशीतौ महाग्रहे चतुश्चत्वारिंशत्तमः । ठाणा० ७९ । भगवत्यां द्वादशशते षष्ठोद्देशकः । भग० ५८५ । राहुः । जं० प्र० ५३५ । सूर्य० २८७ ।
रिखा-रेखा । बृ० प्र० ८८ अ ।
रिंगणं-प्रग्रतः किंचिच्चलनं । बृ० तृ० ११ ।
रिछो-अच्छभल्लो । नि० चू० द्वि० १२६ अ ।
रिंछोली-पङ्क्तिः । विशे० ६२० ।
रिउगइ-ऋजुगतिः-गतिभेदः । भग० २८७ ।
रिउजड्ड-ऋजुजडः-शिष्यभेदः । भग० ६१ ।
रिउण्हाता-ऋतुस्नाता । आव० ३४३ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रिउपडिसतु**-रितुप्रतिशत्रुः-प्रजापतेः पूर्वभवः । आव० १७४ ।

**रिउव्वेद**-ऋग्वेदः-चतुर्णा वेदानां प्रथमः । भग० ११२ । ऋग्वेदः । ज्ञाता० १०५ ।

**रिए**-रीयेत-अनुष्ठानविषयतया प्राप्नुयात् । उत्त० ५१५ ।

**रिक्क**-मुधा । नि० चू० प्र० १८७ अ । विभक्तः । आव० १११ ।

**रिक्कासि** त्यक्तवान् । आचा० ३०२ ।

**रिक्ख**-ऋक्षं-नक्षत्रम् । आव० १२०, १८२ ।

**रिक्खा**-वर्त्मनि-अनभिप्रेते तिरश्चीनं रेखाद्वयं पात्यते । ओघ० ७७ ।

**रिक्थं**-द्रव्यम् । प्रश्न० ५३ ।

**रिगसिका**-वादित्रविशेषः । जीवा० २६६ ।

**रिगिसिगिआ**-रिगिसिगिका-वक्ष्यमाणवादित्रविशेषः । जं० प्र० १०१ ।

**रिङ्खी**-भार्यादेशकरः अन्यार्थः पुरुषविशेषः । पिण्ड० १३५ ।

**रिङ्गन्त**-यत्राक्षरेषु घोलनया संचरन् स्वरो रङ्गतीव तत् घोलनाबहुलम् । अनु० १३२ ।

**रिच्छ**-ऋक्षः । जीवा० २८२ ।

**रिट्ठ**-रिष्टरत्नकाण्डं-षोडशं, रिष्टरत्नानां विशिष्टो भूभागः । जीवा० ८९ । ठाणा० १९८, ४०६ । रिष्टः-कालः फलविशेषो रत्नविशेषो वा । ओघ० ११ । रिष्ठः-कंसराजसत्को मल्लः । प्रश्न० ७४ । रिष्ठः-लोकान्तिकदेवस्य जातिविशेषः । आव० १३५ । रिष्ठरत्नः । ज्ञाता० ३१ । ब्रह्मलोककल्पे विमानप्रस्तटः । ज्ञाता० १५० । रिष्ठः-द्रोणकाकः । उत्त० ६५२ । अष्टादशसागरोपमस्थितिकं देवविमानम् । सम० ३५ । रिष्टः-रिष्टविमानवासी नवमो लोकान्तिकदेवः । भग० २७१ ।

**रिट्ठग**-रिष्टकः-फलविशेषः । उत्त० ६५२ ।

**रिट्ठपुर**-रिष्टपुरं-शीतलजिनस्य प्रथमपारणकस्थानम् । आव० १४६ ।

**रिट्ठपुरा**-अरिष्ठपुरा-राजधानीनाम । जं० प्र० ३४७ ।

**रिट्ठपुरी**- । ठाणा० ८० ।

**रिट्ठरयणं**-अरिष्टरत्नम् । आव० ५०६ ।

**रिट्ठवण्ण**-रिष्ठा-मदिरा तद्वद्वर्णो यस्य स रिष्ठावर्णः । ज्ञाता० २३० ।

**रिट्ठवसभघाति**-रिष्टवृषभघाती-कंसराजसत्करिष्टाभिधानदृप्तदुष्टमहावृषभमारकः । प्रश्न० ७४ ।

**रिट्ठा**-रिष्ठाख्यविमानप्रस्तटवासिनः । ज्ञाता० १५१ । रिष्टा-जम्बूफलकलिका । जीवा० २६५ । अरिष्टा, राजधानीनाम । जं० प्र० ३४७ । ठाणा० ८० ।

**रिट्ठाभ**-ब्रह्मलोककल्पे विमानविशेषः । सम० १४ । रिष्टाभ-नवमं लोकान्तिकविमानम् । भग० २७१ । रिष्टाभा-रिष्टरत्नवर्णाभा या शास्त्रान्तरे जम्बूफलकलिकेति प्रसिद्धा । जं० प्र० १०० ।

**रिण**-ऋणम् । मर० ।

**रिणकंठ**- । नि० चू० प्र० १६१ अ ।

**रित्त**-रिक्तं-गुणविशेषः । जीवा० १९४ ।

**रित्तओ**-रिक्तः । आव० ३५७ ।

**रित्तय**-रिक्तं-तुच्छम् । आव० ६४३ ।

**रिद्ध**-ऋद्धः-भवनैः पौरजनैश्चातीव वृद्धिमुपगतः । सूर्य० १ । ऋद्धं-पुरभवनादिभिर्वृद्धम् । भग० ७ ।

**रिद्धि**-ऋद्धिः-परिवारादिका । भग० १३२ । ऋद्धिः-ऋद्धिहेतुत्वेन । अहिंसाया विंशतितमं नाम । प्रश्न० ९९ । ऋद्धिः-विभूतिः । आव० ५८५ ।

**रिद्धी**-ऋद्धिः-परिवारादिका । प्रश्न० १२० । ऋद्धिः-विमानपरिवारादिका । प्रज्ञा० ६०० ।

**रिपुमर्द्दन**-आनन्दपुरस्य राजा । पिण्ड० ३१ ।

**रिभित**-यत्राक्षरेषु घोलनया संचरन् स्वरो रङ्गतीव घोलनाबहुलम् । ठाणा० ३९६ । स्वरघोलनावत्तम् । ज्ञाता० २५ । स्वरघोलनावद् मधुरः । ज्ञाता० १७९ । षड्विंशतितमो नाट्यविधिः । जीवा० २४७ ।

**रिभिय**-चउव्विहे नट्टे बीओ भेओ । नि० चू० तृ० १ अ । रिभितः-स्वरघोलननाप्रकारवान् । ज्ञाता० २३२ । स्वरघोलनाप्रकारोपेतम् । ज्ञाता० २११ । यत्र स्वरोऽक्षरेषु-घोलनास्वरविशेषेषु संचरन् रागेऽतीव प्रतिभासते स पदसञ्चारो रिभितम् । जीवा० १९५ । जं० प्र० ४० । रिभितं स्वरघोलनावत् । प्रश्न० १५९ ।

**रिम्भित**-षड्विंशतितमो नाट्यविशेषः । जं० प्र० ४१७ । मृदुपदसञ्चाररूपम् । जं० प्र० ४१७ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रिय-रीतं-रीतिः, स्वभावः । भग० २ २ । रीतं-आचाराङ्गस्य द्वादशममध्ययनम् । उत्त० ६१६ ।
रिइयजिव्ह-तृतीयं महाकुष्ठम् । प्रश्न० १६१ ।
रिष्ठं- । ठाणा० २१७ ।
रिसओ-ऋषयः-मुनयः । उत्त० ४१३ ।
रिसभ-वृषभस्तद्वद् यो वर्त्तते स ऋषभः । ठाणा० ३९३ ।
रिसभा-मणिपिठिकानाम । ठाणा० २३० ।
रिसह्-ऋषभः-मर्कटबन्धोपरिवेष्टनपट्टः । सूर्यं० ४ । जं० प्र० १५ । ऋषभः-लोहादिमयपट्टबद्धकाष्ठसम्पुटः । भग० १२ । वृषभः-अष्टाविंशतितममुहूर्त्तः । सूर्यं० १४६ । वृषभः-वृषभस्तद्वद् यो वर्त्तते सः । स्वरविशेषः । अनु० १२७ । ऋषभस्तदुपरिवेष्टनपट्टः । राज ५७ । ऋषभः-वृषभस्तद्वत् यो वर्त्तते सः, सप्तस्वरे द्वितीयः । अनु० १२७ ।
रिसहनाराय-ऋषभनाराचं-यत् कीलिका रहितं संहननं तत्, द्वितीयं संहननम् । जीवा० १५, ४२ ।
रिसिभासिय-ऋषिभाषितं-उत्तराध्ययनादि । दश० ४ ।
रीइज्जति-दूविज्जति । नि० चू० प्र० १४६ अ ।
रीइया-रीतिका-पीतला । ओप० ९३ ।
रीढा-यदृच्छिता । यदृच्छा । बृ० द्वि० ५ अ ।
रीणा-खिन्ना । भक्त०
रीतिज्जति-दूइज्जति । नि० चू० प्र० ३३४ आ ।
रीयंत-रीयमाणं-निस्सरन्तमप्रशस्तेभ्योऽसंयमस्थानेभ्यः प्रशस्तेष्वपि गुणोत्कर्षादुपर्युपरिवर्त्तमानम् । आचा० २४७ । रीयमाणः-संयमानुष्ठाने गच्छन् । आचा० २४२ । रीयमाणः-विहरन् । उत्त० ४९८ । रीयन्ते-गच्छन्ति, वर्त्तन्ते । दश० ७२ ।
रीय-रीतं-गमनम् । भग० ३८१, ७५४ ।
रीयओ-रीयमाणः-सम्यगनुष्ठानवान् । आचा० २१७ । कुर्वन् । भग० ७५४ ।
रीयते-विजहार । आचा० ३०१ ।
रीयमाण-रीयमाणः-संयमानुष्ठाने पराक्रममाणः सन् । आचा० २५१ ।
रुंचण-रुञ्चनम्-पिञ्जनम् । पिण्ड० १६१ ।
रुंचती-रुञ्चती-कर्पासं लोठिन्या लोठयती । पिण्ड० १५७ ।
रुंचिज्जमाण-श्लक्ष्णखण्डीक्रियमाणः । जं० प्र० ३६ ।
रुंजग-रुञ्जकः वृक्षविशेषः । दश० १७ ।
रुंटण-रुदनं-रुदितप्रायः । ज्ञाता० २३५ ।
रुंद-रुन्दः-विस्तीर्णः । प्रश्न० १६ । सम० ११५ । औप० ६७ । नंदी० ४५ । रुद्रं-विस्तीर्णम् । प्रश्न० ७५ । निर्देशः । विस्तारः । जं० प्र० ४५६ ।
रुंदा-दीहा । नि० चू० प्र० १२१ आ । विस्तीर्णा घंघलादिः । बृ० द्वि० २९० आ । रुन्दा-विस्तीर्णा । उत्त० ४१९ ।
रुंदाइ-दीर्घा दृष्टिर्दिक्षु । भग० ६७९ ।
रुंदाए-यस्सो वसतिर्विस्तीर्णा भवति । ओघ० ८९ ।
रुंपण-रोपणं-वपनम् । पिण्ड० ६३ ।
रुंभंत-रुन्धानः-सञ्चरिष्णूनां मार्गं स्खलयन् । प्रश्न० ५१ ।
रुंभणं-रोधनम् प्रश्न० २४ ।
रुंभह्-रुन्द्ध । आव० ६९९ ।
रु-त्ति-पुहवी । दश० चू० ५ ।
रुअग-रुचकं-ग्रीवाभरणभेदः । जं० प्र० ७३ । रुचकः-रुचिः । जं० प्र० १११ । रुचकः । जं० प्र० २०९ ।
रुअगकूड-रुचकः-चक्रवालगिरिविशेषस्तदधिपतिकूटम् । जं० प्र० ३०८ । रुचककूटं-नन्दनवने षष्ठं कूटनाम । जं० प्र० ३६७ ।
रुअगवर-त्रयोदशे रुचकवराख्ये द्वीपे कुण्डलाकृती रुचकः । ठाणा० १९६ ।
रुअंगिदे- । सम० ३३ ।
रुइ-रुचिः-रुचिः-प्रतिभासः, -अभिलाषः, उत्त० ६९ ।
रुइयजोणी-रुदितं योनिः समानरूपतया जातिर्यस्य तद् रुदितयोनिकम् । अनु० १३१ ।
रुइयसद्द-रुदितशब्दं-मानिनीकृतं रतिकलहादिकं । उत्त० ४२५ ।
रुइल-रुचिः-दीप्तिस्तां लाति-आददाति रुचिलं सद्दीप्तिमत् । सूत्र० २७२ । आरणकल्पे विमानविशेषः । सम० ३८ । रुचिरं-संस्थानविशेषभावतो रमणीयम् । जीवा० २७३ । रुचिलः-स्निग्धतया देदीप्यमानच्छविमानम् । जीवा०



Jain Education International For Private & Personal Use Only www.jainelibrary.org

१८७ ।

**रुइल्ल–** । सम० १५ ।

**रुइल्लकंत–** । सम० १५ ।

**रुइल्लकूड–** । सम० १५ ।

**रुइल्लज्झय–** । सम० १५ ।

**रुइल्लप्पभ–** । सम० १५ ।

**रुइल्ललेस–** । सम० १५ ।

**रुइल्लवण्णं–** । सम० १५ ।

**रुइल्लसिंग–** । सम० १५ ।

**रुइल्लसिट्ठ–** । सम० १५ ।

**रुइल्लावत्त–** । सम० १५ ।

**रुइल्लुत्तरवडिंसगं–** । सम० १५ ।

**रुई**–रुचिः–चेतोऽभिप्रायः । सूत्र० २९० । रुचिः–जिनप्रणीततत्त्वाभिलाषरूपा । प्रज्ञा० ५८ । रुचिः–प्रतिभासः । उत्त० ६६ । रुचिः–परमश्रद्धानुगतोऽभिप्रायः । राज० १३३ ।

**रुक्**–पृथवी । नि० चू० प्र० २२२ अ ।

**रुक्क**–वृषभादिशब्दकरणम् । अनु० २९ ।

**रुक्ख**–वृक्षः । आचा० ३८२ । वृक्षः–चूतादिः । आचा० ३० । वृक्षः–तरुः । भग० २७८ । सङ्ख्यातजीवादिवृक्षविषयः । भगवत्याः अष्टमशतके तृतीय उद्देशकः । भग० ३२८ । वृक्षाः–रूक्षा वा सहकारादयः । जं० प्र० ६५ । वृक्षः–चिञ्चिणिकादिः । दश० १८५ । वृक्षः–कदम्बादिः । दश० २२९ । वृक्षः–चूतादिकः । जीवा० २६ । रुक्षः प्रसिद्धः । ठाणा० ३९७ । वृक्षः–सहकारादयः । ज्ञाता० ७८ । वृक्षः । ज्ञाता० ३३, ६५ । पृथ्व्याकाशयोर्यथास्थितः, रु–पृथिवीं खायतीति वा । दश० चू० ६ । रुक्–पृथवी त खातीति रुक्खो । नि० चू० प्र० २२२ । अ । रुक्षा–सम्बन्धः । बृ० (?) ८ ब ।

**रुक्खखेड्ड**-वृक्षक्रीडः । आव० १८१ ।

**रुक्खगिह**–रुक्खोच्चिय गिहागारो रुक्खगिहं, रुक्खो वा घरं कड । नि० चू० द्वि० ६९ आ ।

**रुक्खमह**–वृक्षमहः—वृक्षसत्क उत्सवः । जीवा० २८१ । ज्ञाता० ३९ । आचा० ३२८ ।

**रुक्खमूल**-वृक्षमूल-वृश्च्यत इति वृक्षस्तस्य मूलं–अधोभूभागः । उत्त० १०९ । वृक्षमूलम् । आचा० ३०७ ।

**रुक्खा**–वृक्षाः–प्रत्येकबादरवनस्पतिकायिकः चूतादयः । प्रज्ञा० ३० । भग० ३०६ ।

**रुप्पि**–पर्वतविशेषः । ठाणा० ६८ । रुक्मिवर्षधरे द्वितीयकूटम् । ठाणा० ७२ ।

**रुप्पिणी**–भीष्मराजपुत्री । प्रश्न० ८८ । इष्टमधिकृत्य कामकथायां वासुदेवपत्नी । दश० ११० । आधाकर्मणऽभोज्यतायां उग्रतेजःस्त्री । पिण्ड० ७१ । आच्छेद्यद्वारविवरणे जिनदासपत्नी । पिण्ड० १११ ।

**रुक्मी**–पर्वतविशेषः । ठाणा० ७० । कुण्डिन्यधिपतिभीष्मराजपुत्रः । प्रश्न० ८८ ।

**रुग्ग**–रुग्णः–जीर्णतां गतः । ज्ञाता० १९१ ।

**रुचक**–बहुसमभूमिभागे रत्नप्रभाभागे मेरुमध्ये अष्टप्रदेशो रुचकः । ठाणा० १२७ । कुण्डलवरावभाससमुद्रानन्तरं द्वीपः, तदनन्तरं समुद्रोऽपि । प्रज्ञा० ३०७ । दश० ८५ । त्रयोदशमद्वीपः । ज्ञाता० १२७ । द्वीपविशेषः । सम० ३४ । निषधवर्षधरपर्वते नवमकूटम् । ठाणा० ७२ ।

**रुचकवर**–रुचकसमुद्रानन्तरं द्वीपः, तदनन्तरं समुद्रोऽपि । प्रज्ञा० ३०७ । द्वीपविशेषः । आव० ४७ । द्वीपविशेषः । अनु० ९० ।

**रुचकवरावभास**–रुचकवरसमुद्रानन्तरं द्वीपः, तदनन्तरं समुद्रोऽपि । प्रज्ञा० ३०७ ।

**रुचकसंस्थित**–यद्यपि ग्रामः स्वयं न समस्तथापि यदि रुचकवलयशैलवद्वृत्ताकारव्यवस्थितैर्वृक्षैर्वेष्टितः । बृ० प्र० १८३ आ ।

**रुचिसु**–पिष्टवन्तः पिंषन्ति पेक्ष्यन्ति वा । आचा० ३४३ ।

**रुचिय**–रुचितं–पिष्टम् । बृ० प्र० २०८ आ ।

**रुचे**–रुचेस्तु–करणेच्छार्थता । ठाणा० ३८१ ।

**रुच्चंतिय–** । ज्ञाता० ११७ ।

**रुच्चति**–रोचते । आव० ८२२ ।

**रुज्झइ**–रुह्यति–रुध्यते रोहति । आव० ७६४ ।

**रुट्ठ**–रुष्टः–उदितक्रोधः । ज्ञाता० ६४ । रुष्टम्–क्रोधाध्मातं वन्दते क्रोधाध्मातो वा । कृतिकर्मणि अष्टादशमदोषः । आव० ५४४ । रुष्टः–रोषवान् । विपा० ५३ । रुष्टः–उदितक्रोधः । भग० ३२२ । ज्ञाता० १९०, १९२, २१७ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुडित–उपचारकः । व्य० द्वि० ३६१ ।

रुढ–रूढं–स्फुटितबीजम् । दश० १५५ ।

रुण्टणा–अवज्ञा-अनादरः । पिण्ड० ७४ ।

रुण्टन्– । आचा० १२६ ।

रुती–रुचिस्तु तदुदयसम्पाद्यं तत्त्वानां श्रद्धानम् । ठाणा० १५१ ।

रुत्त–रुष्टः–कोपोदयाद् विमूढः । भग० ३२२ । रुष्टः–क्रोधोदयाद्विमूढः, स्फुरितकोपलिङ्गः । जं० प्र० २०२ ।

रुदिय–रुदितं–आराटीमोचनम् । प्रश्न० २० ।

रुद्द–रुद्रं–विस्तीर्णम् । ओघ० २१३ । प्रश्न० ६३ । सम० १५२ । रुद्रः–स्वयम्भूवासुदेवपिता । आव० १६३ । विद्याचक्रवर्ती, अपरनाम सत्यकिः । आव० ६८६ । रुद्रः–पञ्चदशसु परमाधार्मिकेषु पञ्चमः । उत्त० ६१४ । रुद्दघरं, गृहिअ महादेवायतमित्यर्थः । नि० चू० प्र० ९१ आ । रौद्रं–रौद्रध्यानम्, उत्सन्नवधादिलक्षणं ध्यानम् । आव० ५८२ । प्रथम मुहूर्तनाम । जं० प्र० ४९१ । पञ्चमः परमाधार्मिकः । शक्तिकुन्तादिषु नारकान् प्रोतयति स रौद्रत्वाद् रौद्रः । सम० २८ । रुद्रः–महादेवः । भग० १६४ । रुद्रः–नरके पञ्चमः परमाधार्मिकः । आव० ६५० । रौद्रो निस्तृंशत्वात् । ज्ञाता० २३८ । रोदयत्यपरानिति रुद्रः–प्राणिवधादिपरिणत आत्मैव । उत्त० ६०९ । हरः । अनु० २५ ।

रुद्दए–रुद्रकः–आर्जवोदाहरणे ग्रन्थिच्छेदकः कौशिकार्यलघुशिष्यः । आव० ७०४ ।

रुद्दपुर–रुद्रपुरम् । आव० ३८० ।

रुद्दमह–रुद्रमहः–रुद्रस्य प्रतिनियतदिवसभावी उत्सवः । जीवा० २८१ । आचा० ३२८ । ज्ञाता० ३९ ।

रुद्दसोमा–रुद्रसोमा–आर्यरक्षितमाता । उत्त० ९६ । रुद्रसोमा–आर्यरक्षितमाता । आव० २९६ ।

रुद्धं– । ज्ञाता० १४६ ।

रुद्धा–रज्वादिभिः संयमिताः–चारकादिनिरुद्धाश्च । प्रश्न० ५६ ।

रुद्र–यस्य मायाशल्ये दृष्टान्तः । आव० १७९ । ठाणा० २५५ ।

रुद्रसोमा–सोमदेवब्राह्मणस्य भार्या । विशे० १००३ ।

रुधिर–अरिष्टपुराधिपतिः । प्रश्न० ९० । रुधिरः । प्रज्ञा० ८० ।

रुधिरबिंदुसंठिए–रुधिरबिन्दुसंस्थितम् । सूर्य० १३० ।

रुधिरवरिस– । नि० चू० तृ० ७० अ ।

रुन्न–अश्रुविमोचनम् । प्रश्न० २० । रुदित–प्रलपितम् प्रश्न० ६२ । रुदितं–अश्रुविमोचनयुक्तं शब्दितम् । प्रश्न० १६० ।

रुप्प–रूपम् । आव० ५२६ । रूप्यः । प्रज्ञा० २७ । रूप्य–पृथिवीभेदः । आचा० २९ ।

रुप्पकूला–रूप्यकूलानदी, सूरीकूटम् । जं० प्र० ३८० ।

रुप्पगा–छेदनोपकरणं । नि० चू० प्र० ३२५ अ ।

रुप्पच्छए–रुप्यच्छदः–रूप्याच्छादनं छत्रम् । जीवा० २१४ ।

रुप्पच्छद–रजतमयाच्छादनं छत्रम् । जं० प्र० ५९ ।

रुप्पवालुगा–रुप्यवालुका–नदीविशेषः । आव० १९५ ।

रुप्पागर–रूप्याकरः–यस्मिन्निरन्तरं महामूषास्त्रयोदलं प्रक्षिप्य रूप्यमुत्पाद्यते सः । जीवा० १२३ ।

रुप्पिणी रुक्मिणी–कृष्णवासुदेवदेवीमुख्या । अन्त० २ । रुक्मिणी–अन्तकृद्दशानां पञ्चमवर्गस्याऽष्टममध्ययनम् । अन्त० १५ । रुक्मिणी । अन्त० १८ । कृष्णवासुदेवराज्ञी । ज्ञाता० १०० ।

रुप्पी–अष्टाशीतौ महाग्रहे सप्तविंशतितमः । जं० प्र० ५३५ । ठाणा० ७९ । कुन्थुनाथजिनस्य पूर्वभवनाम । सम० १५१ । पञ्चमवर्षधरपर्वतः । जं० प्र० ३७९ । रुक्मिकूटं, पञ्चमवर्षधरपतिकूटम् । जं० प्र० ३८० । कुणालाधिपती । ज्ञाता० १२४ । रुक्मी–कुणालजनपदाधिपतिः श्रावस्तीवास्तव्यः । ठाणा० ४०१ । कुणालाधिपती । ज्ञाता० १४० ।

रुप्पोभास–अष्टाशीतौ महाग्रहे अष्टाविंशतितमः । जं० प्र० ५३५ । ठाणा० ७९ ।

रुप्फए–रुष्कं( रुम्फ )का । रुम्फका । आव० ७६४ ।

रुब्भंतो–रुध्यमानः । आव० १७५ ।

रुमक– । आचा० ३४३ ।

रुय–रुतं–रवः । ज्ञाता० २५ । स्वण–रुतं–शब्दकरणम् । दश० १४१ । रुतं–कर्पासपक्ष्म । जीवा० २१० । रुतं–कर्पासविकारः । भग० १३४ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुयए-रुचकः-रुचकाभिधानस्त्रयोदशद्वीपान्तर्गतः प्रकाराकृती रुचकद्वीपविभागकारितया स्थितः। सम० ६२। रुचकः-मणिविशेषः। जीवा० २३। रुचकः-रत्नविशेषः। प्रज्ञा० २७।

रुयकंता-भूतानन्दस्य पञ्चमी अग्रमहिषी। भग० ५०४।

रुयग-रुचकः। आचा० १३। रुचकः-रुचिः। औप० १९। रुचकः-कुण्डलाकृतीकः पर्वतः। ठाणा० १६७। रुचकः-मणिविशेषः। औप० ४६। रुचकः-वर्णः। औप० ५४। रुचकः-रुचिः। जीवा० २७१। रुचकः-कुण्डलवरावभाससमुद्रपरिक्षेपी द्वीपः। रुचकद्वीपपरिक्षेपी समुद्रश्च। जीवा० ३६८। सूर्य० ७८। रुचकः-पृथिवीभेदः। आचा० २९। रुचकः-मणिभेदः। उत्त० ६८९। अष्टानामपि प्रदेशानां रुचकः इति समयः परिभाषा। विशे० १०७३। रुचकं-कान्तिः। प्रश्न० ८१। रुचकः-कृष्णमणिविशेषः। आव० १८६।

रुयगवर-रुचकसमुद्रपरिक्षेपी द्वीपः। रुचकवरद्वीपपरिक्षेपी समुद्रश्च। जीवा० ३६८। रुचकः-रुचकवरे समुद्रे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६८। रुचकः-जम्बूद्वीपात्त्रयोदशमरुचकवराभिधानद्वीपान्तर्वर्ती मण्डलाकारपर्वतः। प्रश्न० ९६। रुचकवरः-त्रयोदशमद्वीपवर्ती पर्वतविशेषः। प्रश्न० १३५।

रुयगवरभद्द-रुचकवरभद्रा-रुचकवरे द्वीपे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६८।

रुयगवरमहाभद्द-रुचकवरमहाभद्रः-रुचकवरे द्वीपेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६८।

रुयगवरमहावर-रुचकवरमहावरः-रुचकवरे समुद्रेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६८।

रुयगवरावभास-रुचकवरावभासः-रुचकवरसमुद्रपरिक्षेपी द्वीपः। रुचकवरावभासद्वीपपरिक्षेपी समुद्रश्च। जीवा० ३६८।

रुयगवरावभासभद्द-रुचकवरावभासभद्रः-रुचकवरावभासे द्वीपे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६८।

रुयगवरावभासमहाभद्द-रुचकवरावभासमहाभद्रः-रुचकवरावभासे द्वीपेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६८।

रुयगवरावभासमहावर-रुचकवरावभासमहावरः-रुचकवरावभासे समुद्रेऽपरार्द्धाधिपतिर्देवः। जीवा० ३६८।

रुयगवरावभासवर-रुचकवरावभासवरः-रुचकवरावभासे समुद्रे पूर्वार्द्धाधिपतिर्देवः। जीवा० ३६८।

रुयगावती-भूतानन्दस्य चतुर्थी अग्रमहिषी। भग० ५०४।

रुयगिंदे- । भग० ७१८। ठाणा० ४८२।

रुयजोणीत-रुदितं योनिः-जातिः समानरूपतया यस्य तद् रुदितयोनिकम्। ठाणा० ३९३।

रुयप्पभा-भूतानन्दस्य षष्ठी अग्रमहिषी। भग० ५०४।

रुरु-रुरुः-मृगविशेषः। प्रश्न० ७। जं० प्र० ४३। भग० ४७८। रुरु-चिलातदेशनिवासी म्लेच्छः। प्रश्न० १४। साधारणबादरवनस्पतिकायविशेषः। प्रज्ञा० ३४। रुरुः-द्विखुरविशेषः। प्रज्ञा० ४५। आचा० ७३।

रुरुयज्झया-रुरुध्वजा। जीवा० २१५।

रुरू-रुरु-द्विखुरश्चतुष्पदो मृगविशेषः। जीवा० ३८।

रुलित-रुलति-भूमौ लुठति। प्रश्न० ४६।

रुवसहगय-रूपसहगतं-सजीवं भूषणसहितं वा। दशा० १४८।

रुविज्जमाण-श्लक्ष्णखण्डीक्रियमाणः। जीवा० १९२।

रुहिर-रुधिरशब्दो रक्तार्थः। जं० प्र० २०६।

रुहिरमाविकण्ण-विक्षिप्तरुधिरः। अनु० १३७।

रुहिरवरिस-रुधिरवर्षः। आव० ७३४।

रुहिरोग्गलंतमुद्धाण-गलद्रुधिरमूर्धा। उत्त० ५०।

रूअग-रूचकः-चक्रवालगिरिविशेषः। जं० प्र० ३१०।

रूअगावई- । जं० प्र० ३९१।

रूआ- । जं० प्र० ३९१।

रूआसिआ- । जं० प्र० ३९१।

रूए- । ठाणा० १६७।

रूएडु-रूतं-कर्पासपक्ष्म। जं० प्र० ३६।

रूक्ष-स्नेहोपदर्शनरहितम्। ध्य० प्र० ५६ आ। स्पर्शभेदः। प्रज्ञा० ४७३।

रूढ-चिरप्ररूढम्। नंदी० ४६।

रूढा प्रादुर्भूता। दशा० २१९।

रूतंसा- । ठाणा० ३६१।

रूत-लोढितो बीजरहितः कर्पासः। बृ० द्वि० ११६ अ।

रूतप्पभा- । ठाणा० ३६१।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुता- । ठाणा० ३६१ ।
रुद्दकंते- । ठाणा० १६७ ।
रुद्दप्पभ- । ठाणा० १६७ ।
रुद्धारो-रुद्धारः-अपवादः । व्य० द्वि० ३०३ आ ।
रूप-शरीरसौन्दर्यम् । ज्ञाता० २११ । आकारः । सम० १३६ ।
रूपकंता- । ठाणा० ३६१ ।
रूपक-रूप्यम् । नंदी० १५६ । आचा० १६७ ।
रूपकथा-रूपस्य प्रशंसनं द्वेषणं वा स्त्रीकथायास्तृतीयः भेदः । आव० ५८१ ।
रूपकदोष-स्वरूपभूतानामवयवानां व्यत्ययः । अनु० २६२ ।
रूपकार-आकारमात्रम् । विशे० ६१५ ।
रूपयक्षाः-यक्षभेदः । प्रज्ञा ७० ।
रूपवती- । ठाणा० ३६१ ।
रूपशालिनः-किन्नरभेदविशेषः । प्रज्ञा० ७० ।
रूपसप्तैकक-आचाराङ्गद्वितीयश्रुतस्कन्धे पञ्चममध्ययनम् । ठाणा० ३८७ ।
रूपसहगत-सजीवं भूषणविकलं वा रूपं भूषणसहितं । रूपसहगतम् । ठाणा० ३६१ ।
रूपिय-भेशकसुतः । ज्ञाता० २०६ ।
रूप्पकूला-नदीविशेषः । ठाणा० ७४ । प्रपातह्रदविशेषः । ठाणा० ७५ ।
रूयंसा-धर्मकथायां चतुर्थवर्गेऽध्ययनम् । ज्ञाता० २५२ । ठाणा० १९८ । भूतानन्दस्य द्वितीयाऽग्रमहिषी । भग० ५०४ । ठाणा० १६७ ।
रूय-रूतं-कर्पासपक्ष्म । सूर्य० २६१ । रोगो । नि० चू० प्र० ७७ आ ।
रूयकंता-धर्मकथायां चतुर्थवर्गेऽध्ययनम् । ज्ञाता० २५२ ।
रूयग-रूतादेव्याः सिंहासनम् । ज्ञाता० २५२ ।
रूयगगाहावई-चम्पायां गाथापती । ज्ञाता० २५२ ।
रूयगसिरी-रूचकगाथापतेर्भार्या । ज्ञाता० २५२ ।
रूयगावती-धर्मकथायां चतुर्थवर्गेऽध्ययनम् । ज्ञाता० २५२ । रुचकावती-मध्यरुचकवास्तव्या दिक्कुमारी । आव० १२३ ।
रूयप्पभा-धर्मकथायां चतुर्थवर्गेऽध्ययनम् । ज्ञाता० २५२ ।
रूययंसा-रुचकांशा-मध्यरुचकवास्तव्या दिक्कुमारी । आव० १२३ ।
रूयया-रुचका-मध्यरुचकवास्तव्या दिक्कुमारी । आव० १२३ ।
रूयवडिंसए-रूतादेव्या भवनम् । ज्ञाता० २५२ ।
रूया-रुचकगाथापतेर्दारिका । ज्ञाता० २५२ । धर्मकथायां चतुर्थवर्गे प्रथममध्ययने देवी । ज्ञाता० २५२ । भूतानन्दस्य प्रथमाऽग्रमहिषी । भग० ५०४ । ठाणा० १९८ ।
रूयाणंदा-रूतादेव्या-राजधानी । ज्ञाता० २५२ ।
रूयावती- । ठाणा० १९८ ।
रूवंधर-रूपं-रजोहरणादिकं-वेषं धारयती रूपधरः । उत्त० ४३६ ।
रूव-रूपं-आकृतिः । उत्त० ४४९ । रूपं-आकारः । उत्त० ४५२, ४७३ । सुसंस्थानता । उत्त० ६२६ । रूप्यत इति रूपं-वर्णः संस्थानं वा । उत० ६ । रूप्यते-अवलोक्यत इति रूपं आकारश्चक्षुविषयः । ठाणा० २५ । रूपं-स्वभावः नेपथ्यादि । ठाणा० १०८ । रूपं-मूर्तिवर्णादिमत्त्वम् । ठाणा० ११६ । रूपकः-रूप्यम् । नंदी० १६५ । रूपापेक्षया सत्यं रूपसत्यम् । ठाणा० ४८६ । रुदन्ति । पिण्ड० ११० । रूतम् । ओघ० १४० । रूपः-तिर्यग्मनुष्यदेवस्त्रीपण्डकादिलक्षणः मूर्तवस्तुः । विशे० १०५१ । रूपं । रूवं णाम जं कट्ठचित्तलेप्पकम्मे वा पुरिसरूवं कयं अहवा जीवविप्पमुक्कं पुरिससरीरं तं । नि० चू० तृ० १ अ । रूपं-अनुत्तरसुररूपादनंतगुणम् । ज्ञाता० ६ । बलाविशेषः । द्वासप्ततिकलासु तृतीया । ज्ञाता० ३८ । सुविभत्तगोवंगअहीणपंचेंदियत्तणं । नि० चू० प्र० २९० अ । उद्वर्त्तनस्नानप्रपास्वेदकरणहृदन्तवालसंठावणादियं आभरणवत्थाणि वा णाणादेसियाणि विविहाणि । नि० चू० तृ० ८ आ । णिज्जीवं, भूषणवज्जियं वा । द० चू० ६६ । रूपं-भूषणरहितं जीवविमुक्तं वा । बृ० द्वि० ४१ अ । रूपः-तिर्यग् मनुष्यदेवस्त्रीपण्डकादिलक्षणः । विशे० १०५१ । रूपं-मूर्तिः । व्य० प्र० १७१ अ । रूप नाम-स्पर्शरूपादिसम्मूर्च्छनात्मिका मूर्तिः । प्रज्ञा० ८ । रूपं नाम-संकटविकटादिरूपम् । आचा० २४ । रूपं-सुविहित-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेपथ्यं शरीरसुन्दरता वा । भग० १३६ । रूपं-अनवबद्धास्थीनि कोमलफलरूपम् । आचा० ३९१ । रूपं-निर्जीवं प्रतिमारूपम् । ठाणा० २९१ । रूपं-मूर्तिवर्णादिमत्त्वम् । ठाणा० ३३३ । रूपं-सुसंस्थानता । उत्त० २६७ । रूपं-आकारसौन्दर्यम् । उत्त० ४९५ । रूपं-लेप्यशिलासुवर्णमणिवस्त्रचित्रादिषु रूपनिर्म्माणम् । सम० ८४ । रूपं-आकृतिः । प्रश्न० ३६ । रूपं-आकारः । अनुत्त० ४ । रूपं-रूपकम् । जीवा० १८० । रूपं-आकारविशेषः । प्रश्न० ८५ । रूपं-आकृतिः । प्रश्न० ११७ । रूपं-शरीरसुन्दरता, सुविहितसाधुनेपथ्यं च । प्रश्न० १२५ । रूपं-सौन्दर्यवती आकृतिः । प्रज्ञा० ५५१ । रूपं-मूर्तिः । ठाणा० ३९ । नरयुग्मादि । सूर्य० २६४ । रूपं-अङ्गप्रत्यङ्गावयवसन्निवेशविशेषः । सूर्य० २९२ । रूपं-काष्ठकर्मादि । आव० १२८ । रूपं-अन्यूनाङ्गता । उत्त० १४५ । आव० ३४१ । रूपं-आकृतिः । आव० ५६९ । रूपं-रूपमदः-यद् रूपस्य मानम् । आव० ६४६ । रूपं-लेप्यशिलासुवर्णमणिवस्त्रचित्रादिषु रूपनिर्माणम् । जं० प्र० १३७ । रूपं-स्वभावः । प्रज्ञा० ३५९, ३७१ । रूपं-महाराष्ट्रिकादि । उत्त० ४२४ । रूपं-कटाक्षनिरीक्षणादि चित्रादिगतं वा । उत्त० ४२७ । रूपं-पिशितादिपुष्टस्य शरीरशोभात्मकम् । उत्त० ४४० । रूपं-रूपस्पर्शाद्याश्रया मूर्तिः । उत्त० ६७२ । रूपं-निर्जीवं, प्रतिमारूपम्, भूषणविकलं वा रूपम् । दश० १४८ । रूपं-सदाकारसंस्थानम् । जं० प्र० २३६ ।

**रूवओ**-रूपकः-भङ्गत्रयान्तर्गतः । आव० ५२७ ।

**रूवकम्म**-रूपकर्म-पुत्तलिकादिकम् । विशे० १२७४ ।

**रूवकहा**-अन्ध्रीप्रभृतीनामन्यतमाया रूपस्य यत्प्रशंसा सा रूपकहा । ठाणा० २०९ । रूपकथा-रूपसम्बन्धेन स्त्रीणां कथा । प्रश्न० १३९ ।

**रूवखंधे**-रूपस्कन्धः-पृथिवीधात्वादयो रूपादयश्च । भग० २५ । रूपस्कन्धः-पृथिवीधात्वादिको रूपादयश्च । प्रश्न० ३१ ।

**रूवग**-रूपकः । उत्त० २७६ । आव० ४१७ ।

**रूवगदोस**-रूपकदोषः-स्वरूपावयवव्यत्ययः, सूत्रदोषविशेषः । आव० ३७४ ।

**रूवजक्खा**-रूपयक्षाः-धर्म्मपातकाः । व्य० प्र० १६९ अ । रूपयक्षाः-रूपेण मूर्त्या यक्षा इव रूपयक्षाः मूर्तिमंतो धर्मिकनिष्ठा देवाः । व्य० प्र० १७१ अ ।

**रूवतेण**-रूपवन्तमुपलभ्य स एवं रूपवानित्यादि भावनया रूपस्तेनः । प्रश्न० १२५ । रूपस्तेनः-राजपुत्रादितुल्यरूपः । दश० १९० ।

**रूवपरियारगा**- । ठाणा० १०० ।

**रूववती**-धर्मकथायां पञ्चमवर्गेऽध्ययनम् । ज्ञाता० २५२ । भूतेन्द्रस्य प्रथमाऽग्रमहिषी । भग० ५०४ । ठाणा० २०४ ।

**रूवसंघाट**-रूपसङ्घाटः-रूपयुग्मम् । जीवा० १८० ।

**रूवसच्च**-अतद्गुणस्य तथारूपधारणं रूपसत्यम्, यथा प्रपञ्चयतेः प्रव्रजितरूपधारणम् । दश० २०८ ।

**रूवसच्चा**-रूपसत्या-पर्याप्तिकसत्याभाषायाः पञ्चमो भेदः । प्रज्ञा० २५६ ।

**रूवसहगय**-रूपसहगतः स्तन-नयन-जघनादि । विशे० १०५१ । रूपसहगतम् । प्रज्ञा० ४३८ ।

**रूवसहिय**-तदेवाभरणसहितं । नि० चू० प्र० ७७ अ ।

**रूवहेउ**- । ज्ञाता० ९० ।

**रूवा**-रूपं-राजहंसचक्रवाकसारसादीणि, गजमहिषमृगयूथादीणि वा, जलान्तर्गतं करिमकरादीणि वा । सूत्र० २७२ ।

**रूवाणुवाए**-अभिगृहीतदेशाद् बहिः प्रयोजनभावे शब्दमनुच्चारयत एव परेषां समीपानयनार्थं स्वशरीररूपदर्शनं रूपानुपातः । आव० ८३५ । रूपानुपातः-रूपदर्शनम् । आव० ८३४ ।

**रूविग्गं**-सुरूपम् । आव० ७१५ ।

**रुवियलिंग**-रोदनचिह्नम् । मर० ।

**रूवी**-गुच्छाविशेषः । प्रज्ञा० ३२ । बाहिरब्भतरकरणवज्जितो सा रूवी, मुडो सुविकल्लवासधारी कच्छं ण बधत, अबंभचारी, अभज्जगो भिक्खं हिंडइ । नि० चू० तृ० ३१ आ ।

**रूह**-रूक्षः-निःस्नेहः । ज्ञाता० १११ ।

**रे**-लघोरामन्त्रणं साक्षेपवचनः । उत्त० ३५८ ।

**रेक्का**-रेखा । आव० ४३२ ।

**रेगा**-रेको विविक्तः । व्य० द्वि० १५७ आ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रेचक-भ्रमरिका । जं० प्र० ४१८ ।
रेचितं-निष्पन्नम् । जं० प्र० ४१८ ।
रेणा-कल्पकवंशप्रसूतशकटालस्य सप्तमा पुत्री । आव० ६९३ ।
रेणुगा-रेणुका-अनन्तवर्यभार्या । आव० ३९२ ।
रेणुगुंडिय-रेणुगुण्डितं-रेणुधूरितम् । ओघ० ११० ।
रेणुय-रेणुः- भूवर्त्ती तु रेणुः । सम० ६१ ।
रेणुया-साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० १६ । भग० ८०४ ।
रेणू-रेणुः-स्थूला रेणु पुद्गलाः । जीवा० २४५ । रेणुः-स्थूलतमरजः पुद्गलः । जं० प्र० ३८६ । रेणुः-रजः । ओघ० २१५ । रेणुः-स्वपतः शरीरे लगति । ओघ० २१७ । रेणुः-वालुका । भग० ३०७ । जं० प्र० १६९ । धूलिः । ओघ० २१३ । रजः त एव स्थूला रेणवः । राज० १८ । भग० ६६५ ।
रेभित-कलस्वरेण गीतोद्गातृत्वम् । जं० प्र० ४१७ ।
रेरिज्जमाण-हरिततया देदीप्यमानः । राज० १४१ । रेरिज्यमाणः-देदीप्यमानः । भग० ३०० ।
रेल्लग-रेल्लकः-पूरः । आव० ५८१ ।
रेल्लण-प्लावनम् । पिण्ड० १२ ।
रेल्लुका- । प्रज्ञा० ४६४ ।
रेवई-बलदेवस्य राज्ञी । निरय० ३९ । महाशतकगाथापतेर्भार्या । उपा० ४८ । सम० १५४ ।
रेवए-उद्यानविशेषः । बृ० प्र० ३० अ । द्वारवत्यां पर्वतविशेषः । निरय० ३९ ।
रेवलए-यत्र नन्दनवनोद्यानम् । अन्त० १८ ।
रेवतग-रैवतकः-उज्जयन्तः । ज्ञाता० ९९, १०० ।
रेवतत-रैवतकः-द्वारवत्यां पर्वतविशेषः । अन्त० १ । द्वारवत्यामुत्तरपश्चिमे पर्वतः । अन्त० १८ ।
रेवतय-रैवतकं-द्वारवत्यामुद्यानविशेषः । अन्त० १८ ।
रेवताः-गान्धर्वभेदविशेषः । प्रज्ञा० ७० ।
रेवति-परग्रामदूतीत्वदोषविवरणे सुन्दरदुहिता । पिण्ड० १२७ । नक्षत्रविशेषः । ठाणा० ७१ ।
रेवतिया-रेवतिका-श्रेष्ठिकुले कन्याविशेषः । उत्त० १०८ ।
रेवती-मेण्ढिकग्रामे गाथापतिपत्नी । भग० ६८५ ।
रेवतीणक्खत्त-रेवतीनक्षत्रम् । सूर्य० ११० ।
रेवययं-रैवतकं-उज्जयन्तम् । उत्त० ४९२ ।
रेहंत-शोभमानम् । ज्ञाता० १८ ।
रेहा-रेखाः-पादपर्यन्तवर्तिनी सीमा । जं० प्र० ५१७ ।
रोअए-रोचयेत्-विनिश्चयं कुर्यात् । दश० १७७ ।
रोअणागिरि-रोचनागिरिः-रोहणागिरिः, हस्तिकूटनाम । जं० प्र० ३६० ।
रोइअ-रोचयित्वा-प्रियं कृत्वा । दश० २६५ ।
रोइआवसाणं-रोचितावसानं-गेयविशेषः । जं० प्र० ४१२ ।
रोइए-चिकीर्षितः । भग० १०१ ।
रोइज्जंत-रोच्यमानं-प्रशस्यमानं-दीयमानं वा । आचा० ३९६ ।
रोइत-रोचितः-चिकीर्षितः । ठाणा० ३५६ ।
रोइयं-रोचितं-सम्यग्भावितम् । जीवा० १९४ ।
रोइयावसाण-रोचितं-यथोचितलक्षणोपेततया भावितं सत्यापितमवसानं यस्य तत् रोचितावसानम् । जीवा० २४७ । रोचितावसानं-रोचितं अवसानं यस्य तत् । शनैः शनैः प्रक्षिप्यमाणस्वरं यस्य गेयस्यावसानं तत् । जं० प्र० ३९ ।
रोएइ-रोचितं-अभिलाषातिरेकेणासेवनाभिमुखतयेति । ठाणा० २४७ । श्रद्धत्ते चिकीर्षति वा । भग० १३३ ।
रोएज्जा-रोचयेत्-चिकीर्षामीत्येवमध्यवस्येत् । प्रज्ञा० ३९९ ।
रोएति-रोचयति चिकीर्षाविषयीकरोति । ठाणा० १७६ ।
रोएमाण-रोचयन्-सात्मीभावेनानुभवन् । आव० ४ (?) ।
रोएमि-चिकीर्षामि । भग० १२१ । चिकीर्षामि । भग० ४६७ । रोचयामि-अभिलाषातिरेकेणासेवनाभिमुखतया । आव० ७६१ । रोचयामि-करणरुचिविषयीकरोमि चिकीर्षामीत्यर्थः । ज्ञाता० ४७ ।
रोग-रोगः-सद्योघाती ज्वरशूलादिः । प्रश्न० १६ । रोगः-ज्वरादिः । प्रश्न० २५ । रोगः-व्याधिः । विपा० ४० । रोग कालमहाव्याधिः । ओघ० ९६ । रोगः-शीघ्रतरघाती ज्वरादिः । प्रश्न० ११७ । रोगः-रुजा, सद्योघातिगदो वा । प्रश्न० १६२ । रोगः । आव० ५८५ । रोगः-चिरकालिको रोगः । आव० ७५९ । रोगः-अन्तः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भङ्गः विनाशः । विशे० १३०७ । रोगः-कुष्ठादिकः । आचा० ३३० । ज्वरादिः । उत्त० ४५४ । आचा० ३६३ । कालसहः कुष्ठादिः । ठाणा० ११९ । कुष्ठादिः । भग० ४७१ । ठाणा० १५० । पीडाकारी । भग० ६९० । रोगः-कालसहो व्याधिः । भग० १२२ । रोगः-सद्योघाती शूलादिः । भग० ३०६ । रोगः-चिरस्थायी कुष्ठादिः । जं० प्र० १२५ । गलत् कुष्ठादि । उत्त० ३४५ । रोगः-ज्वरातिसारकासश्वासादिः । षोडशम परीषहः । आव० ६५७ ।

**रोगमक्कडं-** । नि० चू० प्र० ११२ अ ।

**रोगविहि-**रोगविधिः-वैद्यशास्त्रपुस्तकम् । बृ० प्र० २६५ आ । रोगविधिः-चिकित्सा । बृ० प्र० २६५ आ ।

**विसओ**-विषयः । आव० १७५ । विषयः । आव० ३५५ । विषयः-गोचरः । आव० ५८६ । विषयः । आव० ८५७ । विषयः-मोहः । व्य० प्र० १६७ अ ।
**विसकर**-विषकरः । आव० ४२५ ।
**विसकुंभ**-लूता । नि० चू० प्र० ४८ अ । विषकुम्भः । व्य० द्वि० १३२ अ ।
**विसग्ग**-विसर्गः । आचा० २७१ ।
**विसज्जण**-विसर्जनं-अनुज्ञा क्रियते । व्य० प्र० १५१ अ ।
**विसज्जणा**-विसर्जना-प्रायश्चित्तमुत्कलम् । व्य० प्र० १६७ आ ।
**विसज्जावग**-नेतुम् । आव० ३६५ ।
**विसट्ट**-विसर्पत् । भक्त० ।
**विसट्टति**-विकसति । जीवा० २६६ । विकसति । ज० प्र० १०० ।
**विसट्टमाणि**-विकसन्ति-विदलन्ती । ठाणा० २६५ । विकसन्ती-विदलन्ती । भग० ३४२ ।
**विसण्णा**-विविधं-अनेकप्रकारं सन्ना-मग्नाः विषण्णाः । उत्त० २६७ ।
**विसत**-विषयः-देशः । उत्त० ३०१ ।
**विसतुंड**-उपद्रवः । नि० चू० द्वि० ८७ अ ।
**विसनंदी**-प्रथमबलदेवपूर्वभवनाम । सम० १५३ ।
**विसनिग्घायणहेउ**-विषनिर्घातनहेतुः-विषनिर्घातननिमित्तम् । आव० ५६७ ।
**विसनेत्त**-वृषसागारिकम् । व्य० प्र० २५५ ।
**विसन्न**-विषण्णः-असंयमः । सूत्र० ११४ । विषण्णः-कथममी प्रवणीभविष्यन्तीति चिन्तया व्याकुलितः । उत्त० ३६७ ।
**विसपरिणत**-विसपरिणतः-विषरूपापन्नः विषपरिणतः । ठाणा० २६१ ।
**विसप्प**-पञ्चमं क्षुद्रं कुष्ठम् । प्रश्न० १६१ । विसर्प-स्वल्पमपि बहु भवति । उत्त० ६६६ । विसर्पतीति विसर्पः-क्षुद्रकुष्ठम् । आचा० २३५ । विसर्पद्-विस्तारयामीति हृदयम् । ज्ञाता० १३ ।
**विसप्पमाण**-विसर्पन् विशिष्टस्वप्रमाणः, संचरन् वा । प्रश्न० ८३ । विसर्पद्-उल्लसत् । ज० प्र० १८६ । विसर्पः-विस्तारयायि । जीवा० २१३ ।
**विसभक्खण**-मरणविशेषः । ठाणा० ९३ ।
**विसभक्खो**-विषभक्षी-पर्यन्तदारुणतया विषोपमं फलम् । उत्त० ५०६ ।
**विसमं भूमी**-भूमीविसमं-गर्ता पाषाणाद्याकुलो भूभागः । बृ० तृ० २२६ आ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विसम**-विषमः-असंयमः । सूत्र० ६० । विषमः-गर्तपाषाणाद्याकुलः पर्वतः । ठाणा० ३२८ । विषमः-विषमभूमिप्रतिष्ठितम् । भग० ३०७ । गर्तपाषाणादिव्याकुलम् । भग० ६८३ । विषमं-पर्वतादिदुर्गम् । प्रश्न० ४२ । दुर्गमत्वाद्विषमम् । भग० ७७६ । विषमं-प्रतिकूलम् । सूत्र० ६५ । विषमं-गर्त्तातिवर्तताद्याकुलं भूमिरूपम् । भग० १७४ । विषमं-निम्नं दुःसञ्चरम् । आव० ५९४ । विषमं-निम्नोन्नतम् । दश० १६४ । विषम उन्नतम् । ओघ० १२७ । विषमं-सर्वपादेष्वेव विषमाक्षरम् । दश० ८८ । विषमं-दुरारोहावरोहस्थानम् । जीवा० २८२ । विषम-विसमकालम् । सूर्य० १७२ । विषमं-निम्नोन्नतम् । आचा० ३३८ । विषमं-दुर्गमत्वम् । भग० ७७६ । विषमं-अतिदुर्लक्षतयाऽतिगहनं विसदृशं वा । उत्त० २४९ । णिण्णोण्णतं-निम्नोन्नतम् । नि० चू० प्र० ३० अ । णिण्णुण्णतं । नि० चू० द्वि० १२९ अ । विषमं-निम्नोन्नतम् । ज० प्र० ६६ । विषमं-दुरारोहावरोहस्थानम् । ज० प्र० १२४ । विषमः-उट्टङ्कादिः । आव० ७९७ । निण्णोण्णतं । नि० चू० प्र० ८८ अ । तिव्ररोहादिजनितातुरत्वं-विषमम् । ज्ञाता० ७९ ।

**विसमचउक्कोणसंठिए**-विषमचतुष्कोणसंस्थितः । सूर्य० ३६, ६९ ।

**विसमचउरंससंठाण**-विसमचतुरस्रसंस्थानम् । सूर्य० ३६ ।

**विसमचक्कवालसंठिए**-विषमचक्रवालसंस्थितः । सूर्य० ३६ ।

**विसमचक्कवालसंठिया**-विषमचक्रवालसंस्थिता । सूर्य० ६९ ।

**विसमचारि**-विषमचारि-मासविसदृशं नाम । सूर्य० १७२ ।

**विसमति**-विश्राम्यति । आव० ८३२ ।

**विसमपव्वा**-एकं पर्वलघु पुनर्बृहत्प्रमाणमित्येवं या विषमपर्वा । ओघ० २१८ ।

**विसमेह**-विसमेघः-जनमरणहेतुजलमेघाः-मेघः । भग० ३०६ ।

**विसयंगण**-विषयो-गृहं-तस्याङ्गणं विषायाङ्गणम् । उत्त० २७२ ।

**विसय**-विषयः-मण्डलम् । प्रश्न० ४६ । विषदः-निर्मलः । जीवा० २०७ । विषयः-विषीदन्ति-अवबुध्यते येषु प्राणी इति विषयः शब्दादि । दश० ८६ । विषयः-गृहम् । उत्त० २७२ । विषयं-रसलक्षणम् । उत्त० २७२ । विषदः-निर्मलः । जीवा० २७४ । विशदः-स्पष्टः । ज० प्र० ५२७ । विषयः-शब्दादिः । आव० ५६८ । विषदः-निर्मलः । ज० प्र० ५२ । विषयः-देशः । आव० ६७३ ।

**विसयललहो**- । नि० चू० प्र० २५१ आ ।

**विसयट्ठा**-मैथुनाद्यासेवनार्थम् । ओघ० १८३ ।

**विसयदुट्ठ**-विषयासेवी । नि० चू० द्वि० ४० अ । विषयदुष्टः-साध्वीकामुकः । ठाणा० १६३ ।

**विसयप्पसिद्ध**-विषयप्रसिद्धः । आव० ७३८ ।

**विसयमेत्त**-विषयमात्रं-क्रियाशून्यम् । भग० १५५ ।

**विसयलोलुओ**-विषयलोलुपः । आव० ४१२ ।

**विसया**-विषीदन्ति एतेषु सक्ताः प्राणिनः इति विषयाः इन्द्रियगोचरा वा । आव० ५८४ । विषीदन्ति धर्मं प्रति नोत्सहन्ते एतेष्विति विषयाः आसेवनकाले मधुरत्वेन परिणामे चातिकटुकत्वेन विषस्योपमां यान्तीति विषयाः । उत्त० १९० ।

**विसरंत**-विशीर्यमाणम् । ज्ञाता० १५७ ।

**विसरिया**-सरडो । नि० चू० प्र० १२७ अ ।

**विसल्लीकरण**-विगतानि शल्यानि-मायादीनि यस्यासौ विशल्यस्तस्य करणं विशल्यकरणम् । आव० ७७९ ।

**विसवाणिज्ज**-विषवाणिज्य-विषव्यापारः । आव० ८२९ ।

**विसवेग**-विषवेगः । आव० ३६७ ।

**विससा**-विश्रसा-स्वभावः । ठाणा० १५२ । विश्रसा-स्वभावः । भग० २९० । विश्रसा-निर्व्याघातः । प्रज्ञा० ३२९ । विश्रसा-स्वभावः । जीवा० २६५ । विश्रसा-स्वभावः । आव० ४५७ । विश्रसा-स्वभावः । ज० प्र० १०० ।

**विससाबंध**-स्वभावसम्पन्नः । भग० ३९४ ।

**विससेण**-विश्वसेनः-शान्तिपिता । आव० १६१ । विश्व-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेनः-शान्तिनाथचक्रिपिता । आव० १६२ ।

**विसहनंदी**-विशाखनन्दी-विश्वनंदीराज्ञः पुत्रः । आव० १७२ ।

**विसा**-विषा-परलोकफलविषये सागरपोतदुहिता । आव० ८६३ ।

**विसाएमाण**-विशेषेण स्वादयन् । भग० १६३ ।

**विसाएमाणा**- । ज्ञाता० ३७ ।

**विसाओ**-विषादः-दैन्यम् । प्रश्न० ६२ । विषादः-स्नेहादिसमुत्थः सम्मोहः । आव० ६२६ ।

**विसाण**-विषाणं-शृङ्गम् । ज्ञाता० १०४ । विषाणः-शुकरदन्तः । उपा० ४७ । विषाणं-हस्तिदन्तः । प्रश्न० ८ । विषाण-शृङ्गः । अनु० २१२ ।

**विसामे**-विश्रमयेत्-स्थापयेत् । पिण्ड० १३ ।

**विसामणा**-विश्रामणा । आव १२० ।

**विसाय**-विंशतिसागरोपमस्थितिकं देवविमानम् । सम० ३८ । विषादः-दैन्यमात्रम् । सम० १२७ । विषादः-खेदः । अनु० १३७ । विषादः-वैक्लव्यम् । आव० ६११ ।

**विसायण**-विशायनः-मद्यविशेषः । प्रश्न० १६३ ।

**विसारए**-विशारदः- अर्थग्रहणसमर्थः बहुप्रकारार्थकथनसमर्थो वा । सूत्र० २३७ । विशारदः-पण्डितः । ज्ञाता० ११ ।

**विसारण**-विशारणं-शोषणायातपे मोचनम् । पिण्ड० १६१ ।

**विसारतो**-विनिश्चितः-जानेकः । नि० चू० प्र० ६६ अ ।

**विसारय**-विशारदः-विपश्चितः । नंदी० २५० ।

**विसाल**-एकोनविंशतितममहाग्रहः । ठाणा० ७९ । द्वितीयकमिन्द्रः । ठाणा० ८५ । विशालः-ओदीच्यक्रन्दितव्यन्तराणाभिन्द्रः । प्रज्ञा० ९८ । विशालः-पितामहपितृव्याद्यनेकसमाकुलः । आव० २४० । त्रयोविंशतितमतीर्थकृच्छीविकानाम । सम० १५१ । विशालः-सप्तसप्ततितममहाग्रहः । जं० प्र० ५३५ । अष्टादशसागरोपमस्थितिकं देवविमानम् । सम० ३५ । विशालः-समुद्रः । सूत्र० ४१ ।

**विसालकुच्छि**-विशालकुक्षी-विस्तीर्णोदरदेशः । ज्ञाता० १३३ ।

**विसालवच्छ**-विशालवक्षो-विस्तीर्णोरःस्थलम् । ज्ञाता० १३३ ।

**विसाला**-विशाला-महावीरजननी । भग० ११४ । विशाला-विस्तीर्णा सुदर्शनायाः षष्ठं नाम । जीवा० २९६ । विशाला-पश्चिमदिग्भाव्यञ्जनपर्वतस्य दक्षिणस्यां पुष्करिणी । जीवा० ३६४ । विशाला-विस्तीर्णा । जं० प्र० ३३६ । अञ्जनकपर्वते पुष्करणी । ठाणा० २३० ।

**विसालिस**-मागधदेशीयभाषया विसदृशं-स्वस्वचारित्रमोहनीयकर्मक्षयोपशमापेक्षया विभिन्नम् । उत्त० १८७ ।

**विसाहदत्ता**-वैशाखदत्ता । उत्त० ३८० ।

**विसाहभूई**-विसाखभूतिः-राजगृहाधिपतिविश्वनन्दीराज्ञीभ्राता, युवराजा । आव० १७२ ।

**विसाहा**-चतुर्दशं नक्षत्रम् । ठाणा० ७७ । विशाखाविशाखापर्यन्तं नक्षत्रम् । सूर्य० ११४ । विशाखानक्षत्रम् । सूर्य० १३० । यत्र बहुपुत्रिकाचैत्यम् । भग० ७३७ ।

**विसिट्ठ**-द्वितीयो द्वीपकुमारेन्द्रः । ठाणा० ८४ । विशिष्टः । जीवा० १७१ । विशिष्टः-द्वीपकुमाराणामधिपतिः । प्रज्ञा० ९४ । विशिष्टः । विशे० २८ । विशिष्टः-भिन्नः । विशे० १०५३ । विशिष्टः- व्यतिरिक्तः । विशे० ८६८ । विशिष्टः-व्यक्तीकृतः । वि० ८३९ ।

**विसिट्ठदिट्ठी**-विशिष्टदृष्टिः-प्रधान दर्शनं-मतम् । अहिंसाया अष्टविंशतितमं नाम । प्रश्न० ९९ ।

**विसिट्ठसिक्खाभाव**-विशिष्टशिक्षाभावः । उत्त० २२३ ।

**विसिर**-मत्स्यबन्धविशेषः । विपा० ८१ ।

**विसीभति**-विषीदति-अवषद्यन्ते । दश० ८९ ।

**विसील**-विशीलः-विरूपशीलः-अतीचारकलुषितार्तः । उत्त० ३४५ ।

**विसुंभिय**-विष्कम्भितः-मृतः । व्य० प्र० । ३०२ आ ।

**विसुअवण**-शोषणम् । नि० चू० प्र० १३१ अ ।

**विसुज्झई**-विशुध्यति-अपगच्छति । आचा० ४३१ ।

**विसुज्झमाण**-क्षपकश्रेणिं उपशमश्रेणिं वा समारोहन् विशुध्यमानकम् । प्रज्ञा० ६८ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विसुणीय**-विशेषेण श्रुतः-विज्ञातः विश्रुतः । प्रश्न० ८६ ।

**विसुत्तिआ**-विस्रोतसिका-चित्तविक्रिया । दश० १६५ । विस्रोतसिका अपध्यानम् । आव० ४०७ ।

**विसुत्तिया**-विश्रोतसिका-स्त्रीरूपादिस्मरणजनिता चित्तविलुप्तिः । बृ० द्वि० ४० अ ।

**विसुद्ध**-विशुद्धं-रजोमलकल्पवालाग्रविगमकृतशुद्धत्वापेक्षया लेपकल्पवालाग्रापहारेणेन विशेषतः शुद्धः-विशुद्धः । भग० २७७ । विशुद्धं-वियुक्तम् । दश० १ । विशुद्धः-मुक्तः । दश २१२ । ब्रह्मलोके षष्ठप्रस्तरः । ठाणा० ३६७ । विशुद्धः-त्रिविधसम्यग्दर्शनादिमार्गप्रतिपत्त्या अत्यन्तशुद्धीभूतः । प्रज्ञा० ६१० । विशुद्धः-निर्मलः । जीवा० २५५ । विशुद्धः-शुचिः । ओघ० १२८ । स्वाभाविकतमोविरहात् सकलदोषविगमात् विशुद्धः । सम० १४० । जिणकप्पियो पाउरणवज्जियो । नि० चू० प्र० १०९ अ । विशुद्धः-यथावस्थितः । आव० ४१५ । स्पष्टः । नि० चू० प्र० २३३ अ । विशुद्धः-अरजस्वलत्वादि । ज्ञाता० १२४ । विशुद्ध-रहितम् । राज० ५ ।

**विसुद्धपण्ण**-विशुद्धप्रज्ञः-निर्मलावबोधः । उत्त० २९८ ।

**विसुद्धपरिहारिया**- । नि० चू० प्र० ३३८ आ ।

**विसुद्धसिद्धिगत**-विशुद्धा-रागादिदोषरहितत्वेन निर्मला या सिद्धिः-कृतकृत्यता सैव गम्यमानत्वाद् गतिः विशुद्धसिद्धिगती-जीवस्य स्वरूपम् । प्रश्न० १३३ ।

**विसुद्धी**-पापक्षयोपायत्वेन जीवनिर्मलतास्वरूपत्वात् विशुद्धिः । अहिंसायाः षड्विंशतितमं नाम । प्रश्न० ९९ । विशुद्धिः-विषयविभाषाव्यवस्थापनम् । दश० ६४ । विशुद्धिः-क्षपणम् । विशे० ११४३ ।

**विसुद्धचमानः**- । ठाणा० ५३ ।

**विसुद्धचमानकं**-सूक्ष्मसम्पराये प्रथमो भेदः । ठाणा० ३२४ ।

**विसुमरियं**-विस्मृतम् । आव० ८२८ ।

**विसुयाविए**-विशोधितः । व्य० द्वि० १६३ आ ।

**विसुयावेऊ**-शोषयितुम् । बृ० प्र० ३१२ अ ।

**विसूइया**-विशुचिका । आचा० ३६२ । विशुचिका । आव० ६२९ । विसूचिका । आव० १५३ । विसूचिका-अतीसारः । उत्त० १६० ।

**विसूईया**-विध्यतीव शरीरं सूचिभिरिति विसूचिका-अजीर्णविशेषः । उत्त० ३३८ ।

**विसूणियंग**-उत्कृताङ्गः-अपगतत्वक् । सुय० १३७ ।

**विसूणियंगमंग**-जातस्वपथुकाङ्गोपाङ्गः । प्रश्न० २१ ।

**विसूरंतो**- । नि० चू० प्र० १४१ अ ।

**विसूरई**-विषीदति । आव० ११५, ३०८ ।

**विसूरण**-अप्राप्तौ मनःखेदः, परस्य वा मनःपीडा । प्रश्न० ६७ । विस्मरणम् । नि० चू० द्वि० १२२ आ ।

**विसूरणा**-चित्तखेदः । प्रश्न० ६२ ।

**विसूरेति**- । ओघ० ९९ ।

**विसूहिय**-द्वाविंशतिसागरोपमस्थितिकं देवविमानम् । सम० ४१ ।

**विसेढो**-विश्रेणिव्यवस्थितः श्रोताऽपि विश्रेणिरुच्यते । विशे० २०७ ।

**विसेस**-विशेषः-प्रज्ञापनायाः पञ्चम पदम् । प्रज्ञा० ६ । विशेषः-विशिष्टत्व माहात्म्यम् । उत्त० ३६६ । विशेषः-प्रकारः । प्रश्न० ६३ । विश्लेषे कृते योऽवशिष्टः सो विश्लेषः । ज० प्र० ४८७ । विशेषः-गुणः । सूर्य० ५० । विश्लेषः । सूर्य० १५५ ।

**विसेसण**-विशेष्यते परस्परं पर्यायजातं भिन्नतया व्यवस्थाप्यते अनेनेति विशेषणम् । व्य० प्र० १३ आ ।

**विसेसदिट्ठं**-विशेषतो-दृष्टार्थयोगाद् विशेषदृष्टम् । अनु० ११६ ।

**विसेसलुंढण**-विशेषलुण्ठनं निर्मर्यादम् । उत्त० १४९ ।

**विसेसा**-विशेषाः-नित्यद्रव्यवृत्तयोऽन्त्यस्वरूपा व्यावृत्याकारबुद्धिहेतवः । विशे० ८९५ ।

**विसेसिय**-विशेषितं-निर्धारितम् । पिण्ड० ५३ ।

**विसोत्तिया**-विस्रोतसिका-शङ्का । आचा० ४३ । विस्रोतसिका-अपध्यानम् । आव० ६०२ । विस्रोतिका-विमार्गगमनमपध्यानम् । विशे० ११७७ ।

**विसोद्धि**-विशुद्धिः-दोषाणामभावः । उत्त० ५८३ ।

**विसोधेमाण**-विशोधयन्-पादादिलग्नस्य निरवयवत्वं कुर्वन् शौचभावेन वेति । अथवा सकृद्विवेचन बहुशो विशोधनम् । ठाणा० ३३० ।

**विसोसण**-विशोषण-अभोजनम् । आव० ६१ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विसोसणविरेयणोसहविही**-विशोषणविरेचनौषधिः-अभोजनविरेकौषधप्रकारः । आव० ६१० ।

**विसोहण**-स्पर्शनधावनकरणं पुनःपुनः परिष्ठापनस्पर्शनधावनविधानं वा । बृ० तृ० १८३ अ (?) ।

**विसोहिकोडी**-विशोधिकोटिः-विशोधिः । दश० १६२ ।

**विसोहिजुत्त**-विशोधियुक्तः-विशुद्धभावः । ज० प्र० २२२ ।

**विसोहिज्ज**-विशोधयेत्-त्यजेत् । आचा० ३८० ।

**विसोहित्तए**-विशोधयितुं-अतिचारपङ्कापेक्षयाऽऽत्मानं विमलीकर्तुमिति । ठाणा० ५७ । विशोधितुं-पूयाद्यपनेतुम् । विपा० ८१ ।

**विसोही**-कोतत्रित्रये क्रयणक्रापणानुमतिरूपे विशोधिः विशोधिकोटी । दश० १६२ । विशोधनं विशुद्धिः-अपराधमलिनस्यात्मनः प्रक्षालनम् । आव० ७७९ । विशुद्धिः-कर्ममलिनस्यात्मनो विशुद्धिः । अनु० ३१ । विशुद्धिः-सावद्यपरिहारेणेतरस्वरूपकथनम् । दश० १४ । विशुद्धिः-आवश्यकस्य पर्यायः । विशे० ४१५ ।

**विसोहीकरणं**-विशोधीकरण-अपराधमलिनस्यात्मनः प्रक्षालनकरणम् । आव० ७७९ ।

**विसोहीकोडी**-अल्पतरदोषदुष्टा । नि० चू० प्र० ६३ अ ।

**विसोहेज्जा** विशोधनं-आत्मनः चारित्रस्य वा अतिचारमलक्षालनम् । ठाणा० १३७ ।

**विसोहेहि**-विशोधनं-व्रतानां पुनर्नवीकरणम् । ज्ञाता० २०६ ।

**विस्तरालं** विशालम् । सम० १४२ ।

**विस्तीर्ण**-प्रफुल्लहृदयः । ज० प्र० २११ । परग्रामदूतीत्वदोषविवरणे धनदत्तस्य ग्रामम् । पिण्ड० १२७ ।

**विस्पन्दन**-अर्द्धनिर्दग्धघृतमध्यक्षिप्ततन्दुलनिष्पन्नम् । बृ० प्र० २६७ आ ।

**विस्मापक**-इन्द्रजालीकः ठाणा० २६५ ।

**विस्रोल्लोलितं**-लुंटितं । नि० चू० द्वि० ११ आ ।

**विस्संत**-विश्रान्तः-उपशान्तकचवरः । जीवा० ३५५ ।

**विस्संदण**-विगतो वा गता जम्मि दव्वे तं दव्वं । नि० चू० प्र० १९९ अ ।

**विस्संभइ**-विश्रम्भति । आव० ५५९ ।

**विस्संभणया**-विस्रम्भणता-विश्वासापदम् । आचा० २८६ ।

**विस्संभर**-विश्वम्भरः-भुजपरिसर्पः तिर्यग्योनिकः । जीवा० ४० । विश्वम्भरः-जीवविशेषः । ओघ० १२६ ।

**विस्संभिय**-विश्वं-जगद् बिभर्ति क्वचित्-कदाचिदुत्पत्त्या सर्वजगद् व्यापनेनेन पूरयन्ति विश्वभृतः । उत्त० १८१ ।

**विस्सओमुहं**-विश्वतो मुखं प्रतिसूत्रं, चरणानुयोगाद्यनुयोगचतुष्टयव्याख्याक्षमम् । अनु २६३ ।

**विस्सनंदी**-विश्वनन्दी-अचलबलदेवपूर्वभवः । आव० १६३ टी० । विश्वनन्दो-राजगृहनगरे राजा । आव० १७२ ।

**विस्सभूई**-प्रथमवासुदेवपूर्वभवनाम । सम० १५३ । विश्वभूतिः-विशाखभूतियुवराजपुत्रः । आव० १७२ । द्वेषान्निदानकृत् । भक्त० ।

**विस्सभूति**- । नि० चू० प्र० १३५ अ ।

**विस्सरिय**-विस्मृतः । आव० ३७० ।

**विस्सवातितगण**-श्रमणस्य भगवतो महावीरस्य षष्ठो गणः । ठाणा० ४५१ ।

**विस्ससण**-शान्तिनाथपिता । सम० १५१ ।

**विस्ससेण**-मल्लीनाथस्य प्रथमभिक्षादाता । सम० १५१ । षष्ठचक्रीपिता । सम० १५२ । विश्वसेनः-मल्लिजिनस्य-प्रथमभिक्षादाता । आव० १४७ ।

**विस्सहोमुह**-विश्वतो मुखं अनेकमुखम् । आव० ३७६ ।

**विस्सायणिज्जं**-विशेषतः विश्वादनीयम् । जीवा० २७८ ।

**विस्सुयकित्तिए**-विश्रुतकीर्त्तिकं-प्रतीतख्यातिकम् । ज्ञाता० ४ ।

**विस्सुयजस**-विश्रुतयशाः-ख्यातकीर्त्तिः । ज्ञाता० २१३ ।

**विस्सोय**-विश्रोतः । आचा० ४३ ।

**विस्सोयसिगा** विस्रोतसिका । प्रज्ञा० ६६ ।

**विहग**-विभागः-खण्डशः कृतः । प्रश्न० ६ ।

**विहगम**-विहे-नभसि गतो-गच्छति गमिष्यति चेति विहङ्गमः । विहंगमः-विहं गच्छन्त्यवतिष्ठन्ते स्वसत्ता बिभर्ति इति विहङ्गमः । विहंगमः-विहं गच्छन्ति-चलन्ति सर्वैरात्मप्रदेशैरिति विहङ्गमः । दश० ७० । विहङ्गमः-पुद्गलस्तु विहं गच्छतीति विहङ्गमः । दश० ७१ ।

**विहंमाणो**-विशेषेण घ्नन्-ताडयन् । उत्त० ५५१ ।

**विहुंसणा**-विहंसना-विधर्षणा । उत्त० १६० ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विह्**–अनेकाहगमनीयः पन्थाः । आचा० ३७८ । अटवी प्रायो दीर्घो ध्वा भवेत् । आचा० ३८४ । अटवी-प्रायः पन्थाः । आचा० ३९८ । विभुञ्जति जीवपुद्गला-विति विहं–आकाशः । दश० ६९ । विहः–पन्थाः । ओघ० १९७ । विशेषेण ह्रीयते–विधीयते–क्रियते । भग० ७७६ । अद्धाणं । नि० चू० प्र० १३७ आ । अद्धाणं अणेगेहिं अहेहिं जं गमइ तं । नि० चू० तृ० ३५ आ । नि० चू० प्र० ५५ अ । अध्वा । बृ० द्वि० ५६ आ । अध्वा । बृ० प्र० २०६ आ । विधः–भेदः प्रकारो वा । अनु० २ ।

**विहग**–पक्षी । जीवा० २७० ।

**विहगगई**–विहगगत्या–पक्षिन्यायेन परिवारादिवियोगेनैका-किनो देशान्तरगमनेन च या सा विहगगतिप्रव्रज्या । ठाणा० २७६ । विहायसि–आकाशे गतिर्विहायोगतिः । दश० ७० ।

**विहगपवज्जे**–विहगस्येवेति हृदयमिति, विहतस्य वा दारिद्र्यादिभिररिभिर्वेति प्रव्रज्या । ठाणा० २७६ ।

**विहडइ**–पृथग्भवति । आव० ३२१ । विपतति–विशेषेण बलापचयादपैति । उत्त० ३३८ ।

**विहडई**–विध्वस्यते–जीवविप्रमुक्तं च विशेषेणाधः पतति ते शरीरम् । उत्त० ३३८ ।

**विहणिज्जा**–विहन्यात्–उलङ्घयेत् । उत्त० ११० ।

**विहत्थि**–वितस्तिः–द्वादशाङ्गुलप्रमाणा । अनु० १५६ ।

**विहत्थी**–द्वादशाङ्गुलप्रमाणा । भग० २७५ । चत्वार्य-ङ्गुलानि वितस्तिः । ओघ० २१४ । द्वादशाङ्गुलानि वितस्तिः, द्वौ पादौ वितस्तिः । ज० प्र० ९४ ।

**विहम्मणा**–विधर्मिताः । विशे० ९५० ।

**विहम्मसि**–विहन्यसे–विविधं बाध्यसे । उत्त० ३१७ ।

**विहम्मिया**–विधर्मिता–व्याविता । बृ० द्वि० २५५ आ ।

**विहम्मेमाण**–विधर्म्मयन्–स्वाचारभ्रष्टान् कुर्वन् । विपा० ४० ।

**विहरंता**– । नि० चू० प्र० ३१४ अ ।

**विहरइ**–आस्ते । सम० ८६ । विहरति–आत्मानं वासं यस्तिष्ठति । भग० १३ । विहरति–आस्ते । भग० १२३ । विहरति–अवतिष्ठते । सूर्य० २९२ । विहरति–आस्ते । विपा० ३३ । विहरति–अवतिष्ठति । जीवा० ११९ । विहरति–आस्ते । जीवा० १६३ । तिष्ठति । ज० प्र० १६ ।

**विहरति**–यथायोगं पर्यटति । आचा० ३५८ । यतन्तः । आचा० ३५८ । आसते । ज० प्र० ४७ । विहरति–तिष्ठति । ठाणा० २३७ ।

**विहरसि**–वर्त्तसे । ज्ञाता० २०४ ।

**विहरिज्जा**–विहरेत्–सामाचारीपालनं कुर्यात् । दश० १९० ।

**विहरित्तए**–विहर्त्तुं–स्थातुम् । ठाणा० ५७ । विहर्त्तुं–वर्त्तितुम् । ज्ञाता० ११२ ।

**विहरित्ता**–विहर्त्ता–अवस्थाता । उत्त० ४२४ ।

**विहरिय**–विहृतः–क्षुण्णः–आसेवितः । ओघ० ८५ ।

**विहरे**–विहरेत्–अवतिष्ठेत् । सूर्य० २९४ । व्यहार्षीत् । उत्त० ९० ।

**विहलावीभूओ**–उन्मत्तः । नि० चू० प्र० ३४५ अ ।

**विहलियग**–भ्रष्टराज्यः । धाटितो वा । उत्त० २२१ ।

**विहल्ल**–विहल्लः शिक्षायोगदृष्टान्ते श्रेणिकचेल्लणापुत्रः । आव० ६७९ । विहल्लः–चम्पायां कुणिकराज्ञोऽनुजः । भग० ३१६ ।

**विहव**–विभवः–सम्पत्तिः । ज० प्र० ४०३ ।

**विहवा**–रंडा । नि० चू० प्र० २६७ अ ।

**विहसियं**–विहसितं–अर्द्धहसितादि । ज्ञाता० १६५ ।

**विहा**–विहगा–भारंडा । बृ० तृ० १०८ आ । द्विधा । आव० ६४१ ।

**विहाए**–द्वितीयः प्रज्ञापनेन्द्रः । ठाणा० ८५ ।

**विहाडिय**–विघट्टितः । विशे० ५५२ ।

**विहाडिया**–उद्घाटिता । आव० ५५९ ।

**विहाडेइ**–उत्घाटयति । राज० १०८ ।

**विहाडेहि**–विघाटय–सम्बन्धोवियोज्य उद्घाटय । ज० प्र० २२३ ।

**विहाडेत्तुं**–विघाट्य–विदार्य । प्रश्न० १९ ।

**विहाण**–विधानं–स्वरूपस्य करणम् । भग० २८२ । भेदः । भग० ८७४ । विधानं–विशेषः कालादिरिति । भग० २० । विधानं–विशेषः । जीवा० १९ । विधानं–भेदः प्रकारः । ओघ० २६ । विवक्तं–इतरव्यवच्छिन्नं धानं–



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पोषणं स्वरूपस्य यत् तत् विधानं-विशेषः । प्रज्ञा० ५०१ । विधीयते-विशेषाभिव्यक्तये क्रियन्त इति विधानं भेदः । उत्त० २३१ ।

**विहाणसंगुणिय**-विधानेन-भेदप्रकारेण संगुणितः। ओघ० २६ । विधानेन-भेदप्रकारेण संगुणितः । जं० प्र० २६ ।

**विहाणसट्ठाण**-वेहानसस्थानं मानुषोल्लम्बनस्थानम् । आचा० ४११ ।

**विहाणादेस**-विधानादेशो-यत्समुदितानामप्येकैकस्यादेशनम् । भग० ८६३ । भेदप्रकारेणैकैकशः भग० ८७४ ।

**विहायंती**-विमाता । आव० ३६६ ।

**विहाय**-लब्धिशिक्षर्द्धिप्रत्ययस्याकाशगमनस्य जनकम् । तत्त्वा० ८-१२ ।

**विहायगई**-विहायगतिस्तु स्पृशद्गतिः । भग० ३८१ ।

**विहायगति**-विहायसा गतिः गमनं विहायोगतिः । प्रज्ञा० ४७४ ।

**विहायगती**-आकाशेन विहायोगति विहायोगति स्पृशद्गत्यादि, सप्तदशभेदभिन्नागतिः । प्रज्ञा० ३२७ ।

**विहायोगति**-गतेः पञ्चदशमो भेदः । प्रज्ञा० ३२७ ।

**विहार**-विहारः-विहरणं-क्रीडनं वा । सूत्र० ८७ । विहारः बौद्धाध्याश्रयः । प्रश्न० ८ । मासकल्पादिविहारः । आव० ५२९ । नगरम् । सम० १०३ । विचित्रक्रीडा । प्रश्न० ६९ । विहारः-भिक्षुनिवासो देवगृहं वा तत्प्रधानो ग्रामादेरपि । उत्त० ६०५ । विहारः । आव० २६५ । विहारः-विचरणम् । जं० प्र० १२४ । विहारः-वसतावस्वाध्यायिके समुत्पन्ने सति स्वाध्यायनिमित्तमन्यत्र गमनम् । बृ० प्र० २६१ अ । सज्झायभूमी । नि० चू० प्र० १४३ अ । विहारः-चंकमणम् । बृ० द्वि० २०४ आ । विहारार्थम् । ओघ० ६० । गोचरचर्यादिहिण्डनलक्षणः । जं० प्र० १५१ । विहरन्त्यस्मिन्प्रदेश इति विहारः-प्रदेशः । उत्त० ५४४ । विहारः-भिक्षुनिवासः, देवगृहम् । उत्त० ६०५ । विहारः-ग्रामादिचर्या । ठाणा० ४१६ । विहरणं विशेषेण भगवदभिहितमार्गे पराक्रमणं विहारो विशेषानुष्ठानरूपः । विशे० १० । विहारः-अवस्थानशयनादिरूपः । जं० प्र० १०७ । विशेषानुष्ठानरूपः । बृ० प्र० २२१ आ । साधुवर्तनः ।

ज्ञाता० ११३ ।

**विहारकप्प**-विहरणं विहारः तस्य कल्पो-व्यवस्था स्थविरकल्पादिरूपा यत्र वर्ण्यते ग्रन्थे स विहारकल्पः । नंदी० २०६ ।

**विहारकल्पिकं**- । बृ० प्र० १११ आ ।

**विहारगमण**-विहरणं-क्रीडनं विहारस्तेन गमनं-उद्यानादौ क्रीडया गमनं विहारगमनम् । सूत्र० ८७ ।

**विहारगेह**-विहारगृहम् । आव० १३७ ।

**विहारजत्ता**-विहारयात्रा-क्रीडार्थमश्ववाहनिकादिरूपा । उत्त० ४७२ ।

**विहारठाण**-विहारस्थानं-आश्रयस्थानम् । व्य० प्र० १६६ अ ।

**विहारभूमि**-विहारभूमिः-स्वाध्यायभूमिः । आचा० ३२४ ।

**विहारभूमी**-विहारभूमिः-स्वाध्यायभूमिः । आचा० ३७६। असज्झाए सज्झायभूमी जा सा । नि० चू० प्र० १४८ आ । भिक्षापरिभ्रमणभूमिः । व्य० द्वि० ३६५ अ ।

**विहारालोचना**-आलोचनाविशेषः । व्य० प्र० ४८ आ ।

**विहारावधी**- । व्य० द्वि० ३३० अ ।

**विहारिण**-मासंमासेन विहरन्तः । बृ० तृ० १८४ आ ।

**विहिंसण**-विहिंसनं-विविधव्यापादनम् । प्रश्न० २२ ।

**विहिंसा**-विविधं-अनेकधा हिंसा-हिंसनशीला, वीतिविश्रब्धावान् स्वेषु स्वेषूत्पत्तिस्थानेष्वनाकुलभवस्थितान् जन्तून् हिंसन्तीति विहिंसा । उत्त० १९४ । विघातः । प्रश्न० ६ ।

**विहिंसिय**-विहिंसितं-न सम्यग् निर्जीवकृतमिति । सूत्र० ३०१ ।

**विहि**-विधिः-चक्रवाललक्षणः प्रकारः । भग० २८२ । विधिः-कौशल्यम् । आव० ५०३ । विधिः-कार्यसाध्यम् । प्रश्न० ९२ । विधिः-प्रवचनोक्तः प्रकारः । दश० २ । विधिः-विधिविशेषः भेदः । सम० ११४ । विधिः-विरचनम् । अनु० १४० । विधिः-अनुष्ठानमासेवनम् । उत्त० ६११ । विधिः-कल्पे-कल्पाध्ययने द्वितीयतृतीययोरुद्देशयोर्विधिः । (?) व्य० द्वि० ४२० अ ।

**विहिगहिय**-विधिगृहीतं-अलुब्धेनोद्गमितम् । आव० ८५६। विधिनोद्गमदोषादिरहितं सारासारविभागेन च यत्र कृतं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पात्रके तत् विधिगृहीतम् । ओघ० १९२ ।
**विहिण्णू**-विधिज्ञं-पञ्चचत्वारिंशतो देवतानां उचितस्थान-निवेशनार्चनादिविधिज्ञम् । ज० प्र० २०७ ।
**विहिन्नू**-विधिज्ञः-न्यायमार्गप्रवेदः । दश० १९५ ।
**विहिप्पगारः**-विधिप्रकारः-प्रवृत्तिप्रकारः-विधिभिः-भेदैः प्रचारः प्रवृत्तिर्यस्याः सा । ज्ञाता० ३८ ।
**विहिभुत्त**-कटकच्छेदेन प्रतरच्छेदादिना वा यद्भुक्तं तत् विधिभुक्तम् । ओघ० १९२ । विधिभुक्तं-विधिना-कट-प्रतरर्कासिंहखादितेन भुक्तम् । आव० ८५९ ।
**विहिय**-विहितं-अनुष्ठानम् । ओघ० ४ । विहितं-अनु-ष्ठानम् । आव० ६१९ । व्रीहिः । आव० ८५५ । विहितं-चेष्टितम् । ज्ञाता० १३ ।
**विही**-विधानं विधिः-सम्यग्ज्ञानदर्शनयोर्यौगपद्येनावाप्तिः । सूत्र० १९७ । नाम वित्थारो । नि० चू० प्र० ३४ अ । विकप्पो । नि० चू० प्र० २१० आ । विथिः-चतुष्पथः । आव० ६७३ । प्रकारः । आव० ६१० । मर्यादा । आव० ६३९ । अनुज्ञा । आव० ७१३ । विथी । आव० ४२१ । विथिः । उत्त० २७९ । विधिः-प्रकारः । प्रश्न० ३८ । विधिः । आव० ४०१ । विधिः । आव० ५८१ ।
**विहीए**-विधिना-यतनया । ओघ० ६२ ।
**विहीकरणमूल**-वीथीकरणमूलं-मण्डपिका । आव० ७६७।
**विहुअणा**-विधुवणा-वीयणओ । नि० चू० प्र० ५४ आ ।
**विहुण**-विधूवनं-व्यजनम् । दश० १५४ । विधूवनं-व्यज-नम् । दश० २२९ ।
**विहुणमाण**-विधूनयन् । मर० ।
**विहुय**-विविधं-अनेकधा धूतं अपनीतमष्टप्रकारं कर्म्म येन स विधूतः । आचा० १६८ ।
**विहुयकप्प**-विधूतः कल्पो यस्य साधोः स विधूतकल्पः । आचा० १९८ ।
**विहुयरयमला**-विधूतरजमलाः- तत्र रजश्च मलश्च रज-मलौ विधूतौ-प्रकम्पितौ अनेकार्थत्वात् वा अपनीतौ रजमलौ यैस्ते तथाविधाः, तत्र बध्यमानं कर्म रजो भण्यते पूर्वबद्धं तु मलं इति, अथवा बद्धं रजः निका-चितं मलः, अथवेर्यापथं रजः साम्प्रायिकं मलं इति । आव० ५०७ ।
**विहुर**-विधुरः-इष्टजनवियोगः । ज्ञाता० ७९ । विधुरः-आत्यन्तिकायामापदि । बृ० तृ० २५० अ ।
**विहुरया**-विधुरता-वैधूर्यं-विसदृशता । ओघ० ३६ ।
**विहुवण**-वीजनकम् । बृ० तृ० ६८ आ ।
**विहूय**-विधूतः-क्षुण्णः-सम्यग् स्पृष्टः । आचा० २४४ । विधूतः-प्रकम्पितः-अपनीतो वा । आव० ५०७ ।
**विहूयकप्प**-विधूतः-क्षुण्णः सम्यग्स्पृष्टः कल्पः-आचारो येन स तथा । आचा० २४३ ।
**विहूर्**-शुष्कः । महाप्र० ।
**विहेडयंत**-विहेड्यमानः-बाध्यमानः । प्रश्न० ५६ ।
**विहेडयंति**-विहेठयतो-विशेषेण विविधं वा बाध्यमानः विनाशयतः । उत्त० ३७० ।
**विहेडिओ**-अपहृतः । भक्त० ।
**वीइंगाल**-वीतः-गतः अङ्गारः-रागः यस्मात्तत् वीता-ङ्गारम् । भग० २९२ ।
**वीइ**-वीचिः-ह्रस्वकल्लोलः । भग० ७११ । वीचिः-विच्छेदः । भग० ६२५ । अन्तरार्थो रूढः, लघुः । ठाणा० ५०२ । वीचिः-प्रतिसमयमनुभवमानायुषोऽपरापरायुर्द-लिकोदयात्पूर्वायुर्दलिकविच्युतिलक्षणा । भग० ६२५ । विविक्तस्वभावात् वीचिः । भग० ७७६ । वीचिः-तर-ङ्गाकाररेखा । प्रश्न० ८३ । वीचिः-उर्मिः । आव० ६०१ ।
**वीइक्कमइ**-व्युत्क्रामति-उत्पद्यते । जीवा० ४०० । व्यतिक्रामति-मुच्यति । जीवा० ३३९ ।
**वीइज्ज**-वीजयेत् । आचा० ३४५ ।
**वीइत्था**-वीजितवान् । भग० १७६ ।
**वीइदव्वा**-पृथग्भावः-एकादिप्रदेशन्यूनम् । भग० ६४४ ।
**वीइवयइ**-व्यतिव्रजति-व्यतिक्रामति । भग० ३५ ।
**वीइवयंति**-व्यतिव्रजति-व्यतिक्रामति । भग० ९५ ।
**वीईक्कमति**-व्युत्क्रामति-उत्पद्यते । जीवा० ३२२ ।
**वीईपंथठच्चा**-कषायाणां जीवस्य च सम्बन्धो वीचिशब्द-वाच्यः, वीचिमतः कषायतः, अथवा विविच्य-पृथग्भूय यथाऽऽख्यातसंयमात् कषायदमनपर्यायेत्यर्थः, विचिन्त्य रागादिविकल्पादित्यर्थः, विरूपा कृतिः-क्रिया सरागत्वात् यस्मिन्नवस्थाने तद्विकृति यथा भवतीत्येवं स्थित्वा, 'पंथे'



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्ति मार्गे । भग० ४९६ ।

**वीईभए**-विगता ईतयो भयानि च यतस्तद् वीतिभयम् । भग० ६२१ ।

**वीईवएज्जा**-व्यतिव्रजेत्, अतिक्रामेत् पारं लभेद्वा । जीवा० १३८ ।

**वीचिदव्वाई**-वीचिप्रधानानि द्रव्याणि वीचिद्रव्याणि एकादिप्रदेशन्यूनानीत्यर्थः । भग० ६४४ ।

**वीजणकं**-विधुवनम् । बृ० तृ० ६८ आ ।

**वीट्टलयति**- । ओघ० १६५ ।

**वीडक**-विकडुभं । नि० चू० द्वि० १४४ आ ।

**वीडग**- । नि० चू० प्र० १७९ आ ।

**वीडिए**-व्रीडितः-लज्जितः । ज्ञाता० १४३ ।

**वीणति**-गवेशयति । नि० चू० प्र० २०९ आ ।

**वीणा**-वीणा-तन्त्रीसङ्ख्यादिकृतो विशेषः । ज्ञाता० २२९ । वाद्यविशेषः । ततः । ठाणा० ६३ । वैतालिकी । जीवा० १९३ । प्रश्न० १५९ । आतोद्यविशेषः । प्रज्ञा० ८७ । तन्त्री । प्रज्ञा० ८९ ।

**वीणावायण**-वीणावादनम् । आव० २९८ ।

**वीणिया**- । नि० चू० प्र० १२० अ ।

**वीतभए**-वीतभयं-नगरविशेषः । आव० २९८ । वीतभयं-विगतिद्वारे उदायनराजधानी । आव० ५३७ ।

**वीतभय**-सिन्धुसौवीरदेशे नगरम् । बृ० प्र० १६६ अ ।

**वीतरागसुय**-वीतरागश्रुतं-सम्यक्त्वपराक्रमाध्ययनस्यापरनाम, उत्तराध्ययनस्य एकोनत्रिंशतममध्ययनम् । उत्त० ५७० ।

**वीतसोग**-वीतशोकः-अरुणद्वीपे महर्द्धिको देवविशेषः । जीवा० ३६७ ।

**वीति**-विगतेतिकः घुणाद्यक्षरतः । ज० प्र० ११४ ।

**वीतिभए**-सिन्धुसौवीरे नगरम्, यत्र उदायणो राजा । भग० ६१८ ।

**वीतिभय**-उद्दायणरण्णो णगरं । नि० चू० द्वि० १४५ अ । णगरं । नि० चू० प्र० ३४६ आ ।

**वीतिवएज्जा**-व्यतिव्रजेत्-उल्लङ्घ्य परतो गच्छेत् । जीवा० १०९ ।

**वीतिवतिता**-व्यतिव्रज्य-अतिक्रम्य । जीवा० २१८ ।

**वीतिवयइ**-व्यतिव्रजति । आव० २१४ ।

**वीथि**- । नंदी० १४९ ।

**वीथीसंठिओ**-वीथिसंस्थितः-मार्गसंस्थितः । जीवा० २७९ ।

**वीभावनं**-एहिकपारत्रिकभयोत्पादनम् । नि० चू० द्वि० ४ आ ।

**वीमंसणा**-मीमांसा । व्य० प्र० १७० अ ।

**वीमंसा**-विमर्शः-पर्यालोचनात्मको मीमांसा वा मातु-परिच्छेत्तुमिच्छा सा । सूत्र० ३५ । मीमांसा-शिष्याभिप्रायविचारणा । बृ० प्र० २३९ अ । विमर्शः । आव० ७०२ । विमर्शः-शिक्षकादिपरीक्षणः । दशमा प्रतिसेवा । भग० ९१९ । विमर्शः-शिष्यादीनां परीक्षा । दशमा प्रतिसेवना । ठाणा ४८४ । विमर्शः-शिक्षकादिपरीक्षा । ठाणा० ४८५ । विमर्शः-विमर्शनं विमर्शः, ईहाया उत्तरः, प्रायः शिरःकण्डूयनादयः पुरुषधर्मा घटन्त इति संप्रत्ययो विमर्शः । आव० १८ । विमर्शन-विमर्शः अपायावर्वाग्हायाः परिणामः । नंदी० १८७ । विमर्शनं-विमर्शः-यथावस्थितवस्तुस्वरूपनिर्णयः । नंदी० १९० । विमर्श-परीक्षा । बृ० तृ० १७१ आ । परीक्षा । नि० चू० प्र० १८० अ । विशेषविमर्शद्वारेण मीमांसा-विचारणा । विशे० १७० । मातुमिच्छा मीमांसा-प्रमाणजिज्ञासा । विशे० ३०४ । विमर्शनं विमर्शः । विशे० २२६ ।

**विमंसिय**-प्रज्ञापितः विचरितः । आव० ६८१ ।

**वीय** णूमं । नि० चू० द्वि० ७० आ ।

**वीयइ**-विकृतिः-क्षीरादिका । ठाणा० २४७ ।

**वीयकम्हा**-वत्सगोत्रे भेदः । ठाणा० ३९० ।

**वीयण**-व्यञ्जनं वंशादिमयम् । प्रश्न० १५२ ।

**वीयणग**-व्यजनकम् । आव० ६८८ । वीजनकं-वंशादिमयमेवान्तर्ग्राह्यदण्डम् । भग० ४९८ ।

**वीयणय**-व्यजनम् । आव० ३५७ ।

**वीयत्ता**-प्रीतिकरा । बृ० प्र० १७४ आ ।

**वीयदुहिय**-भृतम् । नि० चू० द्वि० १२० आ ।

**वीयभय**-वीतभयं-सिन्धसौवीरेषु आर्यक्षेत्रम् । प्रज्ञा० ५५ । वीतभयं-उदयनदेवदत्तागन्धारश्राद्धवास्तव्यं नग-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपाद्यते यत्राध्ययने तद्वीतरागश्रुतम् । नंदी० २०५ ।

**वीयरेइ**-वीजयति-शोधयति । आव० ७१४ ।

**वीयसोग**-पञ्चशसतितममहाग्रहः । ठाणा० ७९ । वीतशोकः-त्रिसप्ततितममहाग्रहः । ज० प्र० ५३५ ।

**वीयसोगा**-सलोलावतीविजजे नगरी । ज्ञाता० १२१ । वीतशोकाराजधानी । ज० प्र० ३५७ ।

**वीयार**-विचारः चेष्टात्मकः । उत्त० ६०१ ।

**वीयीपंथे**-वीयिः-कषायाणां जीवस्य च सम्बन्धः ततः विचिमतः । अथवा विविच्य-पृथग्भूय यथाऽऽख्यातसंयमात् कषायोदयमनपवार्येत्यर्थः । अथवा विचिन्त्य रागादिविकल्पादित्यर्थः । विरूपा कृतिः-क्रिया सरागत्वात् यस्मिन्नवस्थाने तद्विकृति यथा भवतीत्येवं स्थित्वा 'पंथे' त्ति मार्गे: । भग० ४९५ ।

**वीरंगओ**-वीराङ्गदः-श्रेणिकराज्ञो रथिकः ।आव० ६७७।

**वीरंगत**-पद्मावतीपुत्रः । निरय० ४० ।

**वीर**-घनघातिकर्मसङ्घातविदारणान्तरवाप्तातुलकेवलश्रिया विराजन्त इति वीराः-तीर्थंकराः । आचा० ५३ । वीरयति-विक्रामयति त्यागतपोवैरिनिग्रहेषु प्रेरयति प्राणिनमित्युत्तमप्रकृतिपुरुषचरितश्रवणादिहेतुसमुद्भूतो दानाद्युत्साहप्रकर्षात्मकः वीरः । अनु० १३५ । कषायादिशत्रुजयाद्विक्रान्तः अत्यन्तानुरक्तः केवलामलश्रिया विराज इति "विदारयति यत्कर्म, तपसा च विराजते तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः" । आव० ६० । शिवगतः । (?) । कर्मस्फोटकः शिवप्रापको वा । (?) । षट्सागरोपमस्थितिकं देवविमानम् । सम० १२ । वीरः-अन्तरङ्गमोहमहाबलनिर्दलनार्थमनन्त तपोवीर्यं व्यापारयतीति वा वीरः । विशे० ४८९ । अनन्यानुभूतमहातपः श्रिया वा विराजत इति वीरः । विशे० ४८९ । 'ईर गतौ' क्रियत्क्षिपितकर्मसाध्वपेक्षया विशेषत ईरयति-क्षिपति-तिरस्करोत्यशेषाण्यपि कर्माणीति । विशे० ४८८ । 'दृ-विदारणे' विदारयति कर्मरिपु संघट्टमिति । विशे० ४८९ । यः शुनको, द्वितीयशुनाद्यपेक्षया रहितो मृगयां करोति स वीरः । ब० प्र० २४७ अ । विशेषत ईरयति-शिवपदं प्रति भव्यजन्तून् गमयतीति । विशे० ४८८ । विशेषतः शिवपदं स्वयमियर्ति गच्छतीति वीरः । विशे० ४८९ । वीरः-अवगतसंसारभयस्तीर्थकृद् । आचा० १२८ । वीरः-ऊरसबलवान् । व्य० प्र० २३० अ । वीरः-कर्मविदारणात्, पञ्चमहाव्रतभारारोहणोन्नामितस्कन्धः । आचा० १२८ । विशेषेणेरयति-प्रेरयति अष्टप्रकारं कर्मारिषड्वर्गं वेति वीरः-शक्तिमान् । आव० १४३, १४७ । विशेषेणेरयति-मोक्षं प्रति गच्छति गमयति वा प्राणिनः प्रेरयति वा-कर्माणि निराकरोति, वीरयति वा रागादिशत्रून् प्रति पराक्रमयति इति वीरः निरुक्तितो वा वीरः । ठाणा० ३६ । ऊरसबलवान्, तेनाक्लेशेन परबलं जयति । व्य० प्र० २८३ आ । विशेषेण ईरयति-गमयति स्फेटयति कर्म्म प्रापयति वा शिवमिति वीरः, 'ईरि गतौ' विशेषेण-अपुनर्भावेन इर्यत्ति-स्म-याति स्म शिवमिति वीरः । नंदी० २३ । वीरंसद्व्यवहारकाचार्यः । व्य० प्र० २५६ । सत्योदारणे वीरः । आव० ७०५ । विशेषेण ईरयति-कर्म गमयति याति वा शिवमिति वीरः । आव० ७९० । तगरायामाचार्यस्य शिष्यः । व्य० प्र० ३१७ अ । वीरः-साधुः । आचा० १४४ । वीरः-अप्रमत्तयतिः । आचा० १६३ । धीरपुरुषः । ज्ञाता० १०० । वीरः-तगरायामाचार्यशिष्यः । व्य० प्र० २५६ आ ।

**वीरकंत**-षट्सागरोपमस्थितिकं देवविमानम् । सम० १२ ।

**वीरकण्ह**-निरयावलिकायां प्रथमवर्गस्य सप्तममध्ययनम् । निरय० ३ ।

**वीरकण्हमित्त**-वीरकृष्णमित्रः-वीरपुरनगरनृपतिः । विपा० ९५ ।

**वीरकण्हा**-वीरकृष्णा-अन्तकृद्दशानामष्टमवर्गस्य सप्तममध्ययनम् । अन्त० २५ ।

**वीरकूड**-षट्सागरोपमस्थितिकं देवविमानम् । सम० १२ ।

**वीरगत**-षट्सागरोपमस्तिथिकं देवविमानम् । सम० १२ ।

**वीरघोस**-वीरघोषः कर्मकरः । आव० १९४ ।

**वीरज्झय**-षट्सागरोपमस्थितिकं देवविमानम् ।सम० १२।

**वीरण**-पर्वगभेदः । आचा० ५७, २९५ । तृणविशेषः । भग० ३०६ । तृणविशेषः । उत्त० ३७० । वनस्पतिविशेषः । भग० ८०२ । तृणविशेषः । बृ० द्वि० २६८ आ ।

**वीरत्थओ**-वीरस्तवः-सूत्रकृतङ्गाद्यश्रुतस्कन्धे षष्ठमध्यय-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नम् । आव० ६५१ । वीरस्तवः-सूत्रकृताङ्गस्य षष्ठमध्ययनम् । उत्त० ६१४ ।

**वीरदेवबुध**-नामविशेषः । अनु० २७१ ।

**वीरपुर**-वीरकृष्णमित्रराजधानी । विपा० ९५ । नमिजिनस्य प्रथमपारणकस्थानम् । आव० १४६ ।

**वीरप्पभ**-षट्सागरोपमस्थितिकं देवविमानम् ।सम० १२।

**वीरभद्द**-वीरभद्रः-कनकपुरनगरस्य श्वेताशोकोद्याने यक्षः । विपा० ९५ ।

**वीरभद्र**-भीतिपरिगृहीताऽर्हत्प्रतिमा । आव० ८११ ।

**वीरय**-वीर्यं जीवप्रभवम् । ज्ञाता० २११ । वीर्यं-मानसोऽवष्टम्भः । भग० ४६६ ।

**वीरलेस**-षट्सागरोपमस्थितिकं देवविमानम् । सम० १२ ।

**वीरल्ल**-उलजायग । नि० चू० प्र० १५५ आ ।

**वीरल्लओ**-लावकपक्षी । बृ० द्वि० १८६ आ ।

**वीरल्लग**-वीरल्लकः श्येनाभिधानः शाकुनि शकुनिविनाशाय । प्रश्न० १३ ।

**वीरल्लगसउणो**- । नि० चू० प्र० २०४ आ ।

**वीरल्लसउण**-हुलायिकः । बृ० द्वि० २०५ आ ।

**वीरल्लसेण**-वीरल्लश्येनः-श्येना एव, पक्षिविशेषः ।प्रश्न० ८।

**वीरवण्ण**-षट्सागरोपमस्थितिकं देवविमानम् । सम० १२।

**वीरवलए**-वीरवलयम् । ज० प्र० १९० ।

**वीरसिट्ठ**-षट्सागरोपमस्थितिकं देवविमानम् ।सम० १२।

**वीरसुणिय**-वीरशुनिकः । ओघ० ९६ ।

**वीरसेण**-द्वारामत्यां वीरेषु मुख्यः । ज्ञाता० १०० । द्वारावत्यां वीरमुख्यः । ज्ञाता० २०७ । वीरसेनः-वीरमुख्यः अन्त० २ ।

**वीरसेणि**-षट्सागरोपमस्थितिकं देवविमानम् । सम० १२।

**वीरा**-वीराः परीषहोपसर्गकषायसेनाविजयात् । आचा० ४४ ।

**वीरायमाण**-वीरमिवात्मानमाचरन्तः वीरायमाणा । आचा० २५३ ।

**वीरावत्त**-षट्सागरोपमस्थितिकं देवविमानम् । सम० १२ ।

**वीरासण** वीरासनं-सिंहासननिविष्टस्य भून्यस्तपादस्य सिंहासनेऽपनीते यादृशमवस्थानं तत् । भग० ९२४ । सिंहासनोपविष्टस्य भून्यस्तपादस्यापनीतसिंहासनस्येव यदवस्थानं तद् वीरासनम् । भग० १२५ । सिंहासनम् । औप० ४० । वीरासनम् । आव० ६४८ । वीरासनं भून्यस्तपादस्य सिंहासनोपवेशनमिव । प्रश्न० १०७ । वीरासनं-यत् सिंहासनस्थितस्य तदपनयने तथैवावस्थानम् । उत्त० ६०७ । सिंहासनोपविष्टः । ज्ञाता० ७२ ।

**वीरासणिए**-वीरासनं-सिंहासननिविष्टस्य भून्यस्तपादस्य सिंहासनापनोदे यादृशमवस्थानं तद्यस्यास्ति स वीरासनिकः । औप० ४० ।

**वीरासणिते**-वीरासनिको-यः सिंहासननिविष्टमिवास्ते । ठाणा० ३९७ ।

**वीरासन**-भून्यस्तपादस्य सिंहासने उपविष्टस्य तदपनयेन या कायावस्था तद्रूपं, वीरस्य-साहसिकस्यासनमिति वीरासनम् । ठाणा० २९९ । आव० २६६ ।

**वीरिअ**-वीर्यं-आन्तरोत्साहः । ज० प्र० १०५ । वीर्यं-जीवोत्साहः । ज० प्र० १३० । वीर्यं-मानसोत्साहः । ज० प्र० १५१ । सम० ५५ ।

**वीरिअप्पवाय**-सकर्मेतराणां जीवानामजीवानां च वीर्यं प्रवदन्तीति वीर्यप्रवादम् । नंदी० २४१ ।

**वीरिए**-सूत्रकृताङ्गप्रथमश्रुतस्कंधे अष्टममध्ययनम् । सम० ३१ । वीर्यं-जीवोत्साहः । भग० ५७ । वीर्यं-जीवबलम् । भग० ३११ । विशेषेण ईर्य्यते-चेष्टतेऽनेनेति वीर्यम् । उत्त० ६४५ ।

**वीरओ**-वीरकः-कृतिकर्मदृष्टान्ते द्वारिकायां वासुदेवभक्तः कोलिकः । आव० ५१३ ।

**वीरित**-वीर्यं-जीवप्रथवम् । ठाणा० ३०४ ।

**वीरियंतराइय**-यदुदयात् सत्यपि नीरुजि शरीरे यौवनिकायामपि वर्तमानोऽल्पप्राणो भवति, यद्वा बलवत्यपि शरीरे साध्येऽपि प्रयोजने हीनसत्वतया न प्रवर्त्तते तद्वीर्यान्तरायम् । प्रज्ञा० ४७५ ।

**वीरिय**-वीर्यं-जीवप्रभवम् । ठाणा० २३ । वीर्यं-जीवप्रभवम् । ठाणा० ११६ । वीर्ययोगात् वीर्यः-प्राणी । भग० ६४ । वीर्यं-वीर्यान्तरायक्षयप्रभवाशक्तिः । भग० २२४ । वीर्यं, तृतीयं पूर्वम् । ठाणा० १९९ । वीर्यं-आन्तरोत्साहः । जीवा० २६८ । शक्तः । नि० चू० प्र० १८ अ । वीर्यं, सूत्रकृताङ्गाद्यश्रुतस्कन्धे अष्टममध्य-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नम्। आव० ६५१ । वीर्यं-सूत्रकृताङ्गस्याष्टममध्ययनम् । उत्त० ६१४ । वीर्यं-जीवप्रभवम् । ज्ञाता० १४० । वीर्य-आन्तरोत्साहः । सूर्य० २८६ । वीर्यं-अनुप्रेक्षयां सूक्ष्मसूक्ष्मार्थोहनशक्तिः । सूर्य० २९६ । वीर्यलक्षणं सामर्थ्यलक्षणम् । वीर्यं-सामर्थ्यं यद्यस्य वस्तुनः तदेव लक्षणं वीर्यलक्षणम् । आव० २८२ । वीर्यं-वीर्यान्तरायक्षयोपशमक्षयज खल्वात्मपरिणामः । आव० ७८३ । वीर्यं-तृतीयं पूर्वम् । सम० २६ ।

**वीरियत्ता**-वीर्यता-परिणतिविशेषः। भग० ६३ । वीर्यता-वीर्ययोगात् वीर्यः-प्राणी तद्भावो वीर्यता, अथवा वीर्यमेव स्वार्थिकप्रत्ययात् वीर्यता, वीर्याणां वा भावो वीर्यता । भग० ६४ ।

**वीरियविउव्वणिड्डी**-वीर्यवैक्रियर्द्धिः-तपःसामर्थ्योद्भूता आकाशगमनजङ्घाचरणादिवीर्यवैक्रियनिर्माणलक्षणा । दश० ११२ ।

**वीरियसजोगसद्दव्वया**-वीर्यं-वीर्यान्तरायक्षयप्रभवा शक्तिः तत्प्रधानं सयोग-मानसादिव्यापारयुक्तं यत् सद्-विद्यमानं द्रव्यं-जीवद्रव्यं तत्तथा, वीर्यसद्भावेऽपि जीवद्रव्यस्य योगादिना चलनं न स्यादिति सयोगशब्देन सद्द्रव्यं विशेषितं, सदिति विशेषणं च, तस्य सदा सत्तावधारणार्थं, अथवा-स्वं-आत्मा तद्रूपं द्रव्यं स्वद्रव्यं ततः कर्मधारयः, अथवा वीर्यप्रधानः सयोगो-योगवान् वीर्यसयोगः स चासौ सद्द्रव्यश्च-मनःप्रभृतिवर्गणायुक्तो वीर्यसयोगसद्द्रव्यस्तस्य भावस्तत्ता वीर्यसयोगसद्द्रव्यता । भग० २२४ ।

**वीरियायार**-वीर्याचारः-ज्ञानादिष्वेव शक्तेर्गोपनं तदनतिक्रमश्चेति । ठाणा० ६५ । वीर्यागोपनम् । ठाणा० ३२५ । ज्ञानादिप्रयोगजनेषु वीर्यस्यागोपनमिति वीर्याचारः । सम० १०८ ।

**वीरुणी**-पर्वगविशेषः । प्रज्ञा० ३३ ।

**वीरुत्तरवडिंसग**-षट्सागरोपमस्थितिक देवविमानम् । सम० १२ ।

**वीवाह**-परिणयनम् । जीवा० २८१ । वधूपक्षिणां विवाहः । व्य० द्वि० ३४२ आ। विवाहः परिणयनम् । ज० प्र० १२३ । पाणिग्रहणम् । बृ० तृ० ४३ आ ।

**वीसंदति**-विष्यन्दति-श्रवति । ज० प्र० १०० । विष्यन्दति-स्रवति । जीवा० २६६ ।

**वीसंभो**-विश्रम्भः-विश्वासः । आव० ५६८ ।

**वीसंभघायग**- । ज्ञाता० २३६ ।

**वीस**-लोमपक्षिविशेषः । जीवा० ४१ ।

**वीसइम**-विंशतितमः । सम० १५१ ।

**वीसत्थ**-विश्वस्तः-निर्भयः अनुत्सुको वा । औप० २ । विश्वस्तः । आव० ३१४ । विश्वस्तः-अप्रावृतशरीरः । बृ० द्वि० २०५ अ । विश्वस्तः-निरुद्विग्नः । बृ० प्र० २६० आ ।

**वीसत्था**-जीतारीरायभारिया । नि० चू० द्वि० ४२ अ ।

**वीसभूई**-विश्वभूतिः-त्रिपृष्ठवासुदेवपूर्वभवः । आव० १६३ टी० ।

**वीसरणालु**-विस्मरणालुः । ओघ० १५४ ।

**वीसरस्सर**-अब्भायामेण रूवं तं । नि० चू० तृ० ७७ अ ।

**वीससा**-विश्रसा-स्वभावः, जरापर्यायः । भग० ५५ । स्वभावः । भग० १७४ । विश्रसा-स्वभावः । ज्ञाता० १७४ । विश्रसा-स्वभावः । विशे० १०६० ।

**वीससेण**-विश्वा-हस्त्यश्वरथपदातिचतुरङ्गः बलसमेता सेना यस्य स चक्रवर्ती विश्वसेनः । सूत्र १५० । विश्वसेनः-अष्टादशममुहूर्त्तनाम । सूर्य० १४६ । विश्वसेनः-अष्टादश-मुहूर्त्तनाम । जं० प्र० ४९१ ।

**वीसा**-विस्रा-आमगन्धिका-परमदुरभिगन्धा मृतगवादिकलेवरेभ्योऽप्यतीवानिष्टदूरभिगन्धा । प्रज्ञा० ८० ।

**वीसास**-विश्वासः-विश्रंभः । अहिंसाया एकपञ्चाशत्तमं नाम । प्रश्न० ९९ ।

**वीसुंकरेति**-वीसुंभोगं । नि० चू० प्र० २१८ अ ।

**वीसुंभण**-विष्कंभनं मरणं विष्वग्भवनं वा (?) ।

**वीसुंभणणति**-वासासु अण्णं खेत्तं गच्छे वीसुंभणणति । नि० चू० प्र० ३३५ आ ।

**वीसुंभत**-मृतः । नि० चू० द्व० २०९ आ ।

**वीसुंभिओ**-विष्वग्भूतः । बृ० द्वि० २१२ आ ।

**वीसुंभेज्जा**-विश्वरु-शरीरात् पृथग् भवे-जायेत् म्रियेतेत्यर्थः । ठाणा० ३१० ।

**वीसु**-विष्वक्-पृथक् । आचा० ४० । विष्वग्-भेदः । ओघ० १५ । विष्वग्-पृथग् । ओघ० १९५ । विष्वक्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

। ठाणा० ३३१ । एकाकिनो निद्रावशे सति । ओघ० ७६ । पृथग्-अन्यत्र वसतौ अवस्थानम् । आव० ३१० विष्वक्-पृथग् । ब्र० प्र० २०२ अ ।

**वीहि**-वीथिः-पन्थाः- । आव० ४४ । व्रीहिः । ओघ० १६० । वीथिः । उत्त० २२२ । व्रीहिः-धान्यविशेषः। दश० १९३ । उभयोरपि पार्श्वयोरेकैकश्रेणिभावेन यत् श्रेणिद्वयं सा वीथी । ज० प्र० २४ ।

**वीहितो**-वीथिका-मार्गः । ठाणा० ३६६ ।

**वीहिमुहं**- । नि० चू० द्वि० १८ आ ।

**वीही**-व्रीहिः-धान्यविशेषः, तृणपञ्चके द्वितीयो भेदः । आव० ६५२ । वीथि-उभयोरपि पार्श्वयोरेकैकश्रेणिभावेन यच्छ्रेणिद्वयं सा । जीवा० १८१ । वीथी-मार्गः । जीवा० २७९ । वीथ्या । आव० ३६७ । व्रीहिः । सूत्र० ३०९ । तृणविशेषः । ठाणा० २३४ । सामान्यशालिः । भग० २७४ । औषधिविशेषः । प्रज्ञा० ३३ । वीथी-क्षेत्रमार्गः। ठाणा० ४६९ ।

**वीहुयण**-वीजनः । आचा० ३४५ ।

**वुंदघडिया**- । नि० चू० प्र० २५३ आ ।

**वुइयं**-उदितम् । आव० ३७० ।

**वुक्कंत**-व्युत्क्रान्तः । दश० २०५ ।

**वुक्कंति**-व्युत्क्रान्तिः-निष्क्रमणम् । प्रज्ञा० ४४ ।

**वुक्कंती**-व्युत्क्रान्तिः-प्रज्ञापनायां षष्ठं पदम् । जीवा० ४०० ।

**वुक्कसाहि**- । आचा० ३७८ ।

**वुक्कारेंति**-मुखेन वुक्कारशब्दं करोति । जीवा० २४८ ।

**वुगाहिज्जइ**-व्युद्ग्राह्यते । आव० ४३६ ।

**वुग्गह**-व्युद्ग्रहः-मिथ्याभिनिवेशः । ठाणा० ३५१ । विग्गहो विग्रहो वा-कलहः । अब्रह्मणो द्वादशमं नाम । प्रश्न० ६६ । व्युद्ग्रहः-विपरीतोऽभिनिवेशः । अब्रह्मणो द्वादशमं नाम । प्रश्न० ६६ । व्युद्ग्रहः-सङ्ग्रामः । आव० ७३१ । व्युद्ग्रहः-दण्डादिघातजनितो विरोधः । उत्त० ४३५ । व्युग्रहः-सङ्ग्रामः । दश० २२२ । विग्रहः-कलहः । ओघ० ५६ । व्युद्ग्रहः-सङ्ग्रामः । व्य प्र० ६२ अ । व्युद्ग्रहः-मिथ्याभिनिवेशः, विप्रतिपत्तिः । ठाणा० ३७५ । नि० चू० द्वि ७१ अ । कलहो । नि० चू० द्वि० ८४ अ । दंडिकः द्विजो वा । बृ० तृ० २४ आ । कलहो । नि० चू० तृ० ३५ अ । सङ्ग्रामः । ठाणा० ४७७ । व्युद्ग्रहः-परस्पर विग्रहः, दडीकादी-नामादिशब्दात्सेनापत्यादीनां च परस्परं विग्रहः । व्य० द्वि० २४३ अ । व्युद्ग्रहः-संग्रामः । व्य० प्र० ६२ अ ।

**वुग्गाहणमूढो**- । नि० चू० द्वि० ४३ अ ।

**वुग्गाहणया**-वि कुत्सायां उत् प्राबल्येन ग्राहणता व्युद्-ग्रहणता । ओघ० १८ ।

**वुग्गाहिए**-कुप्रज्ञापकदृढीकृतविपरीतावबोधः । बृ० त० १०६ अ ।

**वुग्गाहित**-व्युद्ग्राहितः-कुप्रज्ञापकदृढीकृतविपर्यासः । ठाणा० १६५ ।

**वुग्गाहिय**-विशब्दः-कुत्सायामुत्-प्राबल्येन केनचित्प्रत्य-नीकेन व्युद्ग्राहितः । ओघ० १८ ।

**वुग्गाहेइ**-व्युद्ग्राहयति । आव० ३११ ।

**वुग्गाहेमाण**-व्युद्ग्राहयन् विरुद्धग्रहवन्तं कुर्वन्तीत्यर्थः । भग० ४८९ । व्युद्ग्राहयन् । आव० ३१४ । व्युद्ग्राह-यन् । उत्त० १५७ ।

**वुच्चमाण**-उच्यमानः-पृच्छमानः । भग० ११४ ।

**वुच्चू**-गुच्छाविशेषः । प्रज्ञा० ३२ ।

**वुच्छ**-देशीपदत्वादवदग्धं-विनष्टम् । बृ० प्र० २०८ आ । उषितः । ओघ० १२४ । उषितः । मर० । व्युषितः । ठाणा० ४०३ । वुच्छः-उषितः । उत्त० ३८७ ।

**वुच्छेए**-व्युच्छेदः-निरोधोऽदानं च । आव० ८१९ ।

**वुच्छेय**-व्युच्छेदः-विशेषेण पुनरसम्भवलक्षणेनोच्छेदः-अभावः-व्युच्छेदः । उत्त० ५७८ ।

**वुज्झइ**-उह्यते-ह्रियते । आव० ५२८ ।

**वुट्ठ** वृष्टः वर्षणम् । दश० २२२ ।

**वुडलिय**- । नि० चू० प्र० १०१ अ ।

**वुड्डकुमारी**- । निरय० ३७ ।

**वुड्ड**-वृद्धः-बादरशरीरी । सूत्र० २२३ । वृद्धः तापसः । ओप० ९० । वृद्धः-तापसः प्रथममुत्पन्नत्वात् । ज्ञाता० १९३ । वृद्धः-तापसः । अनु० २५ ।

**वुड्डसावग**-वृद्धश्रावकः । ज्ञाता० १९३ । वृद्धश्रावकः-ब्राह्मणः । ओप० ९० ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वुड्ढसावय-वृद्धश्रावकः ब्राह्मणः इत्यन्ये । अनु० २५ ।
वुड्ढावासो- । नि० चू० प्र० २३६ अ ।
वुड्ढिकाए-वृष्टिकायं-प्रवर्षणतो जलसमुहं प्रकरोति-प्रवर्षति । भग० ६३४ ।
वुड्ढिपउत्तं-वृद्धिप्रयुक्तम् । आव० ३५७ ।
वुड्ढी-वृद्धिः-वृद्धिप्रतिभासः । सूर्य० ७ । वृद्धिशुक्लपक्षे चन्द्रमसो वृद्धिप्रतिभासः । जीवा० ३४५ । वृद्धिः-चन्द्रमसः प्रकटताया उपचयः । सूर्य० २४३ । वृष्टिः-महद्वर्षणम् । भग० २०० ।
वूढ-व्यूहः-सगरादिसाङ्ग्रामिकव्युहः । ठाणा० २१७ ।
वुणाविया-वायितम् । आव० ३०७ ।
वुण्ण-खुभियं । नि० चू० प्र० २०४ आ ।
वुत्तत्थ-उक्तार्थः-स्पष्टार्थः । आव० ८५३ ।
वुत्तपडिवुत्तया-उक्तप्रत्युक्तिका । भग० ५४८ ।
वुत्तुं-वक्तु-उक्त्वा । आव० १३४ ।
वुत्था-उषिता । ज्ञाता० १४८ ।
वुप्पइ-उप्यते । आव० १५० ।
वुप्पाएमाण-व्युत्पादयन् दुर्विदग्धीकुर्वन् । भग० ४८९ । व्युत्पादयन् । आव० ३१४ ।
वुसीमंत-वसन्ति वा साहु गुणाहि ते । उत्त० २४९ ।
वुसीमउ-वस्तुमान्, वस्तूनि-ज्ञानादिनि तद्वतो ज्ञानादिमानिति वश्यः आत्मवशगः-वश्येन्द्रिय इति । सूत्र० १७३ ।
वुसीमओ-वश्य इत्यायत्तः, स चेहात्मा इन्द्रियाणि वा, वश्यानि विद्यन्ते येषां वश्यवन्तः । उत्त० २४६ ।
वुसीमत-वुशीमतो वश्यवताम् । उत्त० २४९ ।
वुसीमा-वशीमानः-सविग्नाः । उत्त० २४६ ।
वूह-प्रतिक्षेपम् । सम० १११ । युयूत्सूनां-सैन्यरचनां चक्रव्यूहे-चक्राकृतौ तुम्बारकप्रध्यादिषु राजन्यकस्थापना व्यूहम् । जं० प्र० १३९ । व्यूहः-इदमित्थमेवं रूपो-निश्चयः । औप० ६६ । कलाविशेषः । ज्ञाता० ३८ । व्यूहः-प्रतिक्षेपः। नंदी० २१३ ।
वृकम्- । नंदी० १४७ ।
वृतिवर्धनादि- । विशे० ४३७ ।
वृत्तचन्दकः- । सूर्य० ७८ ।
वृत्तच्छत्वर-चतुरङ्गुलादिबाहल्यं सर्वतोऽपि रज्जुविस्तीर्णं लोकमध्ये वृत्तच्छत्वरम् । विशे० २२३ ।
वृत्तिः-वर्त्तनम् । आचा० ३३४ । वाटकविशेषः । उत्त० ४९० । आजीविका। नंदी० १५३ । आजीविका नंदी० १६१ । विविधाभिग्रहवर्त्तनम् । नंदी० २१० । वृत्तिः । सम० १११ ।
वृत्तिदानं-यच्चक्रवर्तिकवदन्तीनिवेदनवृत्तिकल्पं परिभाषितं संवत्सरनियतं दानं दीयते तत् । बृ० प्र० १६६ अ । वृत्तिदानम् । आव० २३० ।
वृथाभागी-कापालिकः । आव० ६२८ ।
वृद्धवाद-आचार्यपारम्पर्यश्रुत्यायातो वृद्धवादः । आचा० २६२ ।
वृद्धवासावग्रह-अवग्रहविशेषः । सम० २३ ।
वृद्धशीलः- । व्य० द्वि० ३६१ ।
वृद्धशीलता-वपुर्मनसो निर्विकारता । ठाणा० ४२३ । वपुषि मनसि च निभृतस्वभावता निर्विकारतेति । उत्त० ३६ ।
वृद्धाचार्याः- । नंदी० १३४ ।
वृद्धिः-ओषधिविशेषः । उत्त० ४९० । नंदी० १५९ ।
वृन्त-मूलनालः । बृ० प्र० १६३ अ ।
वृन्तक-पत्रबन्धनम् । उत्त० ३३४ ।
वृन्तस्थायिना ऊर्ध्वमुखेन । सम० ६१ ।
वृन्ताकी-गुच्छविशेषः। आचा० ३० । गुच्छभेदः । भग० ३०६ । उत्त० ६९२ ।
वृन्दं-पटलम् । आव० ७८८ ।
वृश्चिक-पृथिव्वाश्रितो जीवभेदः । आचा० ५५ ।
वृषभग्रामः-विवक्षितस्य स्थानस्य समन्ततः सन्ति वृषभग्रामः । व्य० द्वि० ३७२ आ ।
वृषभवाहण-वृषवाहनः-शङ्करः । जीवा० ३६१ ।
वेंगल-विह्वलः-निस्सहाङ्गः । प्रश्न० ४६ ।
वेंट-त्रिहस्तविस्तरः । व्य० प्र० २७५ अ ।
वेंटल-वेण्टलं निमित्तादि । ओघ० १५४ ।
वेंटला- । व्य० द्वि० २३५ अ ।
वेंटलाजीवा- । नि० चू० द्वि० ११५ अ ।
वेंटिया-विण्टिका । आव० २९१ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वेंदणगं-** । नि० चू० प्र० २७० अ ।

**वेअच्छगसुत्तग**-वैकक्ष्यसूत्रकं-उत्तरासङ्गम् । ज० प्र० २७५ ।

**वेअड्ड**-वैताढ्यः-पर्वतविशेषः । ज० प्र० ६७ ।

**वेअड्ढकूड**-वैताढ्यनाम्नो देवस्य निवासभूतं कूटं वैताढ्यकूटम् । ज० प्र० ७७ ।

**वेअड्ढगिरिकुमार**-क्रीडाकारित्वात् वैताढ्यगिरिकुमारः । ज० प्र० २१६ ।

**वेअणअ**-वेतनकं-कुविन्दादीनां व्यूतवस्त्रप्रतिकरेऽर्थप्रदानम् । अनु० १५४ ।

**वेअद्ध**-वैताढ्यकूटनाम । ज० प्र० ३४१ ।

**वेअरणीत्ति**-वैतरणीति परमाधार्मिकः, स च पूयरुधिरप्रपुताम्रादिभिरतितापात्कलकलायमानैर्भृतां विरूपं तरणं प्रयोजनमस्या इति वैतरणीति । सम० २९ ।

**वेआलिया**-विताले-तालाभावे भवतीति वैतालिकी । ज० प्र० ३८ ।

**वेआवच्चं**-व्यापृतभावे वैयावृत्त्यम् । दश० ३१ । वैयावृत्त्यं-भक्तपानादिभिरुपष्टम्भः । औप० ४३ ।

**वेआवडिय**-व्यावृत्तभावः वैयावृत्त्यं गृहस्थं प्रत्यन्नादिसम्पादनम् । दश० ११७ ।

**वेइअसंठाणसंठिओ**-वैदिकासंस्थानसंस्थितः । जीवा० २७९ ।

**वेइआ**-वेदिका-उपवेशनयोग्या भूमिः । ज० प्र० १२१ ।

**वेइए**-वेदनं-कर्मणो भोगः । भग० १६ वेदिताः स्वेत रसविपाकेन प्रतिसमयमनुभूयमानाः अपरिसमाप्ताशेषानुभावाः । भग० २४ । वेदितः-कथितः-प्रतिपादितः । आव० ११६ ।

**वेइज्जंत**-वेद्यमानं-अनुभूयमानं त्रुटितरसं शुद्धपुञ्जलक्षणम् । विशे० २८६ ।

**वेइज्जति**-वेद्यते-क्षिप्यते अप्रमादेन । ठाणा० १३५ ।

**वेइज्जमाण**-व्येजमानं कम्पमानम् । भग० १८ ।

**वेइज्जमाणा**-वेद्यमाना-ईर्यापथिकीक्रियाया द्वितीयो भेदः । आव० ६१५ ।

**वेइज्जमाणे वेइए**-व्येजमानं-कम्पमानं व्येजितं-कम्पितम् । सम० २८ ।

**वेइय**-वेदितं-कथितम् । आचा० १२३ । चपलम् । ज्ञाता० २९ । वेदितः-अनुभूतः । भग० २४ ।

**वेइया**-वेदिका-पार्श्वतः परिकररूपा । प्रश्न० १५२ । वेदिका-प्रमाणाङ्गुलप्रमेयः । अनु० १७१ । वेदिकाः त्रैविद्यवृद्धाः । दश० १२७ । वेदिका । ओघ० १०९ । वेदिका-उपवेशनयोग्यमत्तवारणरूपा । जीवा० १८२ । वेदिका-उपवेशनयोग्याभूमिः । जीवा० २७९ । उपवेशनयोग्यमत्तवारणरूपा । ज० प्र० २५ । वेदिका-जम्बूद्वीपजगत्यादिसम्बन्धी । प्रज्ञा० ७१ । वेदिका-उपवेशनयोग्यमत्तवारणरूपा । राज० ८४ ।

**वेइपुडंतर**-द्वे वेदद्विके वेदिकापुटं तेषामन्तरं वेदिकापुटान्तरम् । ज० प्र० २५ । द्वे वेदिके वेदिकापुटं तेषामन्तरं वेटिकापुटान्तरम् । जीवा० १८२ ।

**वेइयाबद्ध**-वेदिकाबद्ध-यत् जानुनोरुपरि हस्तौ निवेश्याधो वा पार्श्वयोर्वा उत्सङ्गे वा एकं वा जानु करद्वयान्तः कृत्वा वदन्ते तत् । कृतिकर्मणि दशमो दोषः । आव० ५४४ ।

**वेइयाबाहा**-वेदिकापार्श्वम् । राज० ८४ । वेदिकाबाहा-वेदिकापार्श्वम् । जीवा० १८२ । वेदिकापार्श्वम् । ज० प्र० २५ ।

**वेउट्टिय**-व्यावृत्य व्यावृत्य प्रतिदिवसं अनुज्ञापनम् । व्य० द्वि० ७२ अ ।

**वेउव्व**-विकृतम् । ठाणा० १३८ । विकृतम् । ओघ० ५२ ।

**वेउव्विइ**-वैक्रियं-विकृतम् । ओघ० ११६ ।

**विउव्विए**-विविधं विशिष्टं वा कुर्वन्ति तदिति वैकुर्विकम् । सम० १४३ । वैक्रियं-विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैकुर्विकं, विकुर्वणं-विकुर्वः विविधा क्रिया तेन निर्वृत्तं वा । प्रज्ञा० २६८, २६९ । वैक्रियं-विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियम् । सम० १४३ । विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियम् । जीवा १४ ।

**वेउव्विय**-विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं विक्रियम् । ठाणा० २९५ । विभूषितः । भग० ७४६ । महत्प्रमाणम् । नि० चू० प्र० १०८ आ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वातादिवशान्महत्सागारिकं विकुर्वितं सविटकं वा । बृ० द्वि० ५५ आ । विशिष्टं कुर्वन्ति तदिति वैकुर्विकम् । अनु० १९६ । विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियम् । अनु० १९६ । वैक्रियं-द्वितीयं शरीरम् । प्रज्ञा० ४६१ ।

**वेउव्वियलद्धी**-वैक्रियलब्धिः । भग० ८९ ।

**वेउव्वियसमुग्घाए**-वैक्रियसमुद्घातः-वैक्रियकरणाय प्रयत्नविशेषः । जीवा० २४३ ।

**वेउव्वियसमुग्घाय**-वैक्रियसमुद्घातो-वैक्रियकरणार्थो जीवव्यापारविशेषः । ज्ञाता० ३१ । वैक्रियसमुद्घातः-उत्तरवैक्रियार्थकप्रयत्नविशेषः । जं० प्र० २४१ ।

**वेउव्वियसरीर**-विभूषितशरीरः । भग० ७४६ ।

**वेउव्विया**-वैकुर्विका-विकुर्वितनानारूपधारिणी । जीवा० ३४६ । वैकुर्विका-विकुर्वितनानारूपधारिणी । सूर्य० २८१ ।

**वेउव्वियोवंग**-वैक्रियाङ्गोपाङ्गः । प्रश्न० ४७० ।

**वेए**-वेदः-यज्ञक्रियादिः । दश० ११४ ।

**वेएंति**-वेद्यते-आत्मना ज्ञायते । ठाणा० ३५३ ।

**वेओ**-वेदः-विदन्त्यस्माद्धेयोपादेयपदार्थानिति वेदः-क्षयोपशमिकभाववर्त्ययमाचारः । आचा० ६ ।

**वेग**-वेगः-रयः । उत्त० १०८ । वेगः-रयः । आव० ६०२ ।

**वेगच्छ**-वैकक्षं-उत्तरासङ्गः । उपा० २२ ।

**वेगच्छिया**-वैकक्षकी-संयतीनामुपकरणविशेषः । बृ० प्र० १७७ ।

**वेगपक्क**-वेगपक्वं-रूढिगम्यम् । विपा० ८० ।

**वेगल**-पृथक् । बृ० प्र० २८६ आ ।

**वेगवती**-नदीविशेषः । आचा० १७९ । नदीविशेषः । सूत्र० १९६ ।

**वेगविघाओ**-वेगविघातः । आव० ६१७ ।

**वेगसराद**-हस्त्यादिवाहनम् । ठाणा० २११ ।

**वेगित**-ग्रासस्य गिलने वेगवत् । प्रश्न० १२९ । ज्ञाता० ६७ ।

**वेच्च**-व्यूतं-वानम् । जीवा० २१० । तज्जातः । राज० ३७ ।

**वेच्छासुत्त**-वैकक्षिकासूत्रं-उत्तरासङ्गपरिधानीयम् । भग० ४७७ ।

**वेच्छू**-पर्वगविशेषः । प्रज्ञा० ३३ ।

**वेजयंत**-वैजयन्तः-प्रधानः । सूत्र० १४९ । जम्बूद्वीपे द्वितीयद्वारम् । ठाणा० २२५ ।

**वेजयंता**-वैजयन्ता-उत्तरदिग्भाव्यञ्जपर्वतस्य दक्षिणस्यां पुक्करिणी । जीवा० ३६४ । वेजयन्ता-अनुत्तरोपपातिकभेदविशेषः । प्रज्ञा० ६९ ।

**वेजयंति**-वैजयन्ती-विजयंतसूचिका पताका । प्रश्न० ४८ । वैजयन्ती-पार्श्वतो लघुपताकिकाद्वययुक्ता पताका । जं० प्र० २०५ ।

**वेजयंतिय**-पर्यायेणोपभुज्यमानम् । आचा० ४०० ।

